A.C. Joshi Library
P.U. Chandigarh

MSS No. 183 Subject Religion

Name of MSS श्रीमद्, भागवत टीका सहित: स्कंद ११

Author – –

Period Not available Folios 136

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 76

A.C. Joshi Library
P.U. Chandigarh

MSS No. 183 Subject RELIGION

Name of MSS श्रीमद् भागवत टीका सहित : स्कंद भावार्थ दीपिका

Author

Period Folios

Script SANSKRIT Source

Missing Folios

२९।

183

भा॰ ए॰ टी॰ १

ॐ श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ श्रीगुरवे सरस्वतीद्रुपाय नमः ॥ शुभमस्तु ॥

ॐ विजयंते परानंदकृष्णपादरजःस्रजः याधृताःमूर्ध्नि जायंते महेंद्रादिमहास्रजः १ उक्तैकत्रिंशदध्यायैर्मुक्ति
रेकादशे ततः जायंते यैर्निह्रासार्थैः समासव्यासरूपतः २ नारदो वसुदेवाय समासेनान्ववर्णयत् भगवा
नुद्धवायाथ विस्तरेणोपपत्तिभिः ३ तत्रतु प्रथमेध्याये यदुवंशस्य संक्षयः उपदिष्टो विरागाय मौशलव्यप
देशतः ४ प्रवृत्तिस्ततः परानंदकृष्णक्रीडानुवर्णिता तन्निवृत्त्या परानंदपदारोहोनुवर्ण्यते ५ एवं तावद्दश
मस्कंधे भूभारावतरणाय निजविभूतिविभूषितयदुवंशस्य यदुवंशावतारितसकलस्वांशस्य भगवतः श्रीकृष्ण
स्य तदुचितप्रवृत्तिविडंबनेन तत्श्रवणस्मरणादि परानंदकारकक्रीडानिरूपिता अथेदानीमुपरि
तामितयोगमायावैभवस्य भक्तानामात्मतत्वोपदेशपूर्वकंक्रीडार्थं भूतलेप्रवतारितानां चाधिकारिणां
स्वरोपाणां मौशलव्यपदेशेन तत्तदधिकारिपदप्रापणपूर्वकं चक्रत्याद्यनुग्रहाय तिः श्रेयसपदारोहोनुवर्ण्यते
निरूप्यते तत्रऊरुदेवर्षिभिः प्रविरक्तस्य वसुदेवस्य कर्मणा कर्मनिर्हारो यथास्यात् तदुच्यतां इत्येवं कर्मयोगो
पृष्टवतो नारदादिभिः कर्मयोगो निरूपितः कर्मणा कर्मनिर्हारण एव साधुनिरूपितः यच्छ्रद्धयाप्तवित्तेनशु
क्लेनेज्येत पूरुषः इत्यादिना तेन च विशुद्धसत्वस्य श्रीकृष्णरामौ परमेश्वरत्वेन ज्ञातवतः षष्ठाध्यायेश्री
कृष्णेनात्मतत्वमुपदिष्टं वचोवः समवेतार्थं ताते तदुपमन्महे यत्नःपुत्रानुसम्पृष्टि एतत्त्वशाम उदाहृतः इत्या
दिना तत्त्वविषयभोगातिशयेन पुनस्तिरोहितमासीत् तदेवेदानीं नारदमुखेन प्रथमे पंचाध्यायी निरूप्यते तत्र
प २ प्रथमाध्याये वैराग्योत्पादनार्थं कुलस्य ब्रह्मशापोपदेशेनात्युन्नतविषयसुखानामप्यनित्यता प्रतिपाद्यते त
तः चतुर्भिर्निमिजायंतेयसंवादेन सपरिकारपरमतत्वनिरूपणं ततः षष्ठे भगवदुद्धवसंवादप्रस्तावः ततः त्रयो
विंशत्या उद्धवं प्रति भगवतस्तत्वनिरूपणं ततो द्वाभ्यां मौशलक्रीडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिः न

राम १

तत्रैमौषालप्रसंगार्थं पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन कृत्वेति अवतारयदित्यत्रयामोदुःसह्यः जविष्ठं वेग
वन्तं अतिशीघ्रं हिंसायत्यवसायिनमित्यर्थः कलिं कलहं प्रसिद्धेनतत् १ एतद्धि ग्रहणान्ति येकोपिता इति ॥
सपत्नैर्दुर्योधनादिभिः कोपिताः कोपकारिणाः स्वबहु यथा भवति तथा बहुवारानित्यर्थः तदेवाह दुर्द्यूतहे
लनकचग्रहणादिभिरिति दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणमेतानि
आदिर्येषामसदानजतुगृहदाहादीनां तैश्च कृत्वा येकोपिताः तानंशोद्भूतानि निमित्तं कृत्वा इतरेतरतः उभयोःप॰

बादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः भुवोवतारयद्भारं जविष्ठं जनयन्कलिं
१ येकोपिताः सुबहु पाण्डुसुताः सपत्नैः दुर्द्यूतहेलनकचग्रहणादिभिस्तान् कृत्वा निमित्तमितर
तरतः समेतान् हत्वा नृपान्निरहरत् क्षितिभारमीशः २ राम ॥

नृपान्१ ततः समेतान् मिलितान् हत्वा क्षितेर्भारं निरहरत् जहार यद्वा ये कोपिता ये च कोपिताः तानितरेतरतः परस्परं
निमित्तं कृत्वेत्यन्वयः येनावतरप्रकटदैत्याः अतनादयः तान् स्वयमेव हतवान् येन्ये दैत्याः बांधवच्छद्मनास्थिताः
तान्परस्परं निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः अधुनानं दैवभूभारभूतराजघटनाः समागतभूपाल
दैत्यनिवर्हणाय स्वमायाप्रपंचविधानेनान्योन्यतः कलहं कुर्वाणाः तयोगसंघट्टनः तेनजानेनीतिसमद्धि
मानेमभूधायैर्निरूपयति यदुक्तं भगवद्गीतासु मम माया दुरत्ययेति तदेव सो परमेश्वरः क्षितेः भारमपाहरत्

भा॰ पु॰
टी॰
२

अपि च भूभारेत्यादि अन्यास्त्र भुवो भारभूताः राजपृतनाः राज्ञां पृतनाः सेनाः राज्ञस्तेषां पृतनाश्चेति वा स्वबाहुभि
र्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा वा बाहुभिरिति बहुवचनेन स्वस्य चतुर्भुजाभिप्रायेण नन्वे
वं कृत्स्नक्षितिकीर्षतीति तत्राह कथं तस्यैव कृत्स्नायया यादवानं दुस्थेति तत्राह अप्रमेयः प्रमातुमशक्यः चिंतामाह म
न्य इति नन्विति वितर्के अयं भूमेर्भारो यद्यपि लोकप्रतीत्या गतः तथाप्यहमगतमेव मन्ये यद्यस्माद्विषह्यं
सोढुमशक्यं यादवकुलमिति अनेन स्ववंशत्वात्स्वयं हननमनुचितमिति चिंतितं ३ नहीदमर्थितिर्दै न्यतोन

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमेयः मन्येऽवनेर्ननु गतोऽप्यगतं हि
भारं यद्यादवं कुलमहो ह्यविषह्यमास्ते ३ नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य वि
भवोन्नहनस्य नित्यं अंतःकलिं यदुकुलस्य विधाय वेणुस्तंबस्य वह्निमिव शांतिमुपैमि धाम ४

तत्राह नैवेति अन्यतः दिवादिभ्यो ऽस्य यादवकुलस्य परिभवः तिरस्कारो न भवेत् कुतः मत्संश्रयस्य मां संश्रयत इति म
त्संश्रयं कुलं तस्य किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरंगादिभिरुन्नद्धत्वं तस्य यद्वा न हीदं किंचित्सहते इति तत्रा
ह विभवोन्नहनस्येति तस्मादेवं करिष्यामीत्याह अंतःकलिमिति शांतिमुपशममुपैमि वर्तमानसामीप्ये व
र्तमानवदुपैष्यामि तदनंतरं धाम वचवैकुंठं स्वलोकमुपैष्यामीत्यर्थः मनसि विधाय मायया प्रपंचं विधाय विस्तार्य वे श्री॰
णुस्तंबस्य वेणुकांडस्य वह्निमिवेति तत्रैवं चर्करीत्यर्थः तदेव प्रत्यक्षमये प्रकटीकरोतीति अंतःशांतिमिति वा पाठः २

राम राम राम राम ४

एवंव्यवसितइत्यादिनाकथयति व्यवसितः कृतनिश्चयः सजज्ञे उपसंहृतवान् तदेवंप्रवतारप्रयोजनं
सर्वंसंपाद्यस्वंलोकंजगामेत्याह श्लोकद्वयेनस्वमूर्त्येतिलोकानांलावण्यनिर्मुक्तिः यथायमयेद्यलोके
पुलावण्यंनासीदित्यर्थः यद्वालोकेप्योलावण्यस्यविनिर्मुक्तिर्दानंयेनतः यत्संपर्केणलोकालावण्यवं
तोभवंतीत्यर्थः तथास्वमूर्त्यानृणांलोचनमाछिद्यप्राकृष्य तन्नोन्यस्यावलोकनेलोचनस्याप्रवृत्ते
तथास्वगीर्भिः तासांगिरांस्मरणंचित्तंचाछिद्यतथापदैः तत्तत्क्रांकितैः तानिपदानीतिनाईत्तमाणानां त्या॰गो॰२

एवंव्यवसितोराजन्मन्त्रीसैकल्पईश्वरः पुण्यव्याजेनविप्राणांसजज्ञेस्वकुलेविभुः ५ स्वमू
र्त्यालोकलावण्यनिर्मुक्त्यालोचनेन्दृणां गीर्भिस्तास्मरणोच्चित्तेपदैस्तानीतनोक्रियाः ६
प्राछिद्यकीर्तिंसश्लोकोवितनत्यसंजसानके नर्मोनद्यानरिष्ठांतीत्यमान्स्वपदमीश्वरः ७

प्रन्यत्रगमनादिकाःक्रियास्वाछिद्यतदानींसर्वेषांचत्वारिप्रहृत्तीश्चेकनिष्ठाः कृत्वेत्यर्थः किंचइत
उपरिजनिष्यमाणानांसंसारतरणायकीमत्यांशोभनाः श्लोकायस्यांतांस्वकीर्तिंवितत्यविस्तार्यप्रनया
कीर्त्याश्रंजसातत्क्षणेनैवतन्निश्छिनंतारिष्ठांतीत्यभिप्रेत्येश्वरः स्वपदंस्थानमगादिति ॥ १ राम राम
राम श्रीरामायनमः ॥ राम राम राम राम

भा॰ ए॰
टी॰
३

ब्रह्मण्येभ्यः प्रदातृभ्यो वा पूर्वसेवकेभ्यो वा विप्राः कुप्यन्ति तत्रापि तस्मिन्न तथेत्याह किंच कोपे जातेऽपि कृष्णचेत
सां कथं शापः कथं प्रवृत्त इत्यर्थः अतः शापहेतोर्निमित्तस्याभावात् निमित्तान्तरं पृच्छति यन्निमित्त इति एका
त्मनां एकचित्तानां कथं भेदः कलहः ईश्वरेच्छैवात्र निमित्तमिति परिहरति बिभ्रदिति सकलानां सुंद
रावयवानां संनिवेशो विन्यासविशेषो यस्मिन् ननु वपुर्बिभ्रत् तर्हि किं भिन्नसौन्दर्यादिविषयपरः नेत्याह सुमंग
लं कर्माचरन् तर्हि किं कयाचित् कामनया नेत्याह आप्तकामः तर्हि किमिति कर्माचरति धाम द्वारकां आस्थाय रममा

राजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् विप्रशापः कथमभूद्वृष्णीनां कृष्णचे
तसाम् ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ९
शुकउवाच ॥ बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः आस्थाय
धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः १० राम ॥

णः गृहे रममाणेन गृहस्थानां कर्म ग्राहयितुमित्यर्थः ननु किमाप्तस्य गृहस्थस्याकर्मभि
र्लीनत्वमाह उदारकीर्तिः बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिविस्तारार्थमित्यर्थः एवं परमैश्वर्येणावस्थान ॐ
एवं कुलं संहर्तुमैच्छत् तत्कस्य हेतोः स्थितः कृत्ये भूभारहरणे शेषो यस्य सः १० नमो नारायणाय ॥ ३
राम राम राम नमो भगवते वासुदेवाय ॥ राम राम राम राम

ईश्वरेच्छयोत्थितेन ब्रह्मशापेन निमित्तेन कृत्वा वक्तुमाह कर्माणीति कर्माण्यर्थमाह ताः कर्माणि कृत्वा निसृष्टा मु
नयः तपोधनाः पिंडारकं समागमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः पूर्वं कामदारकौ निर्वाविष्टस्य एकं न२
र्माणि विशिनष्टि पुण्यनिवहानीत्यादिभिः त्रिभिः पदैः कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयन्ति पुत्रोप
लालनादीनि तु तत्काल सुखमेव कुर्वंति प्रायश्चित्तादीनि तु पापमेव हरंति एतानि सर्वसुखानीत्याह पु
ण्यनिवहानि कीर्तनादिना पुण्यानि वहंति प्रापयंतीति तथा सुमंगलानि स्वतः सुखात्मकानि गायतो जगतः

कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा कालात्मना निवसता
यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ११ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः क
श्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः १२ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः उपसंगृह्य पप्र
च्छुरविनीता विनीतवत् १३ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं कृतोदरं च सुमहद्वस्त्राद्यैर्य
दुनंदनाः १४ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शि
व नाः प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति १५ राम ॥

कलिमलापहराणि कृत्वा मुनि प्रस्थापने हेतुः कालात्मना संहारकरूपेण वासुदेवगृहे निवसता स्वकुलं जि कु
हीर्षितेनेत्यर्थः पिंडारकं ततो नातिदूरे तीर्थविशेषे ११ उपसंगृह्य पादग्रहं कृत्वा १३ प्रश्नप्रकारमाह श्लोक
वे द्वयेन ते वेषयित्वेति १४ हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी वः युष्मान् साक्षात्प्रष्टुं विलज्जमा
ना सुमन्त्रं वेन पृच्छति प्रसोष्यंती आसन्नप्रसवा किंस्वित् संजनयिष्यति कन्यां वा पुत्रं वा तत्प्रब्रूत १५ ॥

भा॰ए॰ टी॰ १ प

प्रलब्धाः वंचिताः १५ तस्मिन्नुदरे अयस्मयं लोहमयं १६ मंदभाग्यैरस्माभिः किमेतत्कृतं नः अस्मान्
किं वदिष्यंतीति विह्वलिताः संतो मुसलमादाय ययुः १७ राज्ञे उग्रसेनाय तत्तु श्रीकृष्णाय १८ १९ आहुकः
उग्रसेनः सोपि वसुदेवसहितः श्रीकृष्णमपृष्ट्वैव प्रास्यत् प्रक्षिप्तवान् २० अस्य मुसलस्य चूर्णानि य

एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप जनयिष्यति वो मंदा मुसलं कुलनाशनं १५ तच्छ्रुत्वा तेति
संत्रस्ता विमुच्य सहसोदरं सांबस्य ददृशुस्तस्मिन्मुसलं खल्वयस्मयं १६ किं कृतं मंदभाग्यैर्नः किं
वदिष्यंति नो जनाः इति विह्वलिता गेहानादाय मुसलं ययुः १७ तच्चोपनीय सदसि परिम्लानमु
खश्रियः राज्ञ आवेदयांचक्रुः सर्वयादवसन्निधौ १८ श्रुत्वामोघं विप्रशापं दृष्ट्वा च मुसलं नृप
विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः १९ तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः समुद्र
सलिले प्रास्यल्लोहं चास्यावशेषितं २० कश्चिन्मत्स्योग्रसील्लोहं चूर्णानि तरलैस्ततः उह्यमाना
नि वेलायां लग्नान्यासन्किलैरकाः २१ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैर्महार्णवे तस्योदरग
तं लोहं स शल्ये लुब्धकोकरोत् २२ भगवान्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा कर्तुं नैच्छद्विप्रशापं
कालरूप्यन्वमोदत २३ इति श्रीभागवते महापुराणे एकादशस्कंधे प्रथमोध्यायः १ राम ॥

माणस्यावशेषितं लोहं प्रास्यत् तरलैस्तरंगैः २१ एरकाः प्रसिद्धतृणविशेषाः अन्यैर्मत्स्यैः सह शल्यं बाणा
ग्रे तानाः सर्वोर्थो येन स ईश्वरोपि समर्थोपि तत्तदन्यथा कर्तुं नैच्छत् किंचान्वमोदनयतः कालरूपी २३ टी॰ प
इति श्रीभावार्थदीपिकायामेकादशस्कंधे प्रथमोध्यायः १ राम ॥ राम शुभमस्तु ॥

द्वितीये निमिजायंतसंवादेनाह नारदः धर्मान्भागवतानाह भक्त्या वसुदेवाय पृच्छते १ अभीक्ष्णं अस्यापि तोपि पु
नः पुनरवात्सीदित्यर्थः ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशंक्याह गोविंदभुजगुप्तायामिति
न तस्यां शापादेः प्रभाव इत्यर्थः कृष्णोपासने लालसा उत्कंठा यस्य सः यद्वा जने मुक्तानामपीदृशी उत्कंठा तत्को
न्वनामनं भजेदित्याह कोन्विति इंद्रियवान् इति इंद्रियवत्त्वमात्रमेव यत्राधिकारि विशेषणमित्यर्थः सर्वतः सर्वे
ष्वपि लोकेषु मृत्युर्यस्य सः ३ यथा पित्रोर्यात्रा आगमनं अपत्यानां स्वस्त्यै मंगलाय यथा चोत्तमश्लोकस्य वर्त्मभूता

शुक उवाच गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह अवात्सीन्नारदोभीक्ष्णं कृष्णोपासनलालसः १
कोनु राजन्निंद्रियवान्मुकुंदचरणांबुजं न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदा तु देवर्षिं वसु
देवो गृहागतं अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ३ वसुदेव उवाच भगवन्भवतो यात्रा स्वस्तये स
र्वदेहिनां कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां ४ भूतानां देवचरितं दुःखाय च सुखाय च सुखायै
व हि साधूनां त्वादृशामच्युतात्मनां ५ भजंति ये यथा देवान्देवा अपि तथैव तान् छायेव कर्मसचिवाः सा
धवो दीनवत्सलाः ६

नां महतो यात्रा कृपणानां स्वस्त्यै तथा भगवत्स्वरूपस्य भगवतो यात्रा सर्वदेहिनां स्वस्त्यै इति ४ देवैरपि महता
सुखमानमनुवर्तिनमित्याह देवानां चरितं अनिष्टहृत्यादिना भूतानां दुःखायापि भवति त्वादृशां त्वया सदृशानां अ
च्युत आत्मा येषां ते किंच स्वस्वं कुर्वंतोपि देवा भजनानुसारेण कुर्वंति न तथा साधव इत्याह भजंतीति छायेव यथा
पुरुषो यावत्करोति तावदेव तस्य छाया ऽपि तथा कर्मसचिवाः कर्मसहायाः ६ राम कृष्ण राम ॥

भा॰ द॰ टी॰ ५

तदेवं यद्यपि भगवत्प्रागमनमात्रेणैव वयं कृतार्थाः तथापि पृच्छामः तदेवातिनवैदिकैर्धर्मैः प्रसन्नो भगवान्
नातिव्यर्थः ७ तत्त्वहेतोपि किमन्यो भगवत्प्रसादप्याप्तमस्तित्याह अहं किलेति गुविप्रजार्थोपूजयं मुक्
तिप्रयोजनः अन्यपूजितवान् किलेति स्मृतीरहे भगवत्कीव चनेंतुस्मरति अतो यथा वयं मुच्येम हि न
यानोस्मान्शाधि शिक्षयेत्यर्थः ८ विचित्राणि व्यसनानि यस्मिन् तस्मात्संसारात् तथाविध्नः सर्वतो ९

ब्रूह्यस्मांस्तथापि पृच्छामो धर्मान्भागवतांस्तव यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ७ अहं
किल पुरानन्तं प्रजार्थो भुवि मुक्तिदं अपूजयं न मोक्षाय मोहितो देवमायया ८ यथा विचित्रव्यस
नाद्भवद्भिर्विश्वतो भयात् मुच्येम ह्यंजसैवाद्धा तथा नः शाधि सुव्रत ९ शुक उवाच राजन्नेवं कृतप्रश्नो
वसुदेवेन धीमता प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः नारद उवाच सम्यगेतद्व्यवसितं भवता सात्व
तर्षभ यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ११ श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः
सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि १२

भयं यस्मिन् भवद्भिर्हेतुभूतैरंजसा अनायासेन अद्धा साक्षात् निश्चयेनच हरेर्गुणैर्वर्णनीयत्वेनप्रस्तुतैः
प्राक्वैहरिसंस्मारित इत्यर्थः १० प्रीतिमाविष्करोति सम्यगिति त्रिभिः पृच्छसे पृच्छसि विश्वभावनान्
सर्वशोधिकान् ११ आदृतः आस्तिक्येन गर्हीनः अनुमोदितः परैः क्रियमाणः संस्तुतः सद्धर्मो भागवतो उ॰
धर्मः देववसुदेवेत्यर्थः यद्वा देवेभ्यो विश्वस्मै च द्रुह्यन्ति येतानपि १२ राम राम ५

किंचत्वयामह्यमुपकारःकृतइत्याहत्वयेतिपुण्येश्रवणकीर्तनेयस्यसः १३ अत्रापिभगवद्धर्मनिर्णयेपिविदेह
स्यजनकस्य १४ आर्षभाणामुत्पत्तिंतावद्विविच्यकथयतिसार्धैःप्रियव्रतइति १५ मोक्षधर्मविवक्ष
यामोक्षधर्माणांवक्तुमिच्छयाअवतारणमवतारः अवतीर्णंवासुदेवांशमित्याहुः तस्यचवेदपारगंसुतश ं२
तमासीत्तेषामृषभसुतानांमध्येनवयोगेश्वराणांचरितंवक्तुमितरेषांचरितंतावदाह विख्यातमिति एतन्नाम्नाजना तेषामिति१

त्वयापरमकल्याणःपुण्यश्रवणकीर्तनः स्मारितोभगवानद्यदेवोनारायणोमम १३ अत्राप्यु
दाहरंतीममितिहासंपुरातनं आर्षभाणांचसंवादंविदेहस्यमहात्मनः १४ प्रियव्रतोनामसुतो
मनोःस्वायंभुवस्ययः तस्याग्नीध्रःततोनाभिःऋषभस्तत्सुतःस्मृतः १५ तमाहुर्वासुदेवांशंमोक्ष
धर्मविवक्षया अवतीर्णंसुतशतंतस्यासीद्ब्रह्मपारगं १६ तेषांतुभरतोज्येष्ठोनारायणपरायणः
विख्यातंवर्षमेतद्यन्नाम्नाभारतमद्भुतं १७ सभुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिं उपासीनस्तत्प
दवींलेभेवैजन्मभिस्त्रिभिः १८ तेषांनवनवद्वीपपतयोस्यसमंततः कर्मतंत्रप्रणेतारएकाशीति
र्द्विजातयः नवाभवन्महाभागामुनयोह्यर्थशंसिनः श्रमणावातरशनाआत्मविद्याविशारदाः २०

येनामवर्षं यस्यनाम्नाभारतमित्यद्भुतंविख्यातमासीत् एतेनतस्यधर्मातिरेकोनिरूपितः १७ इमांमहींगृ
हान्निर्गतःहरिमुपासीनःसेवमानःसन् १८ नवसुतानवद्वीपपतयःनवानांब्रह्मावर्तादिखंडानांपतयः
अस्यभारतवर्षस्यएकाशीतिसुताःकर्ममार्गप्रवर्तकाःब्राह्मणाबभूवुः १९ अर्थशंसिनःपरमार्थनिरूपि
काःश्रमणाःश्रमवंतःआत्माभ्यासेकृतश्रमाइत्यर्थः वातरशनाःदिगंबराःआत्मविद्यायांविशारदाःनि
ष्णाताः २०

अप्रतिहता र

ता॰

तेषां पारमहंस्यचरितमाह द्वाभ्यां एतदिति भगवद्रूपं विश्वं पश्यन्तः सदसदात्मकं स्थूलसूक्ष्मरूपं न च
व्यतिरेकेण पश्यन्तः २२ अव्याहतेष्टगतयोऽभिप्रेता गतिर्येषां ते मुक्ता अनासक्ता २३ महात्मनो निमेर्वितायमा
ने अनुष्ठीयमाने अजनाभे भारतवर्षे २४ यजमानो निमिः अग्नयः आहवनीयादयः विप्रा ऋत्विजादयः २५

कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः २१ त एते भ
गवद्रूपं विश्वं सदसदात्मकं आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीं २२ अव्याहतेष्टगतयः सुर
सिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान् मुक्ताश्चरंति स्म मुनिचारणभूतनाथविद्याधरद्वि
जगवां भुवनानि कामं २३ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया वितायमानमृषिभिरजना
भे महात्मनः २४ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप यजमानोऽग्नयो विप्राः सर्व ए
वोपतस्थिरे २५ विदेहस्तानभिप्रेत्य नारायणपरायणान् प्रीतः संपूजयांचक्रे आसनस्थान्य
थार्हतः २६ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः
विदेह मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः विष्णोर्भूतानि लोकानां पावनाय चरंति हि २७

अभिप्रेत्य ज्ञात्वा २६ स्वरुचैव रोचमानान् न त्वाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान् सनत्कुमारा
मादिसदृशान् परमप्रीत्या २७ तद्दर्शनमभिनंदति द्वाभ्यां मन्य इति ननु भगवतः पार्षदानां कथम
त्रोपलब्धिः तत्राह विष्णोरिति विष्णुभक्ता लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः २८ राम ॥

मयादुर्लभं श्रव्यमहोभाग्यमित्याह दुर्लभ इति बहवो देहा भवन्ति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो
दुर्लभः परमपुरुषार्थसाधनत्वात् तत्रापि वैकुंठप्रियो येषां वैकुंठस्य वा प्रिया येषां तेषां दर्शनं २९ हे अनघा निरवद्या भ
वन्तः कुशलमात्यंतिकं क्षेमं पृच्छामः यतः क्षणार्धकालमपि सत्संगः शेवधिः निधिलाभो यथा तेन दो भवति तथाच
परमानंद इत्यर्थः ३० तदर्थं भागवतान् धर्मान् ब्रूत यदि नोस्माकं श्रुतये श्रवणाय क्षमं भवति कथंभूतान् ये धर्मैः
प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति तान् ३१ सदसद्भ्यां त्रिविधं भुवनं मानेन येपि भगवद्धर्मश्रवणपरा
बुभुत्सुरित्यर्थः भगवद्धर्मेति उक्ते मायातत्तरणानि च वक्तव्यानि तारे हा भक्तेः प्राप्य युगक्रमात् जाते क्रमेण कृतवान्
वप्रश्नान् निमेर्नृपः एकस्यैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः ३२ प्रथमं आत्यंतिकं कथयति मन्य इति तत्र कुतश्चि क्षेमं२
द्येयस्मात् तदकुतश्चिद्भयं अत्र संसारे असदात्मभावात् असति देहादौ आत्मभावनातः नित्यं सर्वदा उद्विग्नबुद्धेः वि

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं २९ अत आत्यंतिकं क्षेमं पृच्छामो भ
यात्२ वन्तोनघाः संसारेस्मिन् क्षणार्धोपि सत्संगः शेवधिर्नृणां ३० धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमं यैः मोः२
प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ३१ नारद उवाच एवं ते निमिना पृष्टा वासुदेवमहत्तमाः प्रतिपूज्याब्रुवन् प्री
त्या ससदस्यर्त्विजं नृपं ३२ कविः मन्ये कुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं उद्विग्नबुद्धेरसदा
त्मभावाद्विश्वात्मना यत्र निवर्तते भीः ३३ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये अंजः पुंसामविदुषां वि
द्धि भागवतान् हि तान् ३४ यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ३५

श्वात्मना सर्वथा निःशेषेण यत्पदांबुजोपासने भीर्निवर्तते तत् ३३ भागवद्धर्मलक्षणमाह ये वै इति मन्वादिमुखेन वर्णाश्र
मादिधर्मा उक्ता निरहस्य तत्त्वमुखेनैव भगवता अविदुषामपि पुंसां अंजः सुखेनैवात्मलब्धये ये वै उपायाः प्रोक्ताः तान्
यानिति२ भगवद्धर्मान् विद्धि ३४ अंजः पदेनोक्तं स्फुटं विवृणोति यानिति यानास्थाय आश्रित्य योगादिषु प्रमाद्येन विघ्नेन हन्येत किंच नि
मील्य नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् न निमीलनं नाम अज्ञानं यथाहुः श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते।
एकेन विकलः काणो द्वाभ्यामंधः प्रकीर्तितः इत्यज्ञानत्वाभिप्रायः यथा पदन्यासस्थानमतिक्रम्य शीघ्रपतनं पदन्यासनगति
र्धावनं तद्वत् ज्ञाविकिंचिद्विदत्ति क्रिया अतिशीघ्रमनुष्ठानं धावनं तथानुतिष्ठन्नपि न स्खलेत् प्रत्यवायी स्यात् न पतेत् फला

ननुकेतेभागवताधर्माः ईश्वरार्पितानिसर्वकर्माणीत्याह आत्मनाचित्तेनाहंकारेणच अनुसृतोयःस्वभावस्तस्मादयमर्थः
भा॰ए॰ टी॰ ११२ नकेवलंविधितःकृतमेवेतिनियमःस्वभावानुसारिलौकिकमपीति तथाचगीतासु यत्करोषियदश्नासियज्जुहोषिद
दासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति यद्वाननुकायादीनामेवकर्मतानात्मनइत्याशंक्याह आत्मनेना
श्लो॰४ नुसृतान् ब्राह्मणत्वादिस्वभावाद्यद्यत्करोतीत्यर्थः तत्सकलंपरस्मैपरमेश्वरायनारायणायेतिसमर्पयेत् तथासतिस
कलमपिकर्मभागवतोधर्मोभवतीतिभावः ३६ ननुकिमेवंपरमेश्वरभजनेनअज्ञानकल्पितभयस्यज्ञानैकनिवर्त्यत्वादि
त्याशंक्याह भयमितियतोभयंतन्मायययाभवेत् अतोबुधोबुद्धिमान् तमेवाभजेत् ननुभयंदेहाभिनिवेशतोभवति सच
३७२ देहाहंकारतःसचतत्त्वज्ञानात्सत्यं किंतत्रतस्यमायाकरोति तत्राहईशादपेतस्येति ईशाद्विमुखस्यतन्मायययास्मृतिःभगवतःस्व
रूपास्फूर्तिः ततोविपर्ययोदेहोस्मीतितथाद्वितीयाभिनिवेशाद्भयंभवति एवंहिप्रसिद्धंलौकिकीष्वपिमायासुउक्तंचभगव

श्लो कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् ३६
भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोऽस्मृतिः तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवता
त्मा ३७ अविद्यमानोप्यवभातिहिद्वयोर्ध्यातुर्धियास्वप्नमनोरथौयथा तत्कर्मसंकल्पविकल्पकंमनोबु
धोनिरुंध्यादभयंततःस्यात् ३८ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके गीतानिना
मानितदर्थकानिगायन्विलज्जोविचरेदसंगः ३९

ता दैवीह्येषागुणमयीममामायादुरत्यया मामेवयेप्रपद्यंतेमायामेतांतरंतितेइति एकयाव्यभिचारिण्याभक्त्या
भजेत् किंचगुरुदेवतात्मागुरुरेवदेवताईश्वरआत्माप्रेष्ठश्चयस्यतथादृष्टिःसन्नित्यर्थः ३७ ननुविषयविक्षिप्तस्यकु
तोव्यभिचारिणीभक्तिःसंभवति कुतस्तरामभयंतत्रननावद्धिद्वयोर्भयमेवास्तवोस्ति किंतुमनोविलासमात्रमतोमनो
नियमनेनभजनादभयंस्यादित्याह अविद्यमानोपीति द्वयोर्द्वैतप्रपंचः धियामनसास्वप्नश्चमनोरथश्चयथेत्यादित्यर्थः ध्यातुःपुंसः४
प३ तत्कर्मणांसंकल्पयतिविकल्पयतिचमनः तन्निरुंध्यात् नियम्यतेन ततश्चैकयाभक्त्याभजनादभयंतस्यादित्यर्थः एत
दत्यंतदुष्करमित्याशंक्यसुगममार्गमाह शृण्वन्निति तदर्थकानि जन्मकर्माणिचअर्थोयेषांतानि एतान्यपिसा ॐ
कल्येनतावत्कर्तुमशक्यानीत्याशंक्याह यानिलोकेगीतानिप्रसिद्धानितान्येवशृण्वन्गायंश्चविचरेत् असंगोनिस्पृहः ३९
राम ॥ कृष्ण ॥ भद्रम् ॥ राम राम राम ॥ राम ॥ ॥

एवंच भजतः संजातप्रेमलक्षणभक्तियोगस्य धर्मस्य सर्वधर्मातीतां गतिमाह एवंव्रत इति एवंव्रतं नाम चर्या यस्य सः स्वप्रियस्य ह
रेर्नामकीर्त्या जातोऽनुरागः प्रेममयस्य सः अत एव द्रुतचित्तः श्लथहृदयः कदाचिद्भक्तिपराजितो भगवानिति मत्वोच्चैः
हसति एतावन्तं कालमयापितोस्मीति रोदिति अन्योन्यस्य ... रौति क्रोशति हे हरे मामनुगृहाणेति अतिहर्षेण गायति जितो जितोस्मि
ति नृत्यति किं दाम्भिकवत्स्वरागानुभूतिप्रकाशयितुं न उन्मादवत् ग्रहग्रहीतवत् लोकबाह्यविवशः ४० किंच खमिति सर्वाणि
भूतानि आकाशादीनि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् संभावनायां लिङ् ४१ न त्रियमाह्व क्रयोगाना
मपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नपि जन्मनि भवेदित्याशंक्य सदृष्टान्तमाह भक्तिरिति प्र

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबा
ह्यः ४० खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् सरित्समुद्रांश्च हरेः शरीरं यत्किंच भू
तं प्रणमेदनन्यः ४१ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः प्रपद्यमानस्य यथाश्नतः स्युस्तु
ष्टिः पुष्टिः क्षुदपायोऽनुघासं ४२ इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः भवन्ति वै भागवत
स्य राजन् ततः परां शान्तिमुपैति साक्षात् ४३ राजः अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां यथा चरति
यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ४४

प्रपद्यमानस्य हरिं भजतः त्रयः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः तथा निर्वृतस्य ततोऽन्यत्र गृहा
१२ दिषु विरक्तिरित्येष त्रिकः एककालः भजनसमकाल एव स्यात् यथा अश्नतः भुंजानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षु
न्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमेकैकस्मिन् भजने किंचित्प्रेमादित्रिके जायमानेनानुवृत्त्या निरंतरं
प्रेमादि जायते बहुसंभोजिन इव परमतुष्ट्यादि ४२ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युताङ्घ्रि
मिति भागवतस्य भवंतीत्युक्ते तस्य लक्षणं पृच्छति ४३ अथेति यद्धर्मो यस्मिन् धर्मे परिनिष्ठितः यादृशः यत्स्वभावः
यथा चरति वर्तते यद्ब्रूते चिह्नं वा यैर्लिङ्गैः भगवतः प्रियो भवति ४४ राम ॥ राम ॥ ॥

कमपि यथास्युस्तद्वत् ए२

किंचित् २ तृतिरंतरं भक्तानां

ब्रह्मभावेन १

भा॰ए॰ टी॰ ८ यद्वा मध्ये इत्यस्योत्तरमाह त्रयेण सर्वभूतेष्विति आत्मनः स्वस्य सर्वभूतेषु समत्वं यः पश्येत् तथा ब्रह्मरूपे आत्मन्य
धिष्ठाने भूतानि च यः पश्येत् यद्वा भूतत्वाद्यमात्मत्वादात्मा हि परमो हरिरिति तेनोक्तेः आत्मनो हरेः सर्वभूते
षु मशकादिष्वपि नियन्तृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् ततस्तस्मिन्तथा
त्मनि हरावेव भूतानि पश्येत् कथंभूते भगवति अप्रच्युतैश्वर्यादिरूपेण न तु पुनर्जन्तुमलिनभूताश्रयत्वेन जाड्या
दिप्रसक्तायैश्वर्यादिप्रच्युतिं पश्येत् स सर्वत्र परिपूर्णं भगवन्तं पश्यन्भागवतोत्तम इत्यर्थः ४५ प्रेम च मै

बालिशेषु २

हरिः सर्वभूतेषु यः पश्येत्भगवद्भावमात्मनः भूतानि भगवत्यात्मन्येष भागवतो
त्तमः ४५ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च प्रेममैत्रीकृपोपेक्षा यः करोति स म
ध्यमः ४६ अर्चायामेव हरये पूजां यः श्रद्धयेहते न तद्भक्तेषु चान्येषु स भक्तः
प्राकृतः स्मृतः ४७ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति विष्णोर्मायामिदं
पश्यन्स वै भागवतोत्तमः ४८

त्री च कृपा च उपेक्षा च ताः ईश्वरादिषु चतुर्षु यः करोति स मध्यमो भागवतः एवंभूतस्यापि हेतुदर्शनात् ४६ अ
र्चायां प्रतिमायां पूजां ईहते करोति न तद्भक्तेषु चैन्यत्र नरो न करोति प्राकृतः प्रकृतिः प्रारंभः अधुनैव प्रारब्धभक्तिरि
त्यर्थः शनैरुत्तमो भविष्यतीत्यर्थः पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणमाह गृहीत्वापीति
श्रीवासुदेवाविष्टचित्तो न गच्छति नादत् इन्द्रियैरर्थान्गृहीत्वार्थान्यपि शास्त्रार्थः इदं विश्वं ४८ राम ॥ ऽो ८

अन्येषु २

४ कामादिरहितस्य रतौनियथाचरत्यसौ तौत्तमस्मृक्तं ५० यो लिंगैर्भगवत्प्रियस्तस्योत्तममाह नयस्येति ४

किंचदेहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या न विमुह्यमानः स भागवतप्रधानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत् तृष्णा मनसो भयं बुद्धेस्तर्षः तस्मा इंद्रियाणां कृच्छ्रं श्रमः ४९ न कामाश्च कर्माणि च बीजानि च वासनाः तेषां वासुदेव एको निलय आश्रयो यस्य सः एतेन गृहीत्वापीन्द्रियार्थानित्यादि श्लोकत्रयेण द्वंद्व ५२ प्रतिलोमशः
विजन्मकुलकर्मतया आदिजातयश्चानुलोमजाः शूर्ध्वावसिक्तादयः अस्मिन्देहे अहंकाररहितैः सत्कुलकर्मादिलिंगैः
हरेः प्रियो भागवत इत्यर्थः ५१ वित्तेषु स्वीयं परकीयमिति आत्मनि स्वपर इति ५२ किंच त्रिभुवनविभवहेतवेपि

देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागव
तप्रधानः ४९ न कामकर्मबीजानां यस्य चेतसि संभवः वासुदेवैकनिलयः स वै भागवतोत्तमः ५०
नयस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः ५१ नयस्य स्वः पर
इति वित्तेष्वात्मनि वा भिदा सर्वभूतसमः शांतः स वै भागवतोत्तमः ५२ त्रिभुवनविभवहेतवेप्यकुंठ
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः
५३

त्रैलोक्यराज्यार्थमपि लवार्धमपि निमिषार्धमपि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवः विभवहेतवे न प्र
तन्वाः न तु तृष्णामात्रभाजनो परमैश्वर्यावाप्त्या भोगो भवेत् न कुंठेन चलेत् तत्राह अकुंठस्मृतिः भगवत् यदन्तो यस्मात् परं नास्ती
त्येवं रूपा अकुंठा न प्रगता स्मृतिर्यस्य सः भगवत्पदारविंदं यस्मात् परं नास्तीति कुतः यदेव अतत्राह अजितेन हरावेवा
त्मा येषां न यातैः सुरादिभिरपि दुर्लभात् किंतु केवलं विमृग्यात् न दर्येत्तया सर्वेर्न संप्राप्तसमरत् न चलतीत्यर्थः
दार स्म २५

उक्तंतं २

भा॰ए॰ टी॰ ९ अपि च विषयाभिसंबंधिनी चलनं कामेनानिसंतापे सति भवेत् स च कामो भगवत्सेवया निवृत्तो भवतीत्याह भगवत
इति उरुक्रमो वनतावंघ्रिवनयोः शाखाः अंगुलयः नारवत्नखानितान्येव मणयः तेषां चंद्रिकाशीतलादीप्तिः तया
निरस्तः कामादिनापो यस्मिन् तस्मिन् उपसीदतां हृदि कथं पुनः संतापः प्रभवति चंद्र उद्विते सति अर्कस्य तापइवेनय
स्यायः परइत्यादिना श्लोकत्रयेणयाहृदशइत्यस्योत्तरमुक्तं वेदितव्यं यद्भूतेइत्यस्य च हरिनामानीति तत्तानब्धं ५५ उक्तं

भागवत उरुविक्रमोंघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे हृदि कथमुपसीदतां पुनः स प्रभवति चंद्र
इवोदितेर्कतापः ५५ विसृजति हृदयं न यस्य साक्षात् हरिरवशाभिहितोप्यघौघनाशः प्रणयरशनया धृ
तोंघ्रिपद्मः स भवति भागवतप्रधान उक्तः इति श्रीभागवते महापुराणे एकादशस्कंधे द्वितीयोध्यायः २ राजो
वाच परस्य विष्णोरीशस्य मायिनामपि मोहिनी मायां वेदितुमिच्छामो भगवंतो ब्रुवंतु नः १

* स मस्तनभगवनलक्षणसारमाह विसृजतीति हरिः स्वयं साक्षात् यस्य हृदयं न विसृजति न मुंचति कथंभूतः अव
शेनाप्यभिहितमात्रोपि अघौघनाशयतियः स तर्हि किं न विसृजति यतः प्रणयरशनया हृदये नबद्धमंघ्रिपद्मं येयस्य सः ध्वतं २
भागवतप्रधान उक्तो भवति ५५ इति भावार्थदीपिकायामेकादशे द्वितीयः २ मायातत्त्वरणाब्रह्मकर्मप्रश्नचतुष्टयेतरतो
येतत्त्वरं वृत्तमार्षभैः मुनिभिः पृथक् विष्णोर्मायामिदं पश्यन्नित्युक्तं यतो मायोपवर्ष्यस्तिपरस्परस्येति हे भगवंतः १ ॥ गे ९

नन्वज्ञातलक्षणो भागवतोऽश्रुत्वा कृतार्थः स्यात् किं बहुप्रश्नैः अत आह नानुतृप्य इति संसारतापैर्नितरांत
प्तोऽहं तस्य तापस्य भेषजं हरिकथामृतं त्वन्मुखाद्वचो जुषमाणो नानुतृप्यामि मायायाः स्वरूपतो निरूपणा
संभवात् २ सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह एभिरिति आद्यः पुरुषः यथाशक्त्या भूतानामात्मा का
रणभूत एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज एषा माया भगवत इति चरमश्लोकपादस्याप्र
तिश्लोकमनुषंगः किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये स्वं मिमीते इति उपास्ते सः स्वमानानि तस्यात्मनो जीवस्य
प्रमभीतै १

नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं संसारता
पनिस्तप्तो मर्त्यस्तत्तापभेषजम् २ श्रीअन्तरिक्ष
स उवाच एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज स
ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ३ एवं
सृष्टानि भूतानि प्रविष्टः पंचधातुभिः एकधा दशधा
त्मानं विभजन् जुषते गुणान् ४

टीका नं० १ प्रकृष्टायै सिद्धये यद्वा स्वांशानां भूतानां मात्राप्रसिद्धये विषयभोगाय आत्मप्रसिद्धये मोक्षाय चेत्यर्थः तदुक्तं
वेदस्तुतौ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ३ एवं जी
वोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतानि अन्तर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येन्द्रियरूपे
ण आत्मानं विभजन् गुणान् तत्तद्विषयान् जुषते जोषयतीत्यर्थः यद्वा जमात्मानं प्रति गुणान् विभज्य जुषते
प्रीयत इत्यर्थः ४

कियन्तकालंभ्रमतीत्यतआह ३   एवंसंसरतीत्याह ४ ननुभुंजानःकथंसज्जतेभुंजानोभो[illegible]सौमुच्यतइतिचेत्तत्राह कर्माणीतिकर्मभिः २

भा॰प॰ सएवजीवआत्मनांतर्यामिणाप्रद्योतितैर्गुणैरिंद्रियैर्गुणान्विषयान्भुंजानइदंसृष्टंशरीरमात्मानंमन्यमा
टी॰ नाहंशरीरादन्यइतिसज्जते ५ कर्मेंद्रियैश्चसनिमित्तानिसवासनानिकर्माणिकुर्वन् सुखेतरंदुःखा
१० त्मकंकर्मफलंबह्वन्यभद्राणिवहंतीतितथाभूताः सर्गप्रलयौजन्ममरणे ७ धातूनांमहाभूतानामुप
एवंमायामयींसृष्टिमुक्त्वामायामयंप्रलयंदर्शयन्नारभते धात्विति

गुणैर्गुणान्सभुंजानआत्मप्रद्योतितैःप्रभुः मन्यमानइदंसृष्टमात्मानमिहसज्जते ५
कर्माणिकर्मभिःकुर्वन्सनिमित्तानिदेहभृत् तत्तत्कर्मफलंगृह्णन्भ्रमतीहसुखेतरं ६
इत्थंकर्मगतीर्गच्छन्बह्वभद्रवहाःपुमान् आभूतसंप्लवात्सर्गप्रलयावश्नुतेवशः ७
धातूपप्लवआसन्नेव्यक्तंद्रव्यगुणात्मकं अनादिनिधनःकालोह्यव्यक्तायापकर्षति ८ ५४
शतवर्षाह्यनावृष्टिर्भविष्यत्युल्बणाभुवि तत्कालोपचितोष्णार्कोलोकांस्त्रीन्प्रतपि
ष्यति ९ पातालतलमारभ्यसंकर्षणमुखानलः दहन्नूर्ध्वशिखोविष्वग्वर्द्धतेवायुनेरि
तः १० संवर्तकोमेघगणोवर्षतिस्मशतंसमाः धाराभिर्हस्तिहस्ताभिर्लीयतेसलि
लेविराट् ११

प्लवेनाशहेतुनावाआसन्नेव्यक्तंकार्यंद्रव्यंस्थूलंगुणाःसूक्ष्मंतदात्मकंअव्यक्तायअव्यक्तंप्रतिनेतुमाकर्षयति ८
नाशहेतुमाहशतवर्षेतितस्मिन्कालेउपचितउष्णोयस्यसोर्कःयद्वातेनकालेनउपचितमुष्णंयस्य त२ ओं
स्यसः ९ ऊर्ध्वशिखऊर्ध्वज्वालाविष्वक्परितः १० संवर्तकःप्रलयकर्ताधाराभिर्जलबिंदुभिः हस्तिहस्ताभिः १०
तत्प्रमाणाभिः ११

ततउपाधिलयाद्वैराजः पुरुषोऽव्यक्तंकारणेप्रविशति ननुब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यां
तेकृतात्मानः प्रविशंतिपरंपदमि स्मृतेर्यावदधिकारमवस्थितिराधिकारिकाणामितिन्यायाच्चवैराजशब्दाभि
धेयस्यचब्रह्मणः परमभागवतत्वान्मोक्षएवसंगच्छतेनान्येषामिवकारणमात्रप्रवेशः सत्यमस्तुमेयथादि
नासत्यलोकगतानामप्यभक्तानामावृत्तिश्रवणाद्भक्तैर्ब्रह्मणोपिप्रकृतौलयः पुनरुत्पत्तिश्रुति
मोक्षदौर्लभ्यसूचनायैवमुक्तिमिति विरोधः यद्वाकेनापिप्रमाणेननब्रह्मणःप्रकृतिप्रवेशनचमोक्षप वो क्ष
इतिद्रष्टव्यं ११ एवंविराजोलयमुक्त्वातत्कारणानांमहदादिपृथिव्यंतानांप्रतिलोम्येनलयमाह वायु
व्यस्तत इत्य२

ततोविराजमुत्सृज्यवैराजःपुरुषोनृप अव्यक्तंविशतेसूक्ष्मंनिरिंधनइवानलः ११ वायुनाहृत
गंधाभूःसलिलत्वायकल्पते सलिलंतद्धृतरसंज्योतिष्ट्वायोपकल्पते १२ हृतरूपंतुतमसा
वायौज्योतिःप्रलीयते हृतस्पर्शोवकाशेनवायुर्नभसिलीयते १४ कालात्मनाहृतगुणंन
भआत्मनिलीयते इंद्रियाणिमनोबुद्धिःसहवैकारिकैर्नृप प्रविशंतिह्यहंकारंस्वगुणैरहमात्म
नि १५

तेति वायोर्हिगंधरसहारित्वंप्रसिद्धंसंवर्तकेनवायुनाअपहृतगंधा अतएवगंधस्यावर्तकस्यगतत्वात्सलिल
त्वायकल्पतेसलिलेलीयतइत्यर्थः तद्धृतरसंतेनवायुनाएवंहृतोरसोयस्यतत् १३ तमसाचरूपतिरस्का
रत्वंप्रसिद्धंसंवर्तकेनतमसाअवकाशेनआकाशेनस्वकारणेन १४ कालात्मनाईशस्यहिकालतएवक्षो
भःप्रसिद्धः तद्रूपेणात्मनाईश्वरेणआत्मनितामसाहंकारेइंद्रियाणिबुद्धिश्चराजसाहंकारेमनोवैकारि
कैर्देवैः सहसात्विकाहंकारएवंत्रिविधैःस्वगुणैःस्वकार्यैःसहितःअहंअहंकारःआत्मनिमहतिसच

भा०ए०
टी० ११

त्रिवर्णा त्रिगुणा मायाश्रवणभूतं सनातनं तन्निहन्तुपायमश्वलोक्यः छेदयति किं भूयः इति १६ एवमनुक्तेपि नः
तन्निहन्तुपायमेव पृच्छति यथैतामिति यद्यपि तन्मायया तातो भुवयः श्रीभजेत्तमिति भक्तिस्ताःस्कान्वेनोक्तैव न
ष्वापि किं भक्तिरेव अन्योपि वान्योपायोस्तीति तात्वर्थः पुनः अज्ञः अकृतात्मभिः अवशीकृतान्तःकरणैः स्थूल
धियः स्थूले शरीरे अहं धीर्येषां तेन भक्तिव्यतिरेकेणानात्मयनुपायं इति अभिप्रेत्य भक्तिमेव समाथ नैतिरूप्य
यति तत्र प्रथमं वैराग्यद्वारा गरूपसंतमाह चतुर्भिः कर्माणीति दुःखहत्यै दुःखप्रतीकाराय पाकविपर्यासं

एषा माया भगवतः सर्गस्थित्यन्तकारिणी त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि १६ राजा
यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः तरन्त्यंजः स्थूलधियो महर्ष इदमुच्यतां १७ प्रबुद्धः क
र्माण्यारभमाणानां दुःखहत्यै सुखाय च पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां १८ नि
त्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः १९ एवं लोकं प
रं विद्यान्नश्वरं कर्मनिर्मितं सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनां २०

फलवैपरीत्यं मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानां १८ कर्मभिः साधितानामपि वित्तादयो न सुखहेतव इति
च पश्येदित्याह नित्यार्तिदेनेति आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः अपायिभिश्च १९ एवं लोके परमि
ति कर्मनिमित्तत्वान्नश्वरं तथा च श्रुतिः तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षी
यत इति किं च वर्तमानसमयेपि दुःखमेवेत्यपश्येदित्याह सतुल्यातिशयध्वंसं सह तुल्येनातिशयेन ध्वंसेन
वर्तमाने अनतुल्यो स्पर्द्धा अतिशये असूया ध्वंसे आलोचने भयादिकं चापरिहार्यमित्यर्थः यथा खंडमंडल

गो
११

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञं अन्यथा संशयनिरासकत्वायोगात् परे
च ब्रह्मणि अपरोक्षानुभवेन निष्णातं अन्यथा संबोधसंचारायोगात् परब्रह्मणि निष्णातत्वद्योतकमाह उप
शमाश्रयमिति २१ गुरुरेवात्मा दैवतं च यस्य सः अनुवृत्त्या सेवया यैः धर्मैः वस्तुतः आत्मप्रदः स्वोपासकानां
हीनेषु दयां ४ यथा बलिप्रभृतीनां २२ यथोचितमिति समेषु मैत्रीं उत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः २३ शौचं बाह्यं मृज्ज अला २
लादिभिः आभ्यन्तरं दंभामानादिभिः शिक्षेत् ततः स्वधर्माचरणं तितिक्षां तथा मौनं वृथा वागनुच्चारणं

नस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं २१ तत्र भा
गवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः अमायया अनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः २२ सर्वतो म
नसोऽसंगमादौ संगं च साधुषु दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं २३ शौचं तपः तितिक्षां च
मौनं स्वाध्यायमार्जवं ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः २४ सर्वत्रात्मेश्वरान्वीक्षां कैव
ल्यमनिकेततां विविक्तचीरवसनं संतोषं येन केन चित् २५ राम कृष्ण राम

स्वाध्यायमधिकारानुरूपं वेदपाठादिकं आर्जवं सरलत्वं ब्रह्मचर्यं यथास्वाश्रमं उचितं स्त्रीसंगत्यागः स्वदारनियमादि
अहिंसा भूतेष्वद्रोहः द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षविषादराहित्यं २४ आत्मेश्वरा
न्वीक्षां सच्चिद्रूपेणात्मेक्षणं नियंतृरूपेणेश्वरान्वीक्षां च कैवल्यं एकान्तशीलत्वं अनिकेततां गृहाद्यभिमान
राहित्यं विविक्तचीरवसनं विजने पतितानां वस्त्रखंडानां शुद्धानां वा वल्कलानां परिधानं २५ राम ॥

भा॰ए॰ भागवतेभगवत्प्रतिपादके अन्यत्रशास्त्रादौचाप्रनिंदां मनसाप्राणायामैः वाचामौनेनकर्मणोनीहयादंडं
टी॰ सत्यंयथार्थभाषणं शमदमौअंतःकरणबाह्येंद्रियनिग्रहौ २६ हरेर्जन्मकर्मगुणानांश्रवणादितदर्थेईह
११ र्मोद्देशेनसर्वकर्मविशेषणत्रयजनादियत् तत्तदर्थेशिक्षेत् २७ इष्टंदत्तमित्यादयोभावेनिष्ठाः इत्तंसदा
चारः आत्मनःप्रियंगंधपुष्पादिदारादीनप्यालत्वपरस्मैपरमेश्वरायनिवेदनंसेवकतयासमर्पणंयत्तत्शिक्षे
त् २८ कृष्णएवात्मानाथश्चयेषांकृष्णआत्मनोजीवस्यनाथोयेषामितिवातेषुउभयत्रस्थावरेजंगमेचयापरिच

श्रद्धांभागवतेशास्त्रेनिंदामन्यत्रचापिहि मनोवाक्कर्मदंडंचसत्यंशमदमावपि २६ श्रवणंकी
र्तनंध्यानंहरेरद्भुतकर्मणः जन्मकर्मगुणानांचातदर्थेखिलचेष्टितं २७ इष्टंदत्तंतपोजप्तंवृत्तं
यच्चात्मनःप्रियं दारान्सुतान्गृहान्प्राणान्यत्परस्मैनिवेदनं २८ एवंकृष्णात्मनाथेषुमनुष्ये
षुचसौहृदं परिचर्यांचोभयत्रमहत्सुनृषुसाधुषु २९ परस्परानुकथनंपावनंभगवद्यशः मि व४
थोरतिंमिथस्तुष्टिंनिर्वृत्तिंमिथआत्मनः ३० स्मरंतस्मारयंतश्चमिथोघौघहरंहरिं भक्त्यासं
जातयाभक्त्याबिभ्रत्युत्पुलकांतनुं ३१
रा१

र्यातांविशेषतोमनुष्येषुतत्रापिसाधुषुस्वधर्मशीलेषुततोपिमहत्सुश्रीभागवतेषु। तैःसहसंगमस्यपत्यावनेभगवद्य
शः तस्यपरस्परानुकथनंशिक्षेत् यद्वायशःप्रतितत्रसंस्पर्द्धादिपरित्यागेनमिथोयारतिः रमणीयाचतुष्टिःय
त्सुखंयाचनिर्वृत्तिः समस्तदुःखनिवृत्तिःतांचशिक्षेत् ३० एवंवर्त्तमानानांपरमानंदप्राप्तिमाहस्मरंतइति श्री॰
हृदयेनभक्त्यासाधनभूतयासंजातयाप्रेमलक्षणयाभक्त्यायत्तदरणेनउत्पुलकेनतेरोदनमितिवेदितव्यम् ३१ ११

ग्रजेहरिंग्रनुशीलयंति तल्लीलामभिनयंति एवंपरमेत्यप्राप्यनिर्वृताःसंतःतूस्नींभवंति ३२ उपसंहरतिइतीतिभा
गवतधर्मान्शिक्षन्नयाभक्त्यानारायणपरोमायांतरतीत्युक्तेःपृच्छति ३३ नारायणाभिधानस्येतिनिष्ठांस्वरूपं ग्रयंभावः
ब्रह्मैवतावन्नारायणइतिभगवान्नारायणइतिभगवानितिपरमात्मेतिचोच्यते तदुक्तंवदंति तत्तत्त्वविदस्तत्त्वंयज्ज्ञा
नमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते तथानारायणोभगवतितदिदंविसाहितंगृहीतमायोकरणसर्गादा स्व
वरणःस्वतंत्र्यादिषु ३४ ततत्त्वकिमेभिःशब्दैर्निर्विशेषंतदेववस्तूच्यते ग्रस्तिवाकोपिविशेषांशइति ग्रत्रोत्तरंस्थि

क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंति वदंत्यलौकिकाः नृत्यंतिगायंत्यनुशीलयंत्य
जंभवंतितूस्नींपरमेत्यनिर्वृताः ३२ इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया नारायणपरो
मायामंजस्तरतिदुस्तरां ३३ राजा नारायणाभिधानस्यब्रह्मणःपरमात्मनः निष्ठामर्हथ
नोवक्तुंयूयंहिब्रह्मवित्तमाः ३४ पिप्पलायनउवाच स्थित्युद्भवप्रलयहेतुरहेतुरस्ययत्स्व
प्नजागरसुषुप्तिषुसद्बहिश्च देहेंद्रियासुहृदयानिचरंतियेनसंजीवितानितदवेहिपरंनरेंद्र ३५:

त्युद्भवेति ग्रयमर्थः ग्रस्यविश्वस्यस्थित्युद्भवप्रलयानांहेतुः हेतुरहितःसनारायणइति परमेवतत्त्वमवेहिस्वप्न
जागरसुषुप्तिसुसत् ग्रनुवर्तमानेयत् वद्व्यतिचतुरीयंविशुद्धंसन्ततमिति बहिश्चसमाध्यादौयन्मवैत्रवर्तमानंतद
३ ब्रृहल्लणाद्बुल पिश्चलक्षितंब्रह्म [illegible] ाहतनमित्यर्थः तत् [illegible] परमात्मेतिपरमेवततत्त्वमवेहि एवंलक्षणभेदेनारायणादिनामभिः
देहेंद्रियप्राणमनांसियेनसंजीवितानिसंचरंतिप्रभंतिते) उच्यमानमपिपर [illegible] मेवतत्त्वंजानीहि ३५ राम

(तस्मात्परमेवतत्त्वमवेहि

स्वस्वकार्येषु स्वचेष्टेषु हेतुः ४

न न

भा॰ ५॰ टी॰ २३

अवैहीत्यनेनविषयत्वंप्रा[illegible]निषे[illegible]तिनैनतदिति एतन्यरंतत्वंमनोविशतिंविषयीकरोतिवागुतवागपिचक्षुस्त्व
आत्माबुद्धिः प्राणास्वक्रियाशक्त्यानप्राप्नोति ग्रन्थानिचेंद्रियाणियथानलंस्वाःस्वांशाभूताअर्चिषोविस्फुलिंगा
दयः नप्रकाशयंतितद्दहंतिचतथाजडाःसमनआदिश्रुतिसिद्धभिव्यज्यमानस्यात्मप्रकाशस्यतत्प्रतिप्रकाशकेस्य
नतत्प्रकाशविषयत्वं यथादीपःप्राणस्यप्राणइत्युक्तत्वमक्षुक्तश्रोत्रस्यश्रोत्रमेतत्स्यात्तेमनसोपेमिनोविदुरिति मे
तथा यतोवाचोनिर्वर्तंतेअप्राप्यमनसासह ननुतेऔपनिषदंपुरुषंपृच्छामीतिश्रुतेःशास्त्रगोचरत्वंप्रतीयतेनत्राहशास्त्रो

नैतन्मनोविशतिवाग्नचक्षुरात्माप्राणेंद्रियाणि
चयथानलमर्चिषःस्वाः शास्त्रोपिबोधकनिषेध
तयात्मस्थूलमर्थोक्तमाहयदनेननिषेधसिद्धिः २६

योनिशास्त्रोपिआत्मस्थलेआत्मनिप्रमाणंसत् अर्थोक्तंअर्थाउक्तंयथाभवतितथाहनसाक्षात्कुतःबोधकनिषेधत
याम[illegible]धनयात्तस्येवबोधकस्यनिषेधरूपत्वात् यतोवाचोनिवर्तंतेअप्राप्यमनसासह यद्वाचानभ्यु
दितंयेनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धि यन्मनोनमनुतेनचक्षुषापश्यतिकश्चनेनमित्यादिश्रुतिनः ननुतर्हिनैवा
ह श्रुतितंकिमिदमत्यनेअर्थोक्तमाहेतितत्राह यदनत्यंतिअयथानआदेशोनेतिअस्थूलमनणुयतोवाचोनिवर्तंते उ॰
यद्वाचानभ्युदितमित्यादिनिषेधस्यपदवधिभूतंब्रह्मतदनेविनासिद्धिर्नास्तिसर्वस्यनिषेधस्यसावधित्वात् २६ ॥ २३

नैति २

गहनत्वमेवोपपादयन् प्रथमे द्वितीयप्रश्नस्योत्तरं कर्माकर्मेति कर्म विहितं अकर्म तद्विपरीतं निषिद्धं विकर्म विगतं कर्म
५ विहिताकरणं एतत् त्रयं वेदवादो वेदैकगम्यं न लौकिकः वेदस्य ईश्वरात्मकत्वात् ईश्वरादुद्भूतत्वाद्योरूपत्वाद्वा इत्य त्वात्
३ येत र्थः पुंवाक्यं हि वक्तृतात्पर्यतो ज्ञायते न शक्यं अपौरुषेये केवले वाक्ये पूर्वापरार्थालोचनं विना तात्पर्यावधारणं तत्तु दुष्करमिति
अकर्मादौ विद्वांसोऽपि मुह्यन्ति किमुतान्ये अतस्त्वं न तदा बालत्वान्न बुद्धवानिति ४३ उक्तं यद्वेदतात्पर्यमाह परोक्ष
वादः इति यत्तदन्यथास्थितोऽर्थः संगोपयितुमन्यथाकृत्वोच्यते स परोक्षवादः तथा च श्रुतिः तं वा एतं चतुर्होतारं सन्तं भिर
सन्तं चतुर्होतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति परोक्षवादत्वमेवाह कर्ममोक्षायेति तं तु स्वर्गाद्य

आविर्होत्रः॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ४३
परोक्षवादो वेदोऽयं बालानामनुशासनं कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ४४ नाचरेद्य
स्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ४५ राम॥

र्थं कर्माणि विधत्ते न कर्ममोक्षार्थं न त्वाह बालानामनुशासनं यथा भवति तथा अत्र दृष्टान्तः अगदं औषधं यथा पि
ता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति ददाति च तावता तेनावलोभाद्यात् तस्य तल्लाभः
प्रयोजनमपि त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते ४४ ननु कर्ममोक्षश्चेदनु
ष्ठानार्थः तर्हि प्रथममेव कर्म त्यजतामत आह नाचरेदिति अजितेन्द्रियत्वादज्ञः स्वयं यदि नाचरेत् तर्हि विक
र्मणा कर्मानाचरणलक्षणेनाधर्मेण मृत्योरनन्तरं मृत्युमेव प्राप्नोति तथा च श्रुतिः मृत्वा पुनर्मृत्युमापद्यते अद्य
मानः स्वकर्मभिरिति ४५

भा॰ ए॰ टी॰ ९५

तस्माद्वेदोक्तमेव कुर्वाणो न तु निषिद्धं ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिः तत्फले च स्यात् ततश्च नैष्कर्म्यरू
पासिद्धिर्न स्यादत आह निःसङ्गः अनभिनिवेशवान् ईश्वरेऽर्पितं न तु फलोद्देशेन ननु फलस्य श्रुतत्वात्कर्मणि कृते फले
भवेदेव न रोचनार्थं नित्यकर्मणि रुच्युत्पादनार्थं अगदपाने खण्डकादिवत् न तत्र स्वकर्मभिरुच्चावचार्थं संविचार ५३
यति तदा वयो वा पतत्तदुत्तरमविदित्वा मार्गं यस्माल्लोकान्प्रतिसकृपणां इत्यनात्मतत्त्वस्य कृपणस्य कृपणानां तमेतं वे
दानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति यज्ञादीनां ज्ञानशेषत्वतो
वावधार्य निष्कामस्य कर्मसु प्रवर्तते न तत्र स्वर्गकामो यजेतेत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमाद

वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ४६ य आशु
हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवं ४७ लब्ध्वानुग्रह आचार्या
त्तेन संदर्शितागमः महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ४८ शुचिः सन्मुखमासीनः प्राणसं
यमनादिभिः पिण्डं विशोध्य संन्यासकृतरक्षोऽर्चयेद्धरिं ४९ अर्चादौ हृदये वापि यथालब्धोपचार
कैः द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चासनं ५०

कामितो मोक्षश्चेन्न भवतीति नैष्कर्म्यसिद्धिर्भवतीति भावः ४६ वैदिकं कर्मयोगमुक्त्वा तान्त्रिकमाह य आशु इति २२
परात्मनः परस्यैव सत आत्मनो जीवस्य हृदयग्रन्थिमहंकाररूपं निर्हर्तुमिच्छुः तन्त्रोक्तेन विधिना प्रकारेण भ
जेत् तत्र मार्गमः चकाराद्वैदिकेन सह समुच्चयमाह ४७ तमेव विधिमाह लब्ध्वानुग्रह इत्यादिना तेनाचार्ये
ण संदर्शित आगमः अर्चनप्रकारो यस्य सः ४८ मूर्तेः सम्मुखमासीनः प्राक्शिल्पोक्तेन भूतशुद्ध्यापि पिण्डं देहं विशो श्री गो
ध्य संन्यासैः सङ्गिन्यासैः कृता रक्षा येन सः ४९ आदावेव द्रव्याणि पुष्पादीनि जलादिशोधनेन क्षितिं संमार्जे ९५
नादिना आत्मानं मन्यमनया लिङ्गं मूर्तिमनुलेपक्षालनादिना निष्पाद्य योग्यानि कृत्वा ५० राम ॥

कार्यकारणाद्भिन्नं न भवति २

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह सदिति सत् स्थूलं कार्यम् असत् सूक्ष्मं कारणं
तत्सर्वं ब्रह्मैव भाति कुतः यद्यस्मात्तयोः सदसतोः परं कारणं ननु कथमेकं बहुविधस्य कारणं तत्राह उरु
शक्ति अनेकशक्तिमत् उरुर्महती मायालक्षणा शक्तिर्यस्य तदिति वा बहुधा भानमेव दर्शयति आदौ यदेकं
ब्रह्म तदेव सत्त्वरजस्तमइति त्रिवृत् प्रधानं प्रवदन्ति हि ततः क्रियाशक्त्या ह्येतज्ज्ञानशक्त्या महानिति तदेव प्र
वदन्ति ततोऽहमिति जीवं जीवोपाधिमहंकारं तदेव प्रवदन्ति ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानप्राह्वे
न देवताः क्रिया इंद्रियाणि अर्थाः विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति न हि सर्वं तद्रू
पेण स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ३७ ननु सर्वात्मके चेद्ब्रह्म तर्हि सर्वस्य कार्य

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवं ज्ञानक्रियार्थफलरूपतयोरु
शक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ३७ नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवन
विद्व्यभिचारिणां हि सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ३८

स्य जन्मादिविकारवत्त्वाद्ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह नात्मेति आत्मा ब्रह्म न जजान न जातः जन्माभावा
देव न दनेन तदास्तिना लक्षणोऽपि विकारो नास्ति नैधते न वर्धते हृद्व्यभावादेव विपरिणामोऽपि निरस्तः कुतः हि
यस्माद्व्यभिचारिणां आगमापायिनां बाल्ययुवादिदेहानां सवनवित् तत्तत्कालद्रष्टा तत्तदवस्थावतां द्रष्टा न तद
वस्थो भवतीत्यर्थः निरवस्थः कोऽसावात्मा अत्र आह उपलब्धिमात्रमिति नन्वायातेन तर्हि क्षणिकत्वेनास्या
त्याह सर्वत्रेति सर्वत्र देशे शश्वत्सर्वदा अनपायि अनुवर्तमानेन तु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रती
तेर्न ज्ञानस्यान्यथात्वं अत आह इंद्रियबलेनेति सर्वं देवज्ञानमिंद्रियबलेन विविधं कल्पितं नीलाद्याकारा
वृत्तय एव जायंते नश्यंति न ज्ञानमिति भावः व्यभिचारिव्यभिचारे दृष्टान्तः प्राणो यथेति ३८ ॥
च

भा॰ प॰ टी॰ १५

स्वेदजेषु १

ष्वंडजेषु जरायुजेषु स्वरूपेषु उद्भिज्जेषु यवनिष्ठितेषु उपधावति अनुवर्त्तते एवं दृष्टांतेन निर्विकारत्वं प्रदर्श्य दार्ष्टांति
केऽपि दर्शयति कथं तदेवात्मा सविकार इव प्रतीयते यत्र जाग्रदादि इंद्रियगणः यदा च स्वप्ने तत्संस्कारवान् अहंकारः
यदा तु सुप्ते तेन तदा तस्मिन् प्रसुप्ते इंद्रियगणे सन्ने लीने अहमिति अहंकारे च सत्ने कूटस्थो निर्विकार एव ... ऊन
शायस्तेन लिंगशरीररूपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः ननु अहंकारपर्यंतस्य सर्वस्य लये शू
न्यमेवावशिष्यते कुतदा कूटस्थ आत्मा अत आह तदनुस्मृतिर्नः तस्य विशेषज्ञानदर्शनस्पर्शनादिशून्य
स्य सुखरूपात्मनः सुषुप्ति साक्षिणः स्मृतिर्नः अस्माकं भवति एतावंतं कालं सुखमहमस्वाप्सं किंचिदवेदिषमि

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र सन्ने यदिंद्रियगणेऽहमि च प्रसुप्ते कू
टस्थ आशयमृते तदनुस्मृतिर्नः ४९ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजा
नि तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ५० राजा कर्मयो
गं वद ततः पुरुषो येन संस्कृतः विधूयेहाशु कर्माणि नैष्कर्म्यं विंदते परं ५१ एवं प्रश्नमृषीन्पूर्वमपृच्छं पि
तुरंतिके नाब्रुवन्ब्रह्मणः पुत्राः तत्र कारणमुच्यतां ५२

ति अनेनानुभूतस्यात्मनः स्मरणात्तदा स्वप्रकाशसुखात्मानुभवः विषयसंबंधाभावात्तु न स्पष्टं तत्प्रतिभावः तथा च श्रु
तिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति ननु यदि सुषुप्तौ
कूटस्थात्मानुभवो भवेत्तर्हि सुषुप्तस्यापि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् केदानीं तत्त्वि
वेकेनानुभवो भवेदत आह यर्हीति ४९ विज्ञेषणादि विहाय केवलमब्जनाभस्य चरणेच्छया या उरुभक्तिस्त
या गुणाश्च तत्संमलानि तया ... नाशयेत् चेत एव वा चक्रं तस्य गतानि मलानि तया भक्त्या क्षालयेत् तदा त
स्मिन् विशुद्धे चेतसि साक्षात् यथावत्तेनात्मतत्त्वमुपलभ्यते अमलयोर्दृशोर्यथा सर्वमेव सिद्धः सवितृ
प्रकाश इति भक्तेः कर्मयोगाधीनत्वात्तेष्वेव निकर्मयोगमिति ५० नैष्कर्म्यं कर्मनिवृत्तिं ... साध्यं ज्ञानं ५१

सत्यो २

१५

पाद्यादिपात्राण्युपकल्प्यसन्निधाप्यहृदिसंस्पृजितेंद्रीयमूर्तौध्यात्वाहृदादिभिः हृदयशिरः शिखाकवचनेत्रास्त्रमंत्रैः
मूलमंत्रेणचदेवेकृतन्यासोमूलमंत्रेणार्चयेत् ५१ अंगादित्ति हृदयादीनि उपांगानि सुदर्शनादीनि तन्मूर्ति
नांसपार्षदांसपरिवारांकैरुपचारैरर्चयेदित्याह ५२ पाद्येति आदिशब्देन मधुपर्कमाचमनं च अदितानाक्षि
लकालंकारेन तु इज्यायांनादानैरर्चयेद्दिस्तुनकेनकामहेत्वर्चं रुतिनिनिषेधात् ५३ उपहारो नैवेद्यं शेषं नि
र्माल्यंस्वधाम्निस्वस्थानेदेवंहृदिस्थमूर्तिकं उद्वास्यस्थापयित्वापूजांविधिंसमापयेदितिशेषः नोत्रिकंकर्म

पाद्यादीनुपकल्प्याथसन्निधाप्यसमाहितः हृदादिभिःकृतन्यासोमूलमंत्रेणचार्चयेत् ५१ सांगोपां
गांसपार्षदांतांतांमूर्तिंस्वमंत्रतः पाद्यार्घ्याचमनीयाद्यैःस्नानवासोविभूषणैः ५२ गंधमाल्याक्षतस्र
ग्भिर्धूपदीपोपहारकैः सांगंसंपूज्यविधिवत्स्तवैःस्तुत्वानमेद्धरिं ५३ आत्मानंतन्मयंध्यायन्मूर्तिंसं
पूजयेद्धरेः शेषमादायशिरसास्वधाम्न्युद्वास्यसत्कृतं ५४ एवमग्न्यर्कतोयादावतिथौहृदयेचयः
यजतीश्वरमात्मानमचिरान्मुच्यतेहिसः ५५ इतिश्रीमहापुराणेभागवतेएकादशस्कंधेतृतीयोध्यायः
श्रीराजोवाच ॥ यानियानीहकर्माणियैःयैःस्वच्छंदजन्मभिः चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः १

इतिश्रीएकादशेतृतीयोध्यायः ३ चतुर्थेत्ववतारेहाप्रश्नस्योत्तरमुक्तवान् जयंतीनंदनोनाम्नाद्रमिलोनवसत्त
मः सृष्ट्यादिभिमनर्यांत्मनइत्यनेनात्मनः प्रियमवतारंपूजयेदित्युक्तेरवतारान्प्रश्नयेदिति तथास्तवैःस्तुत्वानमेद्धरि
मित्युक्तेःगुणकर्माण्यतस्तांश्चापेति तनः एकानियानियानीतिकर्मीकरिष्यति त्वयाऽष्टानिकालत्रयसंबंधि
सकलावतारगुणकर्माणिकथयितुंप्रशाकानिसंक्षेपतस्थानिचित्काल्यकथायिमीत्याह योवाइत्यादिना १

ष्या

वता २

बृहस्पतिप्रभृतिकः

मंदमतिः १

इत्यादि ३

भा॰पु॰ अनुक्रमिष्यन्गणयितुमिच्छति यः सतुबालानामिवबुद्धिर्यस्य सः कालेनमहताकोपिमत्सामतिर्भूमेरजांसिगण
टी॰ णयेदपिअखिलशक्तिधाम्नःसर्वशक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत् तथाचश्रुतिः विष्णोर्नुकंवीर्या
१६ णिप्रवोचंयःपार्थिवानिविममेरजांसि योअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रिधोरुगायनइति तत्रादौ १
पा॰४ पुरुषावतारमाहयदास्वसृष्टैःभूतैःविराजेब्रह्मांडंपुरंनिर्मायतस्मिन्लीलयास्वांशेनजीवेनयदाप्रविष्टोनारायणः
तदापुरुषाभिधानमवापलीलयाप्रविष्टः नतुभोक्तृत्वेनप्रभूतएवएषस्यजीवस्यनतभोक्तृत्वात् अस्यगणाकर्माणि
हृदयेनयत्कायएति यस्याधिष्ठेयःकायएषःकायेइतिसप्तमीवातनन्मतोसमष्टिव्यष्टिजीवानोतानकर्मेंद्रियाणि ३

द्रमिलः॥ योवाअनेनस्वगुणाननंतानानुक्रमिष्यन्सनुबालबुद्धिः रजांसिभूमेर्गणयेत्कथंचित्कालेन
नैवाखिलशक्तिधाम्नः २ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् स्वांशेनविष्टःपुरु१
षाभिधानमवापनारायणआदिदेवः ३ यत्कायएषभुवनत्रयसन्निवेशोयस्येंद्रियैस्तनुभृतामुभयें१
द्रियाणिज्ञानंस्वतःश्वसनतोबलमोजईहासत्वादिभिःस्थितिलयोद्भवआदिकर्ता ४ आदावभूच्छतधृती
स्य रजसास्यसर्गेविष्णुःस्थितौक्रतुपतिर्द्विजधर्मसेतुः रुद्रोऽप्ययायतमसापुरुषःसआद्य इत्युद्भवस्थितिलयाः
सततंप्रजासु ५

शक्तिः

यस्यस्वतःस्वतंत्रयभूतानांस्वत्वात्तनुभृतांतानेयस्यमनःसिद्धंतानंतानमितिवायस्यश्वसनतःप्राणात् बलंदेहशक्तिः
ओजः इंद्रियशक्तिः ईहाक्रियायोयश्वसत्वादिभिर्विश्वस्थितिलयोद्भवआदिकर्ता आकर्तृत्वेनेनतत्पूर्वकंकर्तृतरमपि
सूचितं ४ तदर्शयितुंगुणावतारद्वाराचराचरसृष्ट्यादिकर्तृत्वमाह आदावितियस्यात्पनुषंगः यस्यरजसाअ
स्यजगतःसर्गेकार्येशतधृतिर्ब्रह्माभूत् स्थितौचविष्णुः यस्यसत्वेनेतिशेषः सचक्रतुपतिस्तत्फलदाता द्विजा गो॰
तीनांतद्धर्माणांचसेतुःपालकइत्यर्थः यस्यतमसाअस्याप्ययायरुद्रोभूत् इतिएवंब्रह्मादिभिर्निमित्तभूतैः प्र १६
जासुउद्भवादयोयतोभवंति आद्यःपुरुषःइत्यन्वयः ५

स॰२

मितिहास२

धर्मस्य भार्यायां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नरश्च नि मूर्त्तिद्वयेनाजनिष्ट जातः तच्चरितमाह नैष्कर्म्यं मा
त्मस्वरूपं लक्षणं येन तत्कर्मनिर्हारादरूपं वाउवाच नारदादिभ्यः स्वयं च चार योग्यापि कर्मा चरन्नास्ते ऋषिवर्यैर्निषेव
नाविद्धीयस्य सः ६ भगवद्व्रताननुष्ठानं कंपमानोपशमं दर्शयितुमाह इंद्र इति दशभिः धामस्थानं तपसा ग्रहीत
मिच्छतीति विशं क्य तं योनाशायकामं सपरिवारं प्रेषयामास ७ त्वनय सकामः वदरीति उपाख्यायते यः तेनस्या
श्रमं सप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणात्यैर्वेषवीबाणैः ८ ततस्य महिम महिमानं जानानो तिश्रन
न्सहितः अक्रमम परार्थं प्रहोप्रहंथीर इति विस्मयो गर्वः तद्दृहितःपजमानान् शापभियाकंपमानान् भोविभोस
हे १ मर्थ देववधुः माभैष्टवलिमातिंथ्यतानं प्रार्थयतेन मम स्माकमाश्रमे आतिथ्याभावे शून्यमायःस्यादित्यर्थः हे

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशांतः नैष्कर्म्यलक्षणमुवाच चचार कर्म यो
द्यापि चास्त ऋषिवर्यनिषेविताघ्रिः ६ इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स वदर्यु
पाख्यं गत्वाप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञाय शक्रकृतमक्र
४न् ममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् माभैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ८ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः नैतद्विभो त्वयि परे विकृ
तेवि चित्रं स्वारामधीरनिकरानतपादपद्मे ९ त्वां सेवतां सुरकृता बहवोन्तरायाः स्वौको विलंघ्य परमं व्रज
३ तां पदं ते नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि १० राम राम॥
नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडा निनम्राणि शिरांसि येषां ते लज्जाभरेणे
तेर वाव नतशिरस्का इत्यर्थः सघृणं यथा भवति कृपां जनयंत इत्यर्थः कृपायुक्तं मिति वा मायानः परे अक्रो विकृते स्वारामा मुनं
तेषां निकरेणानतं पादपद्मं यस्य तस्मिंस्त्वयि एतदलोभादिकं न चित्रं ९ अस्माकं चापराधाचरणं स्वभावत्वान्न चित्रमि
अनानां२ त्याह त्वामिति त्वां सेवतां सेवमानानां सुरैरिंद्रादिभिः कृताश्च तरायाविघ्ना भवंति कस्मादित्यत आह स्वौकः इति स्वस्थानं स्व
धोमधुकृत् भ्रमरःमधुकरोतिहारत्वेनस्वरूपेणचेतिमधुमक्षिकाच १० तत्राद्यमाच्छिक्षितमुक्त्वाद्वितीयाच्छिक्षित
माह सायमिदंभोक्ष्यामिश्वइदंभोक्ष्यामीति भिक्षितमन्नादिनसंगृह्णीत किंतुपाणिपात्रः तन्मात्रग्राही यद्वाउदरमेवामत्रंपा
त्रंयस्यसः एकभिक्षायामुदरमात्रग्राहीभवेत् संग्रहीतमक्षिकेवनभवतिनजीवतीत्यर्थः ११ राम कृस ॥ ॥

भा॰११ टी॰ ११

पनहि प्रयत्नेनेति पुनः सायंतनमिति १२ स्पर्शासक्तिर्नाशहेतुरिति गजात् शिक्षितमित्याह पदापीति पादेनापि दारवीं दा
रुमयीमपि गजो हि करेणुं प्रदर्श्य निखातपिहितगर्ते निपात्य बध्यते १३ किंच नाधिगच्छेन्नोपगच्छेत् १४ त्यागभोगवि
हीनो धनसंचयः परगामी भवत्यत्र मधुहा गुरुरित्याह नदेयमिति तदन्यो बलवान्भुंक्ते तदप्यन्यस्तच्चान्यः मधुहा
मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु भूगर्भे प्रोथने कथमन्यो ज्ञास्यति हरिष्यति चेति तत्राह अर्थविल्लिंगैरर्थं त

सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं मक्षिकाइव संगृह्णन्सह तेन विनश्यति १२ पदापि युवतीं भि
क्षुर्न स्पृशेद्दारवीमपि स्पृशन्करीव बध्येत करिण्या अंगसंगतः १३ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्यु
मात्मनः भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधुः १४ नदेयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं भुंक्ते तदपि त
च्चान्यो मधुहेवार्थविन्मधु १५ सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमे
राम राम ॥ धिनां १६ नमो भगवते वासुदेवाय॥ राम राम राम ॥

दुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च १५ सोयमेव विनापि भोगः संभवतीत्य
त्रापि स एव गुरुरित्याह सुदुःखेति आशासानामिति वक्तव्ये वर्णलोपश्चार्षः यतिश्च ब्रह्मचारी च पक्वान्न
स्वामिनावुभौ तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेदिति गृहिणामावश्यकत्वेन दानविधानात् रामायनमः
श्रीगुरवे सरस्वतीरूपाय नमः ॥ राम राम राम राम कृष्ण कृष्ण राम राम राम ॐ ११

बलाधिकैः संहन्येत गजैरन्यैर्गजो यथा २

हरिणाच्छिक्षेदित्याह ग्राम्येति भगवद्गीतं तु शृणुयादेव मृगयोर्लुब्धकस्य १७ हरिणशावादेव हरिणीसुतः
ऋष्यशृंगोपि गुरुस्तत्तानत्वमस्त्याह नृत्येति वश्यो वशभूवेतिशेषः १८ सापसक्ति नीशाहेन विनिमीनाच्छिक्षेदित्याह जिह्व
येति अतिप्रमाथिन्या अतिक्षोभकया दुर्जेयया ऋच्छति प्राप्नोति बडिशैरामिषलिप्तैर्लोहकंटकैः १९ दुर्जेयत्वमु
पपादयति इंद्रियाणीति निराहारस्यान्यत्सर्वं भावः यथाहारत्यजनेन तर्हि नेंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्द्धते य

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् १७ नृत्य
वादित्रगीतानि जुषन्ग्राम्याणि योषितां आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः १८ जिह्वया
तिप्रमाथिन्या जनो रसविमोहितः मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा १९ इंद्रियाणि ज
यंत्याशु निराहारा मनीषिणः वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते २० तावज्जितेंद्रियो न स्याद्वि
जितान्येंद्रियः पुमान् न जयेद्रसनं यावज्जितं सर्वं जिते रसे २१ पिंगला नाम वेश्यासीद्विदेहनगरे
पुरा तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन २२ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती अ
भूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमं २३ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ तान्शुल्कदा
न्वित्तवतः कांतान्मेनेर्थकामुका २४

दि न भुज्यते नहि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् अतो रसासक्तिं परित्यज्यौषधवद्भुंजीतेति प्राणवृ
त्त्यैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जेयत्वख्यापनायोच्यते इतिशेषः २२ पिंगलायाप्येतदेव शिक्षितमिति
वक्ष्यन् तदाख्यानमाह पिंगलेत्यादिना मे मया च शिक्षितं स्वैरिणी कामचारिणीति संकेते रतिस्थाने २३ तान्वि
त्तवतः सधनान् अत एव शुल्कदान् मूल्यदान् कांतान् सुरतार्हान् २४ राम राम ॥ ॥

भा॰ए॰ टी॰ ३३ अपि संभावनायां अन्योपि मामुपैष्यतीति दुराशयेत्यन्तरेणान्वयः २५ द्वार्यवलंबमानापुनः प्रविशति पुनः निर्ग
च्छति एवं कुर्वती निशीथमर्धरात्रं प्राप २६ निर्वेदः अलंबुद्धिः वित्तचिंतैव हेतुर्यस्य सः २७ यथा यथावत्सम
मत्तः शृणु ननु किं निर्विण्णायागीतश्रवणेनेत्यत आह हि यस्मात्पुरुषस्याशायाः पाशानां निर्वेदोऽसिः यथा तथा
छेत्ता नत्र हेतुः नहीति अंगाहे राजन् २८ अविजितात्मत्वे हेतुः याहं बालिशाविवेकशून्या तस्मादसतः येन

आगतेष्वपयातेषु सा संकेतोपजीविनी अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः २५ एवं दु
राशया ध्वस्तनिद्रा द्वार्यवलंबती निर्गच्छंती प्रविशंती निशीथं समपद्यत २६ तस्या वित्ताशया
शुष्यद्वक्त्राया दीनचेतसः निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः २७ तस्या निर्विण्णचित्ता
यागीतं शृणु यथा मम निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः २८ न ह्यंगाजातनिर्वेदो दे
हबंधं जिहासति पिंगलोवाच अहो मे मोहविततिं पश्यताविजितात्मनः या कांतादस
तः कामं कामये येन बालिशा २९ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय अकाम
दं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ३० अहो मयात्मा परितापितो वृथा सांकेत्य
वृत्त्यातिविगर्ह्यवार्तया स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ३१

कारणेन असतः तुच्छान्नरात्कामं कामये २९ बालिशत्वं प्रपंचयति संतमिति वत्तभिः समीपे संतं अंभिस्थान् इ तवी
मं परोक्षमीश्वरं ३० विगर्ह्या विनिंद्या वार्ता या जीविका तया कुत्तः सांकेत्येन या वृत्तिः अथवा बहुव्रीहिः स्वविशेषणे
वाय दिनायं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात् अर्थ च अर्थतृषः लुब्धात् अत एवानुशोच्यात् नरात् याहं वि ॐ
त्तं रतिं चेच्छती तयाहं यात्मा परितापितः केनचित्रमित्युक्तीतेन नरेणाजितेन स्वयं विक्रीतेनात्मना देहेन ३१ ३३

अहोधिकूमोया अहंह्यसतिवीभक्तिस्तिनंभजामीत्याह यदिति वंशोनामस्थूणास्तनिहिताः तिर्यक्वेणवःवंश्यास्तस्मि न्नुभयतोनिहतावेणवः अस्थिभिरेवनिर्मिताः वंश्यादयोयस्मिंस्तत्र पृष्ठदेदीर्घमस्थियत्तु सवंश्यः पार्श्वोस्थीनि वंश्यानिस्थूणाहस्तयदास्थीनि तथारोमभिर्नखैश्चपिनद्धमाच्छादितं तथापिदवंति नवद्वाराणियस्मिंस्तत् ए वंभूतमगारं रूपंनरशरीरमेतत् मेमत्तोऽन्याकावाकोतमूढाउपैतिसेवते ३१ सन्तेरातोसत्यामप्यहोममहोहर त्याह विदेहानामितियाहमसतीअच्युतादन्यंकामंभोगमिच्छतीसा ३२ एवंनिर्विण्णमानसा अतःपरमेवंकरिष्या

यदस्थिभिर्निर्मितवंशवंश्यस्थूणंत्वचारोमनखैःपिनद्धं क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णंमदुपैति कान्या यैस्तद्धानिपविशाणिपेचनाह्वेविषिच अष्टचितंत्ताणायोनिकान्यामत्रउपैतिनि जिघ्रन्तुक्ता पिसर्वेभेवपएन्नपिसर्वकमले जिघ्रन्त्यष्टपन्तस्वकंविहायान्कायस्यानविरज्यते अहोमहिस्यमाहात्म्यस
स वैव्यामोहितेजगत् नविरज्यतिकायोयेपीडयन्नयिनासिको ३२ विदेहानांपुरेह्यस्मिन्नहमेकैवमू ढधीः यान्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ३३ सुहृत्प्रेष्ठतमोनाथआत्माचायंशरीरिणां तंविक्री दाक्ता
यात्मनैवाहंरमेनेनयथारमा ३४ कियत्प्रियंतेव्यभजन्कामायेकामदानराः आद्यन्तवन्तोभार्यायादे वावाकालविद्रुताः ३५ नूनंमेभगवान्प्रीतोविष्णुःकेनापिकर्मणा निर्वेदोयंदुराशायायन्मेजातःसुखा
वहः ३६

मीत्याह सुहृदिति अयमीश्वरआत्मनैवआत्मानमेवनिवेद्यतंविक्रीयविशेषेनक्रीत्वा अनेनैवसहहरेमे रमालक्ष्मीर्यथा ३४ अन्यस्यासेव्यत्वंदर्शयति कियदिति आद्यन्तवन्तोकामाः विषयाः कामादानरावादेवा
यं कालकलितभार्यायाः कियत्प्रियंकृतवंतः नकिंचित् अतोनेहामुत्रचनद्धतिरिक्तः कोपिसेव्योस्तीत्यर्थः ३५ एवंनिश्चित्यस्वभाग्यमभिनंदति नूनमितिदुष्टाआशायस्यामे ३६ राम राम कृष्ण ॥ हर ॥

भा॰ द॰ ननुधनाशान्याक्लिष्टात्मिकथंविरक्तासीत्यत आह मैवमिति मंदभाग्याचेदहंस्यांतर्ह्येवंनिर्वेदहेतवःक्लेशानस्युरि
टी॰ त्यर्थः येननिर्वेदेनानुबंधंगृहादिकंनिर्हृत्यपरित्यज्य ३६ अतस्तेनश्रीविष्णुनाउपकृतेनकृतमुपकारंनिर्वेदलक्ष ल
२५ णंग्राम्येषुविषयेषुवासंगताः ३८ कथंव्रजसीत्यत आह संतुष्टेति ३९ ननुब्रह्मादीन्हित्वाश्रमनैवेतिकोयंनियमः
तत्राह संसारेति मुषितेक्षणमपहृतविवेकं ४० नहिकिमात्मत्राणोपाधिनाभजिष्यसि ननत्रसर्वतोनिर्विद्य

मेवंस्युर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः येनानुबंधंनिर्हृत्यपुरुषःशममृच्छति ३६ तेनोपकृतमा
दायशिरसाग्राम्यसंगताः त्यक्त्वादुराशाःशरणंव्रजामितमधीश्वरं ३७ संतुष्टाश्रद्दधत्येतद्यथा
लाभेनजीवती विहराम्यमुनैवाहमात्मनारमणेनवै ३८ संसारकूपेपतितंविषयैर्मुषितेक्षणं ग्र
स्तंकालाहिनात्मानंकोन्यस्त्रातुमधीश्वरः ३९ आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात् अप्र
मत्तइदंपश्येद्ग्रस्तंकालाहिनाजगत् ४० ब्राह्मणउवाच एवंव्यवसितमतिर्दुराशांकांततर्षजां छि
त्वोपशममास्थायशय्यामुपविवेशसा ४१ आशाहिपरमंदुःखंनैराश्यंपरमंसुखं यथासंछिद्यकां
ताशांसुखंसुष्वापपिंगला ४२ इतिश्रीभागवतेएकादशस्कंधेअष्टमोध्यायः ८ राम राम ॥

भगवद्भजनेतिप्रवृत्तस्यात्मनएवंसमर्थत्वादित्याह आत्मैवेति यदाएवंजगत्कालसर्पेणग्रस्तंपश्येत्तदाप्रमत्तःसन्निखि
लाद्देहादिदेहासक्तभोगान्निर्विद्येत तदाहि आत्मैवात्मनोगोप्तेत्यन्वयः अतःकेवलमीश्वरमेवभजामीतिभावः ४०
कांतस्पर्शाभिलाषः ततोजातां ४१ फलितमाह आशाहीति ४२ राम राम कृष्ण विष्णु ॥ ॥ ॐ
इतिश्रीभागवतेभावार्थदीपिकायामेकादशस्कंधेऽष्टमोऽध्यायः ॥ शुभम् भद्रम् ॥ ॥ २५

नवमेकुररादिभ्योदेहनस्योपशिक्षितं श्रुत्वायदुःकृतार्थोभूदितिकृत्स्नेनवर्णितं कुरराद्युदितमाह परिग्र
होहीति यद्यत्प्रियतमंतत्तस्यपरिग्रहः तद्विद्वानपरिग्रहोदुःखमितिविद्वान्सन् यस्त्वकिंचनःत्यक्तपरिग्रहः
ननुदरिद्रस्तदाहसामिषमिति १ अर्भकशिक्षामाह नेतिगेहपुत्रिणांतद्यन्नोयाभवतिसचिंताचमेनास्तिआ
त्मैवक्रीडायस्यआत्मनिरतिः प्रीतिर्यस्यसः ननुतत्सर्वंतयोःकिंसादृश्येनेष्टंतत्परमसुखमित्याह द्वाविति ३

ब्राह्मणउवाच परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः १
सामिषंकुररंजघ्नुर्बलिनोन्येनिरामिषाः तदामिषंपरित्यज्यससुखंसमविंदत २ नमेमानावमानौ
स्तोनचिंतागेहपुत्रिणां आत्मक्रीडआत्मरतिर्विचरामीहबालवत् ३ द्वावेवचिंतयामुक्तौपर
मानंदआप्लुतौ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४ क्वचित्कुमारीत्वात्मानंवृणाना
नृगृहमागतान् स्वयंतानर्हयामासक्वापियातेषुबंधुषु ५ तेषामभ्यवहारार्थंशालीन्रहसि २
पार्थिव अवघ्नंत्याःप्रकोष्ठस्थाश्चक्रुःशंखाःस्वनंमहत् ६ राम कृष्ण ॥ राम ॥

विमुग्धः अतःजडः अनुद्यमः एवंभूतोयोबालः यश्चप्रकृतेःपरमीश्वरंप्राप्तस्तौद्वौकर्मयोःशिक्षितेनवकु
आख्यायिकामाह क्वचिदित्यादिना वृणानान् स्ववरणायागतान् बंधुषुपित्रादिषु ५ शंखाःशंखवलयाः
महत्ययाभवति तथास्वनंचक्रुः ६ सामहतीबुद्धिमतीजनन्स्वनंशाल्यवहननंजुगुप्सितंचदरिद्रताद्योत
कं एकैकशःक्रमेणैकमेकंभंजकरादयसारितवती ७ राम राम कृष्ण राम ॥ ॥

भा॰ए॰ टी॰ ७५

निरभिदत् पृथक्कृतवतीतत्कर्मणोपास्तवचकथंसंगतिस्तत्राह ८ लोकानिति ९ वासइतिप्रथमोक्तया
देकलहहेतुः वार्त्तागोष्ठीहेतुर्भवेदित्यर्थः चित्तैकाग्रताहेतोस्तन्निर्लक्षणसमाधिरितिशरकारस्थितिलिं
मित्याह मनइतितत्रोपायमाह जितेतिश्वासस्तज्जयेश्वासजयः तस्यचजयेश्वासाधीनेमनोनिश्चलंभवति न
त्वखिलंनिश्चलंभवति तत्राखिलेनिश्चलेसदपिमनोविषयवासनयायदिविक्षिप्येततर्हिपश्वादिवत्सर्वेध्यालीयेतवा
तथापिकिंतत्राहवैराग्येणविक्षिप्यमाणं अभ्यासयोगेनलब्धंध्रियमाणंस्थिरीक्रियमाणं ११ एकत्रेतिकुत्रतत्राहय

सानत्रजनकस्मिन्नेमन्त्वामहतीव्रीडिताततः बभंजेकैकशःशंखान्द्वौद्वौपाण्योरशेषयत् ७ उभयोरप्यभू
द्घोषोह्यवघ्नन्त्याः स्मशंखयोः तत्राप्येकंनिरभिदद्देकस्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमंतस्या
उपदेशमरिंदम लोकाननुचरन्नेतांल्लोकतत्त्वविवित्सया ९ वासेबहूनांकलहोभवेद्वार्ताद्वयोर
पि एकएवचरेत्तस्मात्कुमार्याइवकंकणः १० मनएकत्रसंयुज्याज्जितश्वासोजितासनः वैराग्याभ्या
सयोगेनध्रियमाणमतंद्रितः ११ यस्मिन्मनोलब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून्सत्त्वेनवृद्धे
नरजस्तमश्चविधूयनिर्वाणमुपैत्यनिंधनं १२

स्मिन्निति यत्तद्ब्रह्मविदेयात्मकंमनः एतद्यस्मिन्परमात्मनिरूपेभगवतिलब्धास्पदंकर्मवासनांमुंचतितस्मिं तत्तु
कर्मवासनात्यागेपिसत्त्ववृद्धिवह्नयोरुर्वीरः नसत्त्वेनेति वृद्धेनोपशमात्मकेनरजस्तमसोरभावेविदोमलयाभावा
न्निर्वाणमवृत्तिकंध्येयाकारेणावस्थानिकुतः अनिंधनेइंधनेगुणाःतत्कार्यंचतद्रहिते तदुक्तंयोगशास्त्रे मनसो
वृत्तिशून्यस्यब्रह्माकारतयास्थितिः यासंप्रज्ञातनामासौसमाधिरभिधीयते १२ राम ॥ राम ॥ ॐ ७५

ततश्चतत्तैतस्फूर्तिरित्याह तदेति वहिर्दर्शनादिना अंतरंस्मृत्यादिभीगतात्मातस्य इषुकरणेदत्तचित्तः भेरीघोषै
र्नृनिकेव्रजंतंनृपतिमपिनवेदतद्वत् १३ सर्पाच्छिक्षितमाह एकचारीति योगिसंसदस्यायित्यागिकुमारीगुरुः ज
नसंत्यागेसर्पः सयथाजनाच्छंकिमानएकाकीविचरतिनियतनिकेतरहितश्चसदाप्रमत्तश्च एकांतवासीचआ
चारैर्गतिभिः सविशेषानिर्विशेषावेतिनलक्ष्यतेच असहायश्चमितिभाषीचतद्वत् मुनिर्वर्ततेइत्यर्थः किंचगृहारं

तदेवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्बहिरंतरंवा यथेषुकारोनृपतिंव्रजंतमिषौ
गतात्मानददर्शपार्श्वे ॥१३ एकाचार्यनिकेतःस्यादप्रमत्तोगुहाशयः अलक्ष्य
माणआचारैर्मुनिरेकोल्पभाषणः १४ गृहारंभोतिदुःखायविफलश्चाध्रुवात्म
नः सर्पःपरकृतंवेश्मप्रविश्यसुखमेधते १५ एकोनारायणोदेवःपूर्व
सृष्टंस्वमायया संहृत्यकालकलयाकल्पांतइदमीश्वरः १६ राम

भवति अध्रुवात्मनः नश्वरदेहस्यसुखंयथाभवति तथावर्द्धते १५ कारकसामग्रीनिरपेक्षात्के
वलादीश्वराद्विश्वसृष्टिसंहारादिकारिणाभिन्नोनेनमयासंभावितावितिवक्तुमथ
संहारप्रकारमाह एकइतिसार्धत्रयेणएकः कारकनिरपेक्षः पूर्वसृष्टमिदंजगत्
कालकलयाकालशक्त्यासंहृत्य १६ नमोभगवतेवासुदेवाय ॥ राम ॥

भा०ए०
टी०
३६

एकएवाद्वितीयः सजातीयविजातीयभेदशून्योभूत्कारणभूतासुसत्वादिशक्तिष्वपिसाम्यंनीतासुसतीषु १७
गुणसाम्यंप्रधानंतदुपाधिः पुरुषस्तयोरीश्वरः परावराणांपरेब्रह्मादयः अपरेअन्येचमुक्ताजीवाः तेषांपर
मःप्राप्य आस्तेकुतः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः तत्रहेतुः केवलेतिनिर्विषयः स्वप्रकाशः आनंदानां
संदोहः सपरमानंदइत्यर्थः कुतः निरुपाधिकः ततः केवलादेवसृष्टिंदर्शयतिकेवलेनात्मानुभावेनकालेनस्व
रूपेक्रियाशक्तिप्रधानेमहत्तत्वंसृजति जीवसंसारहेतुभूतेसूत्रेतस्यहेयत्वेमाभैरितिसंबोधयति १९ अरिंदमअ

एकएवाद्वितीयोभूदात्माधारोखिलाश्रयः कालेनात्मानुभावेनसाम्यंनीतासु
शक्तिषु १७ सत्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः परावराणांपरमआस्तेकै
वल्यसंज्ञितः १८ केवलानुभवानंदसंदोहोनिरुपाधिकः केवलात्मानुभा
वेनस्वमायांत्रिगुणात्मिकां १९ संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम तामा
हुःत्रिगुणव्यक्तिंसृजंतींविश्वतोमुखं २० यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपु
मान् २१

रीन् संगादीन्दमयितुंसमर्थः सूत्रस्यैवव्यक्तिशब्देनोच्यमानस्यतामितिस्त्रीलिंगेनपरामर्शः त्रिगुणव्यक्तिं
गुणत्रयस्यकार्यंअतएवविश्वतोमुखंनानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंतीत्रिगुणकार्यस्यसूत्रसंज्ञायां
कारणमाह यस्मिन्नितिकारणभूतेसूत्रमहद्रूपेयस्मिन्निदंविश्वंप्रोतंग्रथितं वायुर्वैगौतमतत्सूत्रंवायुनावैगौतमसू
त्रेणायंचलोकः परश्चलोकःसर्वाणिभूतानिसंदृब्धानीतिश्रुतेः येननवायुनाप्राणरूपेणजीवःसंसरति २२ ॥ ठो ३६

तदेवशिक्षितमर्थमाह हृदयाउर्णांवक्त्रतः वक्त्रेणसंतत्यप्रसार्यविहृत्यक्रीडित्वा भगवद्ध्यानपरायणेन त
त्सारूप्येनचित्रमिति पेशस्कृतोभ्रमरविशेषान् ध्यानमित्याहयत्रयत्रेति २२ सकलंएकाग्रकुड्यांवेशितः नि
रुद्धः भयेनध्यायन् सात्मतांतत्सारूप्यंसात्मतामितीतिपाठेत्वापत्ता पूर्वरूपमसंत्यजन्नित्यस्याभिप्रायः य
दातेनैवदेहेनान्यसारूप्यंदृश्यते तदाकिंवक्तव्यंदेहान्तरेणसारूप्यंघटतइति २३ स्वदेहादेवशिक्षितमाह

यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः २१
यत्रयत्रमनोदेहीधारयेत्सकलंधिया स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्स्वरूपतां २२
२ कीटःपेशस्कृतंध्यायन्कुड्यांतेनप्रवेशितः यातितत्सात्मतांराजन्पूर्वरूपमसंत्यजन् २३
एवंगुरुभ्यएतेभ्यः एषामेशिक्षितामतिः स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो २४
देहोगुरुर्ममविरक्तिविवेकहेतुर्बिभ्रत्स्मसत्वनिधनंसततार्त्युदर्कं तत्वान्यनेनविमृशा
मियथातथापिपारक्यमित्यवसितोविचराम्यसंगः २५ राम राम ॥

स्वात्मेति २४ आत्मनोदेहात्शिक्षितांतं गुरुत्वेहेतुः विरक्तिर्विवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्वनिधनं
उत्पत्तिविनाशौविभ्रत्स्म किंचसततंसंततं आर्त्युदर्कंदुःखमेवोत्तरोत्तरफलंविभ्रत् यद्वासततार्तिरेव उद
र्कउत्तरफलंयस्यतत्सत्वनिधनंविभ्रत् विवेकहेतुत्वमाह तत्वानीतियथायथावत् एवंतूपकारित्वेपिदेहे
नैवावस्थाकर्तव्येत्याह तथापीतिपारक्यंश्वसृगालादिभक्ष्यमितिनिश्चितवान् २५ ॥

भा॰ए॰ टी॰ ९७

ततन्तास्तुदर्क ... तोदेशप्रपंचयति जायेतिद्वाभ्यां यस्य देहस्य प्रियं चिकीर्षया भोगसंपादनेच्छया जाया
दिवर्गान्वि ... तन्वन् पुष्णाति पुरुषः कथंभूतः कृच्छ्रं यथा भवति तथा अवरुद्धानि संचितानि धनानि य
स्य सः अयेन सः देहविशेषणं वा स देहः स्वांते स्वस्यायुर्येति अवसीदति नश्यति किंच देहनाशेपि न दुःखस
माप्तिरित्याह अस्य देवहस्य देहांतर बीजं कर्म सृष्ट्वेति वृक्षस्येव धर्मो यस्य सः २६ किंच जिह्वेति अमुं देहेन द

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान् पुष्णाति यत्प्रि
यचिकीर्षया वितन्वन् स्वांते सकृच्छ्रमवरुद्धधनः
स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा २६ जिह्वै
कतोमुमपकर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्र
वणं कुतश्चित् घ्राणोन्यतश्चपलदृक् क्व च कर्मशक्तिर्ब
ह्व्यः सपत्न्य इव गेहपतिं लुनंति २८ राम ॥

भिमानिनं पुरुषं वा एकतः रसं प्रति जिह्वा अपकर्षति आकर्षति कर्हि कदाचित्तर्षा पिपासा जलं प्रति शिश्नो
व्यवायं प्रति त्वक् स्पर्शं प्रति उदरमन्नमात्रं प्रति श्रवणं शब्दं प्रति घ्राणो गंधं प्रति चपलदृक् रूपं प्रति क्वचित्स्व ॐ
स्वविषयं प्रति कर्मशक्तिरन्यदपि कर्मेंद्रियं लुनंति त्रोटयंति २८ राम राम ॥ ॥ ९७

तदेवंदेहोगुरुरित्यादित्रिभिः विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्यदेहस्यातिदुर्लभत्वंदर्शयन्नीश्वरानि॰
ष्टंविधनेस्वहेतुनिद्राभ्यां पुराणिशरीराणिपुरुषंदेहंब्रह्मणोवलोकायअपरोक्षायधिषणाबुद्धिर्यस्मिंस्तमुक्तं
तासामयोहषीप्रियेतिश्रुतिः पुरुषत्वेवाविस्तारमात्मेत्यादिनयथाताभ्योगामानयताअब्रुवन् नवैनोयम
लमितिताभ्योअश्वमानयन्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयताअब्रुवन् सुकृतंवतेतिच २८ त
स्माद्बहूनांसंभावानांजन्मनामंतेमानुष्यंअनित्यमप्यर्थदंपुरुषार्थप्रापकंदैवाल्लब्ध्वा अनुमृत्युअनन्तरितं

सृष्ट्वापुराणिविविधान्यजयात्मशक्त्यावृक्षान्सरीसृपपशून्खगदंशमत्स्यान् तैस्तैर
तुष्टहृदयःपुरुषंविधायब्रह्मावलोकधिषणंमुदमापदेवः २८ लब्ध्वासुदुर्लभमि
दंबहुसंभवान्ते मानुष्यमर्थदमनित्यमपीहधीरः तूर्णंयतेतनपतेदनुमृत्युयावन्निः
श्रेयसायविषयःखलुसर्वतःस्यात् २९ एवंसंजातवैराग्योविज्ञानालोकआत्मनि वि
चरामिमहीमेतांमुक्तसंगोनहंकृतिः ३० ॥

तदंमृत्युर्वोयस्यतत् यावन्नपतेत्तावदेवतूर्णंशीघ्रंनिःश्रेयसाययतेत नविषयः पुनःसर्वतःपश्वादियो
निष्वपिस्यादेव २९ तदेवंदेहोःपोपादेयविवेकंवहुधानिरूप्येदानीं यदुक्तोत्वंतुकल्पःकविर्दक्षः इत्यादि
तत्रोत्तरमाह एवमिति एवंवहुभ्योगुरुभ्यः शिक्षितेनविशिष्टेनज्ञानेनैवालोकःप्रदीपोयस्यसः सन्नात्मने
वाआत्मविशेषणे आत्मनिस्थितेनवमहींविचरामि ३० ९म कृस्न ॥ ॥

भा०ए० ननुकिंबहुभिर्गुरुभिः नहिस्वेनकेनचद्गुरुः अमुखैर्वहुवोगुरव आस्थितास्तत्राह नह्येकस्मादितिबहुधास
टी० प्रपंचनिरूपंचमेदादिभिः अयंभावः नैतेपरमार्थोपदेष्टारोगुरवः किंत्वन्वयव्यतिरेकाभ्यां आत्मन्यसंभावना
३८ दिमात्रवर्तकाः एवंचबहुत्वेयुक्तमेवेति ज्ञानप्रदंतुगुरुमेकमेववदपति सदभिदंगुरुंसुशानमुपासीनेनेति
नतूक्तं तस्माद्गुरुंप्रपद्येतजिज्ञासुः श्रेयउत्तममिति ३१ विप्रोदत्तात्रेयः योगादिभासकरुमर्यादयामोक्तैः सहयाद्या
इत्युक्तवान् यथागतेनदेवहूत्याययविन्यर्थः ३२ भगवान्स्वीयंब्रह्मविकुलमितिमुत्थायानेनः पूर्वेषामेव

नत्येकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलं ब्रह्मैतदद्वितीयंवै
गीयतेबहुधर्षिभिः ३१ श्रीभगवानुवाच इत्युक्त्वासयदुंविप्रः
तमामंत्र्यगभीरधीः वंदितोभ्यर्थितोराज्ञा ययौप्रीतोयथागतं ३२
अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः सर्वसंगविनिर्मुक्तःस
मचित्तोबभूवह ३३ इतिभागवतेमहापुराणेएकादशस्कंधे
राम ॥ नवमोध्यायः ॥ राम ॥

जयति अत्रसंग्रहश्लोकः कपोतमीनहरिणाकुमारीगजपन्नगाः पतंगाःकुररःचाहिर्भृंग्यार्भोगुरवोमताः म
धुकृन्मधुहर्तोचपिंगलाचद्वयोस्त्रयः उपाधेयार्थविज्ञानेशेषाः पृथ्व्यादयोमताः तदेवानरभेदभेदस्तुतत्रतत्रस्फु ॐ
टीकृतः अथावधिनयेचाहनचाहावीरितःक्रमात् ३३ इतिश्रीभागवतेभावार्थदीपिकायांनवमोध्यायः ९ ॥ ३८

चतुर्विंशानिमूर्वीक्ष्यालब्धसंभवनाभवः उद्धवस्यात्मतत्त्वाज्ञेसाधनोक्तिरतः परंदशमेदेहसंबंधात्संसृतिर
नात्मनःस्वतः इत्येतद्वर्णयामासमतान्तरनिरासतः तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकेज्ञानायादित्
आरभ्यसाधनान्युपदिशतिभगवान्मयेति मयापंचरात्रादियुक्तेष्वेस्वधर्मेषुप्रवहितः अप्रमत्तःसन्तदवरो
धेनवर्णाश्रमाचारमनुतिष्ठेत् १ कथमकामात्मनासंभवतितत्राह अन्वीक्षितेनेतिस्वधर्मेविशुद्धचित्तःसन्दे
हिनोविषमेषुसत्यत्वाभिनिवेशेनयेसर्वेआरंभाःतेषांफलवैपरीत्यंपश्येत् एवंफलवैपरीत्यादकामःस्यात् २

ज्ञानस्य तत्त्व

श्रीभगवानुवाच ॥ मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः वर्णाश्रमकुलाचारमकामात्मास
माचरेत् १ अन्वीक्षेतविशुद्धात्मादेहिनांविषयात्मनां गुणेषुतत्त्वध्यानेनसर्वारंभविपर्य
यं २ सुप्तस्यविषयालोकोध्यायतोवामनोरथः नानात्मकत्वाद्विफलःतथाभेदात्मधीर्गुणैः ३
निवृत्तंकर्मकुर्वीतप्रवृत्तंमत्परस्त्यजेत् जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनां ४ राम ॥

किंचकाम्यविषयाणांमिथ्यात्वादपीत्याह सुप्तस्येतिविफलः अर्थशून्यः अत्रैवंप्रयोगःइंद्रियैर्वाबाह्यैःना
नाबुद्धिःसाविफलानानात्मकत्वात् ऐंद्रियकत्वाच्चमनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थीनप्रवर्तेत
तत्रकाम्यनिषिद्धयोःनित्यनैमित्तकेकुर्यात् प्रत्यवायजिहासयाइतिस्मृतिः अतःप्रवृत्त्यंकाम्यंकर्मत्यजे
त्निवृत्तंनित्यनैमित्तिकमेवकुर्यात् आत्मविचारेतुसम्यक्प्रवृत्तोनित्यकर्मचोदनामपिनाद्रियेतनित्यनैमित्त

भा॰ ए॰
टी॰
२५

किंतु यमान् अहिंसादीन् अभीक्ष्णमादरेण सेवेत शौचादीन् तु नियमान् क्वचित् यदा शक्तिस्तदा मत्परतानावि
रोधेन मया द्वादश नियमा उक्तास्तेन विशेषाध्याये वक्ष्यति किंच यमेवादृष्टं पतित्यज्य गुरुमुपासीनेत्याह मदभि
ज्ञमिति मदात्मकं मद्रूपं ५ गुरुसेवकस्य धर्मानाह अमानीति दक्षः अनलसः निर्ममः जायादिषु ममताशू
न्यः गुरौ तु दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि तेया
नि ६ ननु स्वजायादिषु कथं निर्ममः स्यात् तत्राह जायेति उदासीन्यहेतुं विवेकं दर्शयति आत्मनोऽर्थं प्रयोज

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकं ५ अमान्य
मत्सरो दक्षो निर्ममो दृढसौहृदः असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षे
त्रस्वजनद्रविणादिषु उदासीनः समं पश्यन् सर्वेष्वर्थमिवात्मनः ७ विलक्षणः स्थूलसूक्ष्माद्दे
हादात्मेक्षिता स्वदृक् यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ८ राम ॥

नं सर्वत्र सममिव पश्यन्निति अयं भावः सर्वदेहेष्वात्मन एकत्वात् जायादिदेहेष्विव स्वदेहे आत्मनोऽर्थः सुखादि
सममेव केन विशेषेणेत्येवं ममत्वाभिनिवेशः इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति ७ अहो कोऽसौ देहव्यतिरिक्त आ
त्मा यस्यैक्याद्दृष्टिः सर्वेषु समः स्यात् तत्राह विलक्षण इति स्थूलसूक्ष्मदेहद्वयादात्मान्यः यतो विलक्षणो द्वेधा वैल
क्षण्यं दर्शयति ईक्षिता स्वदृगिति द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडात् विलक्षणयोरन्यत्वे दृष्टान्तः गें
यथाग्निर्दाहकः प्रकाशकश्चिद्दाह्यात् प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ८ राम ॥ ॥ २५

अनेनैव दृष्टान्तेन नित्यत्वानादित्वविभुत्वैकत्वादयो सिद्धा इत्याह निरोधे इति यथा दारुण्यन्तः प्रविष्टोग्निस्तत्कृ
तान्नाशादीन् प्राप्नोति नन्तु स्वतो नाशादिमान् एवं देहगुणानन्तिनित्यत्वादीन् देहान्तरो नित्यादिस्वरूपो ह्यात्मा
नुभवति ततस्तु नित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ९ नन्वग्ने दारुसंगात्तद्धर्मभाक्त्वं युक्तं न त्वात्मन
स्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधं बंधे वा कुतः तन्निरासः तत्राह योसाविति पुरुषे स्वेश्वरस्याधीने मायागुणैः
योसौ स्वत्वमः देहोयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारः तन्निबंधनः तदध्यासकृतः हि यस्मात् एवं
तस्मादात्मविद्या तन्निवर्तिकेत्याह आत्मनो विद्या वित्तानतस्य छिनत्ति छेत्ता अच्छिदिति वा पदच्छेदः १० यस्मा

निरोधोत्यन्तमग्नेरगुणग्रहस्त्वानानात्वं न कृतानन्तुगुणान् अन्तःप्रविष्ट आदन्त एवं देहगुणान्परः ९ योसौ
गुणैर्विरचितो देहोयं पुरुषस्य हि संसारस्तन्निबंधोयं पुंसो विद्याच्छिदात्मनः १० तस्माज्जिज्ञासया
त्मानमात्मस्थं केवलं परं संगम्य निरसेदेन हस्तु बुद्धिं यथाक्रमं ११ आचार्योरणिराद्यः स्यादन्तेवास्यु
त्तरारणिः तत्संधानं प्रवचनं विद्यासंधिः सुखावहः १२ राम

देवं तस्माज्जिज्ञासया ... सविचारेणात्मस्थो आत्मनि कार्यकारणसंघात एवस्थितं सम्यक्कृत्वा त्वा एतत्तूपनास्मि
न्देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत् ११ गुरोर्लब्धा विद्या विद्या तत् कार्यं निरसनं तत्त्वमेति
स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेन निरूपयति आचार्य इति आद्यः उत्तरः अधरः तत्संधानं तयोर्मध्यमेम
थनकाष्ठं प्रवचनमुपदेशः विद्यान्संधिः संयोगो भवन्नाग्निरिव तथा च श्रुतिः आचार्यः पूर्वरूपमन्तेवास्युत्तररू
राम ॥ पं विद्यासंधिः प्रवचनं संधानमिति १२ ॥

भा॰ टी॰ ए॰

प्रतिसाहस्रमेवाह वैशारदीति विशारदोतिनिपुणः तेन शिष्येण प्राप्तेन गुरोरुपदिष्टा वा अतिविशुद्धा
बुद्धिः गुणकार्यरूपां मायां निवर्तयति तदात्मकमेव हि विश्वं जीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमि
न्निरिन्धनः तस्मात्कार्येण कारणेन विद्यया च व्यवधानाभावात् साक्षात्परमानन्दरूपो भवति १३ एवं तावत्
स्वप्रकाशज्ञानस्वरूपो नित्य एक एवात्माकर्तृत्वादयश्च धर्मास्तस्य देहोपाधिकाः तद्व्यतिरिक्तं च सर्वमनित्यं माया
मयं चातः सर्वतो विरक्तः सञ्ज्ञानमात्रेणैव मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेवं श्रुतिसमन्व
येनानिर्णीतेऽप्यर्थे मतान्तरविरोधेन संदेहो माभूदिति तन्मतं निराकर्तुमुद्भावयति अथेति अथ यमन्यसे एषां जी

वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्य
समिद्यथाग्निः १३ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः नानात्वमथ नित्यत्वं लोककालागमा
त्मनाम् १४

वात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमनीया मन्यन्ते अहंप्रत्ययवेद्य एवात्मा ।
स च शरीरभिन्नः कर्ता भोक्ता रूपश्च न तु तत्स्वरूपभूतो निर्विकार एव परमात्मास्तीति यथाहुः अहंप्रत्ययवि
ज्ञेयो ज्ञातव्यः सर्वदैव हीति तथा वैराग्यं च न संभवति तथा हि भोगस्यानानामनित्यत्वाद्धि वैराग्यं भवेत् ।
भोगकालस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वानन्त्येन नास्तीत्याह अथ नित्यत्वं लोककालाग ५०
मात्मनां मन्यस इति १४ राम राम कृष्ण राम ॥ राम राम॥

नचभोगपानांविच्छेदान्मायामयत्वाद्वैराग्यंस्यादित्याह सर्वभावानांस्रक्चंदनादीनांसंस्थास्थितिःऔत्पत्तिकीप्र
वाहरूपेणनित्यानथाचवदंति नकदाचिदृशंजगदिति अतस्तत्कर्ताकश्चिदीश्वरोपिनास्तीतिभावः किंचयथा
यथाखहे ननुमायामयीत्यर्थः नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्तीत्याह तत्तदिति घटपटाद्याकारभेदे
नधीर्जायते अतोनित्याभिद्यतेच अयंगूढोभिप्रायः नहिनित्यज्ञानस्वरूपआत्माअपितुज्ञानपरिणामवान्
नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरूपस्यननित्यत्वविरोधतइति अतोमुक्तौइंद्रियादि

नन्वसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा नत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ एवमप्यंग
सर्वेषांदेहिनांदेहयोगतः कालावयवतःसंतिभावाजन्मादयोसकृत् १६ अत्रापिकर्मणांकर्त्तु
रस्वातंत्र्यंचलक्ष्यते भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजेत् १७ नदेहिनांसुखंकिंचिद्विद्यते
विदुषामपि तथाचदुःखंमूढानांवृथाहंकरणंपरं १८

रहितस्यपरिणामासंभवाज्जडत्वेनतत्प्राप्तेरपुरुषार्थत्वात् प्रवृत्तिरेवश्रेयसीननिवृत्तिरिति १५ तत्रतावदुक्तमेवा
कृत्यवैराग्यपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति एवमपीत्यादिनालोकानांलोकपालानांइत्यतःप्रा
क्तनेनग्रंथेन अंगहेउद्धव कालावयवतः संवत्सरादिरूपात् १६ अत्रापीतिस्वोत्प्रपद्येदुष्कर्मणोदुःखभोगस्यवा
संभवादित्यर्थः १७ ननुयेसम्यक्कर्मकर्त्तुंजानंतितेसुखिनएवयेतुनजानंतितएवदुःखिनइवचेत्तत्राह नेतिवि
दुषामपिक्वचित्सुखंनविद्यते अतोवयंकर्मकुशलत्वात्सुखिनइतितेषांकेवलंवृथैवाहंकारइत्यर्थः १८ ॥

भा॰ए॰ टी॰ ५१

अंगीकृत्याप्याह यदीति तेयोगं उपायेन विदुर्यथा साक्षात्मृत्युर्न प्रभवेत् १९ तथापि यावज्जीवं सुखं भविष्यती
ति चेत्तन्नेत्याह कोन्वितियतः अंतिके वर्तमानो मृत्युर्न तुष्टिं ददाति आघातं वधस्थानं प्रति २० एवमस्मिंल्लोके
सुखं नास्तीत्युक्तं लोकांतरेपि तथैवेत्याह श्रुतमिति श्रुतं स्वर्गादि तदपि दृष्टवद्दुष्टं स्पर्द्धा परसुखासहनं असूया परगु
णेषु दोषाविष्करणं अत्ययो नाशः व्ययो पतनं तैर्दुष्टं तस्य यो नाशः अत्ययो अन्यस्यातिशयः तं दृष्ट्वा तदप्राप्त्या
दुःखमित्यर्थः किं च बहवो अंतराया वैगुण्यादिरूपा विघ्ना यस्मिन्कामे सुखे तस्य भावः तत्त्वं तस्मात्कृषिर्यथा बहु

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १९ कोन्वर्थः सुख
यत्येनं कामो वा मृत्युरंतिके आघातं नीयमानस्य वध्यस्येव न तुष्टिदः २० श्रुतं च दृष्टवद्दुष्टं स्पर्द्धासू
यात्ययव्ययैः बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलं २१ अंतरायैरविहितो यदि धर्मः स्वनुष्ठितः
तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २२ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः भुंजीत दे
ववत्तत्र भोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचिते शुभ्रे विमान उपगीयते गंधर्वैर्विहरन्मध्ये देवी
नां हृद्यवेषधृक् २४ स्त्रीभिः कामगयानेन किंकिणीजालमालिना क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः
२५

विघ्नास्तद्वत् बहुप्रयत्नेन प्राप्तमपि निष्फलं २१ विघ्नवैगुण्यादिअभावमेवमंगीकृत्यापि नाशदुःखं दुःखपरिहृ
तमित्याह अंतरायैरिति पंचभिः निर्जितं साधितं २२ यज्ञैर्देवता इंद्रादिरूपा इष्ट्वा २३ स्वपुण्यैरुपचिते सर्वभोगसं
पन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते २४ कामेनेच्छया गच्छता विमानेन किंकिणीजालमालिना हृद्यवेषेति ५२
कांतस्वहृष्टशोभिना सह स्त्रीभिः सुराक्रीडेषु क्रीडन् आत्मपातं न वेद २५ राम ॥

कालेनचालितः पातितः २६ प्रवृत्तिर्द्विविधाविध्यनुसारेणकाम्यकर्मणिवातल्लंघनेनचाधर्मेवातत्रकाम्यप्र
वृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गतिमाह यदीतियदिवेत्यन्वयः अजितेंद्रियत्वात्कामात्मा अतः कृपणः अतो
लुब्धोभोगतृष्णाकुलः अतःस्त्रैणःस्त्रीलंपटः तदर्थंविहिंसकः २७ किंचदुःखजनप्रलोभितोधनाद्यर्थंपशून्
विधिनाहत्वातमःस्थावरतांयाति २८ एवंकर्मसुप्रवृत्तस्यनसुखेनचनिष्कृतिरित्युपसंहरतिकर्माणीति २९

तावत्सप्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते क्षीणपुण्यःपतत्यर्वागनिच्छन्कालचालितः २६ यद्यधर्म
रतःसंगादसतांवाजितेंद्रियः कामात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः २७ पशूनविधिनालभ्य
प्रेतभूतगणान्यजन् नरकानवशोजंतुर्गत्वायात्युल्बणंतमः २८ कर्माणिदुःखोदर्काणिकुर्वन्देहे
नतैःपुनः देहमाभजतेतत्रकिंसुखंमर्त्यधर्मिणः २९ लोकानांलोकपालानांमद्भयंकल्पजीविनां
ब्रह्मणोपिभयंमत्तोद्विपरार्द्धपरायुषः ३०

तथापिलोकानांनित्यत्वादमर्त्यधर्मत्वाच्चलोकपालानांसुखमस्तीतिचेत्तत्राह लोकानामिति द्वौपरार्द्धौपर
मायुर्यस्यतस्यब्रह्मणोपितथाचश्रुतिः भीषास्माद्वातः पवतेभीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धाव
तिपंचमः इति अतःप्रवृत्तिमार्गस्यैवानर्थहेतुत्वाद्विरक्त्याज्ञानेनोनिवृत्तिरेवमत्कैनेतितात्पर्यार्थः ३० ॥

एतेनैवस्वयमीश्वरत्वाविष्कारेणेश्वराभावांगीकारः परित्यक्तः अन्यदपिश्रीधराद्युक्तं सर्वमंगीकृत्यैवनिरसकरोतिच
भा॰ प॰ तुर्भिः नत्वयदुक्तंकर्तृभोक्तृरूपएवात्मेतितन्निराकरोतिगुणाइतिगुणाइंद्रियाणिकर्माणिसृजेतितत्वात्मा
टी॰ श्रात्मैवेंद्रियाणिप्रवर्तयत्कर्माणिकरोतीतिइतिचेन्नेत्याहगुणाइतिगुणाःसत्वादिःगुणानींद्रियाणिअनुसृत्यतेप्र
५२ वर्तयतितत्वात्मनः अतःकर्तृत्वेनावत्वास्तिभोक्तृत्वमप्यौपाधिकमित्याह जीवस्त्विति गुणसंयुक्त इंद्रियादि

गुणाःसृजंतिकर्माणिगुणोनुसृजतेगुणान् जीवस्तुगुणसंयुक्तोभुंक्तेकर्मफलान्यसौ २१ यावत्स्या
द्गुणवैषम्यंतावन्नानात्वमात्मनः नानात्वमात्मनोयावत्पारतंत्र्यंतदैवहि २२ यावदस्यास्वतं
त्र्यंतावदीश्वरतोभयं यएतत्समुपासीरंस्तेमुह्यंतिशुचार्पिताः २३ ॥ कृष्ण ॥

संयुक्तःउक्तइत्यतआह अस्तीनेषुअहंकारवानित्यर्थः २१ यच्चोक्तमात्मनोनानात्वंतदप्यौपाधिकमित्या
ह यावत्स्यादितिगुणानांवैषम्यंअहंकारादिकार्यरूपेणत्वात्मनः एकत्वेकथंपारतंत्र्यमुक्तंकथंवालोकपा
लादीनामपिभयमित्युक्तंतत्राह नानात्वमिति २२ यच्चपरकर्माभिप्रेतंप्रवृत्तिरेवश्रेयसीतितत्राहयएतदिति गं॰
एतद्गुणवैषम्यंतत्कृतंभोगंचेत्यर्थः उपासीरन् स्वर्लोकादीनामनित्यत्वात् शुचार्पिताःप्रेताःसंतोमुह्यंति २३ ५२

नकेवलमनित्यमात्रंकिंतुमायामपीत्याह कालइतिस्वभावोवस्त्वादिपरिणामहेतुः धर्मस्तद्योगकारणंगुणव्यतिक
रेमायायांसत्यांमामेवप्राहुः नतुमद्व्यतिरिक्ताःसंतिततोनिवृत्तिरेवमुक्तिहेतुत्वात् श्रेयसीतिसिद्धंएवंतावदेक
एवात्मानस्यचगुणकार्यदेहसंबंधकृतःसंसारः आत्मज्ञानाच्चमुक्तिरित्युक्तंविलक्षणःस्थूलसूक्ष्मादित्यादिना
देवचमतांतरनिरासेन दृढीकर्तुं अथैवमित्यादिनातत्रप्रश्नत्रिगुणेष्वितित्रयमर्थः गुणेषुसत्स्वात्ममुक्तिःसत्त्वेववाआ
येज्ञानसाधनाभावात् नमुक्तिः द्वितीयेचगुणेषुवर्तमानोपितत्कार्येदेहजेषुसुखादिषुनबध्यतेकथंतयापिनेराका
कर्मस्तु

कालआत्मागमोलोकःस्वभावोधर्मएवच इतिमांबहुधाप्राहुर्गुणव्यतिकरेसति ३४ उद्धवउवाच गु
णेषुवर्तमानोपिदेहजेष्वनपावृतः गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो ३५ कथंवर्तेतविहरेत्कैर्वा
ज्ञायेतलक्षणैः किंभुंजीतोतविसृजेच्छयीतासीतयातिवा ३६ एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर
नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः ३७ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेदशमोध्यायः १०

प्रावृतत्वान्नबध्यतेइतिचेन्नहिवंधोनसंभवतीत्याह अनपावृतः कथंवध्यतेइतियदितुसत्त्वेवनदेहेका
रेणवध्यतेनतर्हितस्यावमुच्यतेइतिमतेनर्हितत्कथंतानत्यमितिप्रश्नत्रिवद्धोमुक्तोवाकथंवर्तेतेत्यादिकिंभुंजी
तीकथंभुंजीतेत्यर्थः ३६ एतद्विषयेप्रश्नंकिंचएकएवात्मानादिगुणसंबंधान्नित्यबद्धः मुक्तेर्जन्यत्वेस्यानित्यत्व
प्रसंगात् नित्यमुक्तइत्यप्यंगीकार्यस्यात् तत्रमेभ्रमोभवतीत्याहनित्यबद्धइति ३७ इतिश्रीभावार्थदीपिकायांदश

एकादशेतुबद्धानांमुक्तानांचाथलक्षणं साधूनांचतथाभक्तेर्लक्षणंहरिणेरितं १ नित्यबद्धोनित्यमुक्तए
कएवेतिमेभ्रमः इतियदुक्तंतत्किंवस्तुतोविरोधात् प्रतीतितोवानाद्यः बंधमोक्षयोर्वास्तवत्वाभावादित्याहब
द्धोमुक्तइतिद्वाभ्यां आत्माबद्धोमुक्तश्चमेगुणतः मदधीनत्वाद्गुणोपाधिकः नवस्तुतः नन्वौपाधिकत्वेपितुंडुल
पाकादिवद्वास्तवत्वंकिंनस्यात्तत्राह गुणस्यमायामूलत्वाद्बंधनंनास्तिअतएवमोक्षश्चनास्तीति ननुकथंसर्वं

श्रीभगवानुवाच बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः गुणस्यमा
यामूलत्वान्नमेमोक्षोनबंधनं १ शोकमोहौसुखंदुःखंदेहापत्तिश्च
मायया स्वप्नेयथात्मनःख्यातिः संसृतिर्नतुवास्तवी २ राम ॥

प्राणस्वविरुद्धमुच्यतेनेनत्राह इतिमेव्याख्येति एवंमत्कृतोनिर्णयः अलमितिकृतनैकैरित्यर्थः अथवैवमन्वयः आ
त्माबद्धोमुक्तइतिव्याख्याउक्तिः सामेगुणतः सद्गुणपारतंत्र्यात् अत्रहेतुत्वेनगुणानियंतरिक्षस्वास्मिंस्तद्भ्रांतिरि
कमाह अतएवनमेबंधनंमोक्षोवेति अन्यत्समानं १ एवंकारणभूतगुणानांमायामयत्वान्नकार्यंसंसृतिर्मा
तिप्रपंचयति शोकमोहाविति यथास्वप्नः आत्मनःबुद्धेरेवख्यातिर्विवर्तस्तद्वत् २ राम कृष्ण ॥

ग्रतो वस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकी घटतइत्याह विद्याविद्ये इति तन्त्येन मोक्षबंधावाभ्यामिति तन्नूश
क्तीः उक्तः सो मायाविनिर्मितेमायाख्यशक्तिरूपत्वात् बंधमोक्षकरीत्येकवचनं द्विवचनार्थे ननु तत्कार्यत्वे बंधमोक्षयो
रनादित्वनित्यत्वे न स्यातां न स्याद्ये अनाद्ये अतो यावद्विद्याप्रवर्तयामिति तावद्बंधः यदा विद्योदयस्तदा मोक्षः स्फु
रतीत्यर्थः तथा च स्कंदपुराणे बंधको भवपाशेन भवपाशाच्च मोचकः कैवल्यदः परं ब्रह्म विष्णुरेव सनातन इ
ति तव शरीरिणामिति बहुवचननिर्देशाद्विषयभेदेनाविरोध उक्तः इति ३ भ्रांतिं व्यावर्तयन् बंधमोक्षव्यवस्थामु
पपादयति एकस्यैवेति हि किमात्माभेदात्तवापि बंधः नहि मर्योऽशस्य जीवस्यैवेति नन्वात्माभेदे जीवो नाम को न्यो

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ३ ए
कस्यैव ममांशस्य जीवस्यैव महामते बंधोस्याविद्ययानादिर्विद्यया च तथेतरः ४ ॥

स्ति एष्यक कर्यं च बंधमोक्षसुखदुःखादिव्यवस्थानत्राह ममांशस्य अयं भावः यथैकस्य चंद्रादेर्जलाद्युपा
धिना बिंबप्रतिबिंबरूपो भेदः यथा च तत्र जलकृताः कंपादयः प्रतिबिंबस्यैव यथा च तत्र प्रतिबिंबानामप्यु
पाधिभेदेन भेदादेकस्मिन् उदके भग्ने न तत्प्रतिबिंबस्यैव बिंबैक्ये नान्यगतस्य तथाविद्यायां प्रतिबिंबित
स्य मदंशस्य जीवस्यैव तत्कृतो बंधः तस्य चोपाधितो भेदात्तद्व्यवस्थेति तथा चाहुः यथैकस्मिन् घटाकाशे रजो
धूमादिभिर्युते न सर्वे संप्रयुज्यंते तथा जीवाः सुखादिभिः इति एतच्चानिरहस्यैः स्वबुद्ध्या निश्चेतव्यमिति संबो
धयति हे महामते इतरो मोक्षः ४ ॥ नमो भगवते वासुदेवाय ॥ राम राम ॥

नदेवंव्यवस्थामुपपाद्यकथंवर्तेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेतिनित्यवैलक्षण्यंद्विविधंजीवेश्वर
योरेकंजीवानांचैकंतत्रजीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरितिसार्धद्वयेनश्लोकानांतद्धर्मवतोएक
स्मिंधर्मिणिशरीरेनियम्यनियंतृत्वेनस्थितयोः ५ तदेवकथयति सुपर्णाविति पक्षिणाविवदेहात्पृथग्
भूतौसदृशौविषयद्रष्टृत्वात् सखायौवियोगादेकमत्याच्चयदृच्छयाअनिरुक्तयामाययाकृतनीडाविति वृ
क्षोदेहःऊर्ध्वमूलमर्वाक्शाखंयोवेदसप्रनीतिश्रुतेः ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययमितिस्मृतेश्चतत

अथवद्धमुक्तस्यवैलक्षण्यंवदामिते विरुद्धधर्मिणोस्तातस्थितयोरेकधर्मिणि ५ सुपर्णावे
तौसदृशौसखायौयदृच्छयैतौकृतनीडौचवृक्षे एकस्तयोःखादतिपिप्पलान्नमन्योनिरन्नोपिबले
नभूयान् ६ आत्मानमन्यंचसवेदविद्वानपिप्पलादोनतुपिप्पलादः योविद्ययायुक्सतुनित्य
बद्धोविद्यामयोयःसतुनित्यमुक्तः ७

तस्मिन्कृतंनीडंनिकेतनंहृदयरूपंयाभ्यांतौ तयोर्मध्येएकोजीवःपिप्पलान्नंपिप्पलोश्वत्थस्यदेहःतस्मिन्नदनीयं
कर्मफलमित्यर्थः खादतिभक्षयतिअन्यईश्वरोनिरन्नःअभोक्तापिनिजानंदतृप्तोबलेनज्ञानादिनाभूयानधिकः
श्रुतिश्चद्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशी
ति बलाधिक्यमेवाह आत्मानमिति अतःयोअविद्ययायुक्युक्तःसतुनित्यबद्धःयःअनादिबद्धःयस्तुविद्याप्र
धानःसतुनित्यमुक्तःमाययाअनावरकत्वात् आश्रयाव्यामोहकत्वाच्च ७ राम ॥ ॥ ॐ ४४

इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोपीति दशभिः विद्वान्मुक्तः संसारवशो न देहस्थोपि दे
हस्थोपि न भवति यथा स्वप्नादुत्थितस्स्मर्यमाणे स्वप्नदेहे स्थितोपि तत्रस्थो न भवति तत्कृतसुखदुःखाद्यभावात् तद्वत्
तथावस्थितः अदेहस्थोपि कुमतिः अविद्वान्देहस्थः तन्निमित्तसुखदुःखभाक् यथा स्वप्नदेहगत इति ८ अत्र हेतु
त्वेन वैलक्षण्यांतरमाह द्वाभ्यामिंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि यस्तु विद्वान् सः नाहं कुर्यामिदं अहं करोमीति मतिं

देहस्थोपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः अदेहस्थो
पि देहस्थः कुमतिः स्वप्नदृग्यथा ८ इंद्रियैरिंद्रियार्थेषु गु
णैरपि गुणेषु च गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्व
विक्रियः ९ दैवाधीने शरीरेस्मिन् गुणभाव्येन कर्मणा
वर्तमानोबुधस्तत्र कर्तास्मीति निबध्यते १० राम ॥

कुर्यादित्यर्थः कुतः गुणैर्गुणेषु गृह्यमाणेषु अत एव अविक्रियः रागादिशून्यः तदुक्तं गीतासु तत्त्ववित्तु महा
बाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तंत इति मत्वा न सज्जति ९ अबुधस्तु दैवकर्माधीनेस्मिन् शरीरे वर्त
मानः गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते कुतः कर्तास्मीत्यहंकारेण तदुक्तं तत्रैव प्रकृतेः क्रियमा
णानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इति १० राम राम ॥

भा॰ए॰
टी॰
५५

एतैस्त्रिभिः श्लोकैः कथं वर्तेतेत्यस्य प्रश्नस्योत्तरमुक्तं स्वशून्यो निरभिमानाच्च देहे वर्तेतेत्युत्तरमुक्तं भवति वि-
लक्षणेनरं वदन् किं भुंजीतेत्यादि प्रश्नोत्तरमाह एवमिति त्रिभिः अन्यगतमेव कर्म मा बध्नातीत्येवं विरक्तो
विद्वान् तथाविद्वान् शयनासनादिषु न बध्यते कुतः तत्र विषयेषु गुणानींद्रियाणि आदयन् भोजयन् त
त्साक्षित्वेन वर्तमानः ननु स्वयमदन्नपि न देवात्मनस्तत्राह प्रकृतिस्थोपीति सार्धेन यथा सर्वत्र स्थितमपि न

एवं विरक्तः शयन आसनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ११ न त
था बध्यते विद्वांस्तत्र तत्रादयन् गुणान् प्रकृतिस्थोप्यसंयुक्तो यथा खं सवितानिलः १२ वैशा
रद्येक्षयासंगशितया छिन्नसंशयः प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते १३ यस्य
स्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियां वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः १४

सज्जते यथा सविता जलेषु प्रतिबिंबितोपि यथानिलः सर्वत्र संचरन्नपि न दह्यते १२ असंगेन वैराग्येण शितया
तीक्ष्णया छिन्नाः संशयाभावनादयो यस्य सः नानात्वात् देहादिप्रपंचात् १३ कथं विरहेत् इत्यस्योत्तरत्वेन वै-
लक्षण्येनरमाह यस्य स्युरिति तद्गुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिः विरहन् मुक्त इत्यर्थः १४ ॥ ॐ
५५

एवं बद्धमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तं इदानीं केवलं तटस्थेन लक्षणैरित्यस्योत्तरं परैरप्युपलक्ष्यं वैल
क्षण्यमाह यस्यात्मेति त्रिभिः हिंस्रैर्दुर्जनैर्व्याघ्रैर्वा प्राणिभिः यस्यात्मा देहः पीड्यते यदृच्छया येन केनापि क्वचि
त् अर्च्यते वा सतः बुधस्तत्र न व्यतिक्रियत इत्यर्थः तदुक्तं याज्ञवल्क्येन यः कंटकैर्वितुदति चंदनैर्यश्च लिंप
ति अक्रुद्धोपरितुष्टश्च समस्तस्य च तस्य चेति १५ किंच साध्वसाधु वा कुर्वतो वदतो वा जनान् न स्तुवीत न च निं

यस्यात्माभिहिंस्यते हिंस्रैर्येन किंचिद्यदृच्छया अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः १५
न स्तुवीत न निंदेत कुर्वतः साध्वसाधु वा वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः १६
न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा आत्मारामोनया वृत्त्या विचरेज्जडवन्मुनिः १७
शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः १८

देत् यो लौकिकव्यवहारे विमुखः स मुक्त इत्यर्थः १६ अपि वा न कुर्यादिति यो दैहिकेष्वपि कर्मसूदासीनः स मुक्त
इतरो बद्ध इत्यर्थः १७ तान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञानव्यतिरिक्तानि यस्तु केवले शब्दब्रह्मण्येव निरतः पांडित्यमा
त्रेणाचीनतनुक्तैः साधनैः तदर्थनिष्ठो भवेत् तं निंदति शब्दब्रह्मणि निष्णातः पारंगतोपि परे ब्रह्मणि न निष्णा
यात् ध्यानाद्यभियोगं न कुर्यात् तस्य शास्त्रश्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अधेनुं चिरप्रसूतां १८

भा॰ए॰
टी॰
५६

एतदेवान्यदर्थ्यैर्निदर्शनैः प्रपंचयति गामिति दुग्धं तत इति दोहः यस्याः दुग्धो दोहेनोत्तरदेल्यो स्त्रियस्याः तामर्थशू
न्यां असतीं भार्यां कामशून्यां देहं पराधीनं प्रतिक्षणं दुःखहेतुं असत्प्रजां दृष्टासाधनशून्यां पुत्रं अतिर्थीकृतं भाग
मेपात्रे दत्तं वित्तं दुष्कीर्तिः दुरितानुपातिकं अंग हे उद्धव दुःखानन्तरं दुःखमेव यस्य सः रक्षति १९ मया हीनां वाचमि
त्युक्तं विवृणोति यस्यां मे जगतः शोधकं चरित्रं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपेण हेतुरित्यर्थः लीला
वतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म न स्यात् तां निष्फलां गिरं धीरो धीमान् न धारयेत् २० उक्तं ज्ञा

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया र
क्षति दुःखदुःखी १९ यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य लीलावतारेप्सितज
न्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः २० एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि उपारमेत वि
रजं मनो मय्यर्प्य सर्वगे २१ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं मयि सर्वाणि कर्माणि निरपे
क्षः समाचर २२ श्रद्धालुर्मत्कथाः शृण्वन्सुभद्रा लोकपावनीः गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः २३

न मार्गमुपसंहरति एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे
परिपूर्णे समर्प्य संधाय उपारमेत न किंचित्कुर्यात् न शास्त्रयोऽपि त्यमात्रेणेत्यर्थः २१ यद्यनीशः अशक्तः त
र्हि ब्राह्मणामिदं मन्नैव कृतार्थो भविष्यसीत्याह मयीति २२ मदर्पणेन कर्मभिर्विशुद्धसत्त्वस्यान्तरंगो भक्तिमा ॐ
ह श्रद्धालुरिति अभिनयन् स्वयमनुकुर्वन् ॥ २३ राम ॥ राम ॥ ५६

माचरन्सेवमानः २४ ननस्थानेनप्रकारेणमयिसत्संगलब्धेनलब्धयाभक्त्यासभक्तःमांउपासिताध्याता
भवतिसचध्यानशीलः सद्भिर्दर्शितंवैनिश्चितंसखेनैवमेपदंस्वरूपंप्राप्नोति २५ सत्संगलब्धयाभक्त्येत्युक्त
तत्रसतांभक्तेश्चविशेषंपृच्छतिसाधुरितिसाधवःस्वस्वमतिपरिकल्पिताःसंतिबहवःनवनुकीदृशाःसेम
तःभक्तिरपिबहुविधालोकेकीदृशीतुत्वय्युपयुज्येतसद्भिश्चनारदादिभिरादृताएतच्चकथ्यतां २६ इदंचा

मदर्थेधर्मकामार्थानाचरन्मदुपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४ सत्संगल
ब्धयाभक्त्यामयिमांसउपासिते सवैमेदर्शितंसद्भिरंजसाविंदतेपदं २५ उद्धवउवाच साधुस्तेउ
त्तमश्लोकमतःकीदृग्विधःप्रभोः भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता २६ एतन्मेपुरुषाध्यक्ष
लोकाध्यक्षजगत्प्रभो प्रणतायानुरक्तायप्रपन्नायचकथ्यतां २७ त्वंब्रह्मपरमंव्योमपुरुषःप्र
कृतेःपरः अवतीर्णोसिभगवन्स्वेच्छयात्तपृथग्वपुः २८ श्रीभगवानुवाच कृपालुरकृतद्रोहस्तिति
क्षुःसर्वदेहिनां सत्यसारोनवद्यात्मासमःसर्वोपकारकः २९ राम ॥ राम॥

निरन्तरंत्वय्येववक्तव्यमित्यैश्वर्यमाविष्करोति हेपुरुषाध्यक्षेत्यादिनाब्रह्मादिनियंतः २७ ब्रह्मेवत्वमितिव्यो
मवदसंगःयतः प्रकृतेःपरः स्वेच्छयाउपात्तंपृथक्परिमितंवपुर्येनसः २८ तत्रत्रिंशल्लक्षणैःसाधुनिरूपयतिकृ
पालुरितित्रिभिः कृपालुःपरदुःखासहिष्णुः सर्वदेहिनांकेषांचिदपिअकृतद्रोहः तितिक्षुःक्षमावान्सत्यसारः
सत्यंसारंस्थिरंबलंयस्यसः अनवद्यात्माअसूयादिरहितःसुखदुःखयोःसमःयथाशक्तिसर्वेषामुपकारकः २९ यथा

भा॰ए॰ टी॰ ४७

कामैरक्षुभितचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृ
ष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मुनिः मननशी
लः ३१ अप्रमत्तः सावधानः गंभीरात्मा निर्विकारः धृतिमान् विपद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासाशोकमो
हजरामृत्युषडूर्मयः एते जिता येन सः अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः अवंचकः
कारुणिकः करुणयैव प्रवर्तमानः न तु दृष्टलोभेन कविः सम्यग्ज्ञानी ३२ न देवाज्ञायेत्यादिना कथयति मया वेदरू
पेणादिष्टानपि स्वधर्मान्संत्यज्य यो मां भजेत सोपि एवं पूर्वोक्तवत् सत्तमः किं मत्तो नास्तिक्याद्वा अधर्माचरणेन वा

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः ३१ अप्रमत्तो
गभीरात्मा धृतिमान् जितषड्गुणः अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ३२ आज्ञायैवं गुणान्
दोषान्मयादिष्टानपि स्वकान् धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ३३ ज्ञात्वाज्ञात्वाथ ये वै मां
यावान्यश्चास्मि यादृशः भजंत्यनन्यभावेन ते मे भक्ततमा मताः ३४ वासुदेवाय नमः ॥

धर्मत्यागः न धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि यो मद्ध्यानविक्षेपतया मद्भ
क्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् संत्यज्य यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य अथ
वा विद्धैकादशीकृष्णैकादश्युपवासांतनिषिद्धश्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान् संत्यज्येत्यर्थः ३३ किंच यावा
न् देशकालाद्यपरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वाज्ञात्वापि यद्वा विशेषतः पुनः पुनः गो॰ ४७
॥ ज्ञात्वा एकांतभावेन ये भजंतीति ३४ ॥

साधुलक्षणमुक्त्वा भक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः लिंगानि प्रतिमादीनि ३४ सर्वलाभोपहरणं सर्वस्य
लब्धस्य मदर्पणं ३५ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनं तत्र संतोषः ३५ बलिविधानं पुष्पोपहारादि
समर्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादि विशेषेषु ३७ उद्यानादिकरणे सामर्थ्ये सति स्वतः असति

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं परिचर्या स्तुतिः प्रह्वगुण
कर्मानुकीर्तनं ३४ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव सर्वला
भोपहरणं दास्येनात्मनिवेदनं ३५ मज्जन्मकर्मकथनं मम पर्वानुमो
दनं गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६ यात्राबलिविधा
नं च सर्ववार्षिकपर्वसु वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणं ३७
ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः उद्यानोपवनाक्रीडपुरमं
दिरकर्मणि ३८ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः गृहशुश्रू
षणं

[illegible]

चान्यैः संभूय मिलित्वा उद्यमः उद्यानं पुष्पप्रदानं उपवनं फलप्रधानं वनं आक्रीडं क्रीडास्थानं ३८ संमार्
जनं रजसोपाकरणं उपलेपः गोमयोदिकादिभिः आलेपनं सेकैरेव प्रोक्षणं मंडलवर्तनं सर्वतोभद्रादिकर
णं मद्गृहस्य ३९

ने

भा॰ए॰ टी॰ ४८ स्वयमन्यैर्वा निवेदितं न स्वीकुर्यात् एतच्च साधारणस्यावरविषयं रागगोचरप्राप्तविषयं च भक्त्यानुग्राह्यमेव
तदेवाह उक्तं च षड्भिर्मासोपवासैस्तु यत्फलं कीर्तितं विष्णोर्नैवेद्यसिक्थेन भक्षणेन तद्भुञ्जतां कलौ हृदि रूपं मुखे
नाम नैवेद्यमुदरे हरेः पादोदकं निर्माल्यं च मस्तके यस्य सोच्यते इत्यादिवचनेभ्यः यद्वा अन्यस्मै निवेदितं मे नोप
युंज्यात् मह्यं न निवेदयेदित्यर्थः ४० विष्णोर्निवेद्यतानन्त्येन यदिष्टं देवतान्तरे पितृभ्यश्चैव न देयं तद्दत्तमानन्त्यायकल्प

अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं ४० य
द्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ४१ सूर्योऽग्नि
र्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ४२ सूर्ये तु विद्यया
त्रय्या हविषाग्नौ यजेत मां आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ४३ वैष्णवे बंधुस
त्कृत्या हृदि खे ध्याननिष्ठया वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ४४ स्थंडिले मंत्र
हृदयैर्भोगैरात्मानमात्मनि क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४५ राम ॥

ते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः इत्यादिवचनेभ्यः ४१ इदानीमे
कादशपूजाधिष्ठानान्याह सूर्य इति हे भद्र ४२ अधिष्ठानभेदेन पूजासाधनान्याह सूर्य इति त्रिभिः त्रय्या विद्य
या सूक्तैरुपस्थानादिना अंग हे उद्धव यवसादिना तृणादिना ४३ बंधुसत्कृत्या बंधुवत्संमानेन हृदि खे हृदयाका
शे मुख्यधिया प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिले भुवि पाषाणादौ मंत्रहृदयैः रहस्यमंत्रन्यासैः गं
४५ ॥ ४८

सर्वोपिष्ठानेष्वध्येयमाह धिस्येष्विष्वितिअनेनप्रकारेणएषुधिस्येषु ४६ उक्तायाभक्तेःफलमाह इष्टापूर्तेने
तिसद्भक्तिंप्रस्याभक्तेरंतरंगसाधनमाह इत्यंमत्स्मृतिसाधुसेवयाभवति यद्वास्मृतिर्ज्ञानेननसद्भक्तिभक्ति
मतः पुंसः साधुसेवयामत्ज्ञानंभवतीत्यर्थः ४७ ज्ञानभक्तिमार्गौउक्तौतत्रज्ञानमार्गादपिभक्तिमार्गःश्रेष्ठइ
त्याह प्रायेणेतिसत्संगेनयोभक्तियोगः तेनविनोपायःसंसारतरणेनविद्यते सत्संगेनेत्यत्रहेतुमाहहिय

धिस्येष्विष्वितिमद्रूपंशंखचक्रगदांबुजैः युक्तंचतुर्भुजंशांतंध्यायन्नर्चेत्समाहितः ४६
इष्टापूर्तेनमामेवंयोयजेतसमाहितः लभतेमयिसद्भक्तिंमत्स्मृतिंसाधुसेवया ४७
प्रायेणभक्तियोगेनसत्संगेनविनोद्धव नोपायोविद्यतेसध्र्यक्प्रायणंहिसतामहं ४८
अथैतत्परमंगुह्यंशृण्वतोयदुनंदन सुगोप्यमपिवक्ष्यामित्वंमेभृत्यःसुहृत्सखा ४९
इतिश्रीभागवतेएकादशस्कंधेएकादशोध्यायः ११ शुभम् ॥ राम ॥

स्मात्सम्यक्सतामहंप्रापणंप्रकृष्टमयनमाश्रयः अतःसत्संगोमय्यंतरंगइत्यर्थः ४८ इदानींसांख्य
योगादीनिसाधनानितरसव्यपेतानिसव्यभिचाराणिचसत्संगस्तुस्वतंत्रएवसमर्थः फलाव्यभिचारीचेति
वर्णयितुमाह अथैतदितिपरमंगुह्यमाणंपरंगुह्यममैतःशृण्वित्यर्थः ४९ राम विष्णुः कृष्ण ॥
इतिश्रीभावार्थदीपिकायामेकादशस्कंधेएकादशोध्यायः ११ ॥ ॥ ॥ ॥

भा॰ए॰ टी॰ ५९ द्वादशे साधुसंगस्य महिमा वर्णितः॥१॥ कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परं ॥ न रोधयति न वशीकरोति
योगः आसनप्राणायामादिः सांख्यं तत्वानां विवेकः धर्मः सामान्यतो हिंसादिः स्वाध्यायो वेदजपः तपः कृच्छ्रा
दित्यागः संन्यासः इष्टापूर्त्तं इष्टं च पूर्त्तं च तत्रेष्टमग्निहोत्रादि पूर्त्तं कूपारामादिनिर्माणं दक्षिणाशब्देन सामान्यतो
दानं लक्ष्यते १ व्रतानि एकादश्युपवासादीनि यज्ञः देवपूजा छंदांसि रहस्यमंत्राः अवरुंधे वशीकरोति २ या
तुधाना राक्षसाः ३ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ५ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथस्तुलाध

श्रीभगवानुवाच न रोधयति मां योगो न सांख्यं धर्म उद्धव न स्वाध्यायस्तपस्त्यागो नेष्टापूर्त्तं न दक्षिणाः॥१
व्रतानि यज्ञः छंदांसि तीर्थानि नियमा यमाः। यथावरुंधे सत्संगः सर्वसंगापहो हि मां २ सत्संगेन हि
दैतेया यातुधानाः खगा मृगाः गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ३ विद्याधरा मनु
ष्येषु वैश्याः शूद्राः स्त्रियोंत्यजः रजस्तमःप्रकृतयः तस्मिंस्तस्मिन्युगे युगे ४ बहवो मत्पदं प्रा
प्ताः त्वाष्ट्रकायाधवादयः वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ५ सुग्रीवो हनुमानृक्षो ग
जो गृध्रो वणिक्पथः व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ६ ते नाधीतश्रुतिगणा नोपा
सितमहत्तमाः अव्रताः तप्ततपसो मत्संगान्मामुपागताः ७ राम श्रीकृष्ण ॥

रा व्याधः धर्मव्याधः यज्ञपत्न्यः दीक्षितभार्याः ६ तेषां सत्संगव्यतिरिक्तसाधनाभावमाह तत इति न अ
धीताः श्रुतिगणाः यैः तदर्थं च न उपासिता महत्तमा यैः तेन तथा किंच अव्रताः अप्ततपसः न व्रतानि येषां न
तप्तानि तपांसि यैः ते च ते च तथा सत्संगादिति सद्भिः संगो नाम मय्येव संगः इत्यभिप्रेत्योक्तं यद्वा स्वसंगस्यापि उ॰
सत्संगत्वं विवक्ष्यते स्वस्यापि सत्त्वात् यद्वा मदीयसंगादित्यर्थः ७ राम ॥ राम कृष्ण ॥ ५९

नतुवृत्रादीनांभवतुनामकथंचित्साधनंनतुगोपीप्रभृतीनांतत्रन्यदस्तीत्याह केवलेनेतिसत्संगलब्धेनकेव
लेनैवभावेनप्रीत्यानगाः यमलार्जुनादयः नागाःकालियादयः यद्वानगाइतितत्रसर्वेनरुगुल्मादीनामपिभगव
द्भावोस्तीतिगम्यते तदुक्तंभागवतैव अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणं नमंत्युपादाय
शिखाभिरात्मनःतमोपहत्यैतरुजन्मयत्कृतं इतिद्रुमामेबलदेवंप्रति इत्यादिसिद्धाःकृतार्थाःसंतईयुःप्रापुः ८
स्वप्राप्तेर्दुर्लभतामाह यमितियोगादिभिःकृतप्रयत्नोपियेनप्राप्नुयात् तंमामीयुरितिपूर्वेणान्वयः अत्रचप्र

५७

केवलेनहिभावेनगोप्योगावोनगामृगाः येन्येमूढधियोनागाःसिद्धामामीयुरंजसा ८ यंनयो
गेनसांख्येनदानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि ९ रामेणसार्धंमथु
रांप्रणीतेश्वाफल्किनामय्यनुरक्तचित्ताः विगाढभावेननमेवियोगतीव्राधयोन्यंददृशुःसुखा
य १० ताःताःक्षपाःप्रेष्ठतमेननीतामयैववृंदावनगोचरेण क्षणार्धवत्ताःपुनरंगतासांहीनाम
याकल्पसमाबभूवुः ११

यथेयागोप्यः प्रह्लादयोवाश्रीकृष्णेनसहसंगताःतेसं[illegible]तः सत्संगोन्येषांसत्संगोतेनचतेषांभक्तिरितिता
त्पर्यं ९ गोपीनांभावंप्रपंचयतिरामेणेतिचतुर्भिः श्वाफल्किनाअक्रूरेणमयिप्रणीतेसतिमेमत्तोन्यंसुखायन
ददृशुः कुतःवियोगेनतीव्राआधयःसहयासांता अत्रहेतुः मयिविगाढेननिरूढेनप्रेम्णाअनुरक्तानिसंस
क्तानिचित्तानियासांताः १० तीव्राधित्वंव्यनक्तिताःताइतिमयासहयाःपूर्वंक्षपारात्रयः क्षणार्धवन्नीताःता
एवपुनः मयाहीनाःतासांकल्पसमाबभूवुः कथंभूताःताःताःवाचामगोचराइत्यर्थः ११ ॥

भा॰ए॰ टी॰ ५०

किंचएवंतीव्राद्युपस्तामोहमिषेणसमाप्तिंप्राप्ताइत्याह ताइतिमयिअनुषंगेणआसक्त्यावद्धाधियोयाभिस्ताः
स्वमात्मानंस्वदेहस्थंनः दूरस्थंइदंसन्निहितंचनाविदन् यद्वास्वंपतिपुत्रादिआत्मानमहंकारास्पदंअ
दःपरंलोकंइदमिमंलोकंचनाविदन्नितियथामुनयःसमाधौनामरूपेनविदुःतद्वत् किंत्वब्धितोये
नद्यइवम[illegible]यिप्रविष्टइत्यन्वयः १२ एवंताअबलाःबलंमत्कामाः अतत्त्वरूपविदःस्वरूपंतुनजानंतीति तथा के
पिसत्संगात्परंब्रह्मजारबुद्धिविषयमपिब्रह्मस्वरूपंएवंमांपरमंप्रापुरित्यर्थः १३ यस्मादेवंभूतोमत्संगजनप्रवा

तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदःतथेदं यथासमाधौमुनयोब्धितोयेनद्यःप्रविष्टइव
नामरूपे १२ मत्कामारमणंजारमस्वरूपविदोबलाः ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः १३
तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तिंचनिवृत्तिंचश्रोतव्यंश्रुतमेवच १४ मामेकमेकश
रणमात्मानंसर्वदेहिनां याहिसर्वात्मभावेनमयास्याह्यकुतोभयः १५ उद्धवउवाच [illegible] संश
यःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिवर्ततआत्मस्थोयेनभ्राम्यतिमेमनः १६ राम ॥ ॥

द्धः तस्माच्चोदनांश्रुतिं प्रतिचोदनांस्मृतिंचयद्वाविधिंचनिषेधंचउत्सृज्यपरित्यज्यमांशरणंयाहिमयैव
अकुतोभयःस्याः अत्रचपूर्वंतावन्मयोदितेष्वप्रवहितः स्वधर्मांस्त्यक्त्वादिनाकर्म[illegible]कर्तव्यमित्युक्तं इदानींतुस
र्वंत्यक्त्वामांशरणंयाहीत्युच्यते तत्रकिमात्मनःकर्तव्यत्वाद्यस्तिनास्तिवेत्यात्मस्थः आत्मविषयःसंशयोननि
वर्तते यद्वाकर्मकार्यंत्याज्यंवेत्यात्मस्थःहृदिस्थःसंशयोननिवर्तते इतिपृच्छतिसंशयइतियेनसंशयेन १६ उ॰
नमःकमलदलविपुलनयनाभिरामायश्रीरामचंद्रायभ्रातृवरलक्ष्मणसहिय ॥ राम ॥ ॥ ५०

उक्तं सप्रपंचस्य सृष्टिभिः अयं भावः ईश्वरस्तावत्स्वमायया वशात्प्रपंचात्मना भाति तत्प्रपंचाध्यासाच्च जीवा
नामनाद्यविद्यया कर्तृत्वादिनतो विधिप्रतिषेधाधिकारः तदानीं सत्वशुद्ध्यर्थं कर्माणि कुर्वन्तु क्रमसत्व
स्वदशनैस्तेन दंशयति जिह्वामिति ५० यदि देवता आत्मना वा तथापि पदे ह्यात्मनः किं यतो विकारयोर्देहक्रियमा
णयोर्देवतयोस्तद्धस्तेन मुखेऽभिहितेऽनेन वा दंतैरेतदभिमानिनो वह्नींद्रयोरेव तत्र त्वविक्रियस्यात्महंकारस्य
चात्मनः देवतानां च सर्वदेहेष्वभेदान्न कोऽपि विषयोऽस्तीति स्वदेहदृष्टांतमाह यदंगमंगं देवताऽपि हस्तेन मुखादि
कं हन्यत एव सर्वत्र देवतानामधिष्ठानरूपमंगं विकारस्योदाहरणं ५२ ॥

ॐ

आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुः यदि स्यात्तर्हि तस्मिन्पक्षे अन्यतः किं न किंचिदप्यन्यतो भव
तीत्यर्थः क्रुध्येतेत्यर्थः यतो निजस्वभावः स्वभावः सन्नात्मनः तथा परिणामो निमित्ततो भवति अतो लौकिकोऽपि विषय इति
चेत्तत्राह न हीति आत्मव्यतिरिक्तं नास्त्येव यदि स्यात्तदप्यस्तीति प्रतीयते न तर्हि तन्मृषैव अतः कस्माद्धेतोः क्रुध्येत् यतो नास्ति
निमित्तं न च सुखं दुःखं चेत्यर्थः ५१ यद्यपदेशे जन्मात्मनः किं यतो जन्यत इति जननो देहस्तस्यैव जन्म तयापेक्षया ह्यादशा

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः न ह्यात्मनोऽन्यद्यदि तन्मृषा स्या
त्क्रुध्येत कस्मान्न सुखं न दुःखं ५२ ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य
ते वै ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ५३ ॥

इमादिराशिस्था ग्रहस्था ग्रहा अस्ते सुखदुःखयोर्निमित्तं भवन्ति किं च अन्तरित्तस्यैर्ग्रहैः तत्र ग्रहस्य ग्रहस्यैव पापार्थादिह
स्यादिभेदैः पीडां वदन्ति दैवज्ञाः न तु ग्रहकोणादिष्वस्थितस्य तद्दसगोचरस्य पुरुषस्य ग्रहगतस्यैव तत्पीडा तद्ग्रहयोगस्य
देहे तस्याभिमानाद्भवति अतः पुरुषस्ततः ग्रहाः देहाद्वान्यः क्रुध्येत ५२ ॥

भा॰ ए॰ कर्महेतुश्चेत्तत्राप्यात्मनि किमस्य योपगमः कर्मैव नास्ति जडत्वसदेहत्वाभिमानितदादेहियस्मात्तत्कर्मैकस्य जडाजड
त्वे सति स्यात् न जडत्वाद्देहिकाचित्तोपपत्तेः अजडत्वाच्चहितानुसंधानतः प्रवृत्तिसंभवात् अविनश्वरो देहः अतः तस्य प्र
टी॰ वृत्तिर्न संभवति पुरुषस्तु सुवर्णः शुद्धज्ञानस्वरूपः अतः कस्मै क्रुध्येत यतः सुखदुःखयोर्मूलभूतं कर्मैव नास्तीति ५४
१०३ नत्वकालपक्षेप्यात्मनः किं यतोसौ कालात्मक एव अंशांशिनोस्तादात्म्यात्ततः पीडनासंभवे दृष्टान्तः नाग्नेर्हिताप

कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे देहस्त्वचित्पुरुषोयं सुवर्णः
क्रुध्येत कस्मै न परस्य द्वंद्वं ५४ कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मको
सौ नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुध्येत कस्मै न परस्य द्वंद्वं ५५ ॥ राम ॥

दंशात्स्वज्वालात्स्तापो दाहो नाशोस्ति तथोपाधिभूतकाष्ठांशाद्दाहनाशः स्यादिति दृष्टांतान्तरं हिमस्य तत्तच्छैत्यं तदंश
स्य तुषारकणस्य नाशकं न स्यादित्यर्थः किंचात्मनोंशांशित्वं वस्तुतः परप्रा
यं`` न च परस्य द्वंद्वं सुखदुःखादिकमस्ती
ति ५५ राम

तदेव वर्णयति देहतः मसिद्धानि रक्ताः यदि कश्चिद्देहं तत्र मुख्यावयवे तदपि व्यल्ममहिमायेत्वा यां न संभवतीत्याह न केनचिदिति
निनन्व परोक्षः कथमपह्नूयते तत्राह यथेति संसृतिम् अविद्यमानामेव रूपयति प्रकाशयतीति तथा तस्याहमः अहंकार
स्य यथा स्यात् न तथा परतः प्रकृतेः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तो सो न वास्तव इत्यर्थः एवं प्रबुद्धो यः स
भूतैः कृता न बिभेति न भयमन्यत्र क्वापि प्राप्नोतीतीत्यर्थः ५६ ५७ अतोहमप्येतदेव परमात्मनिष्ठया तरिष्यामीत्या
ह एतामिति सोहमित्यन्वयः न निर्यंनिष्ठैव च कथं भवेत्तत्राह मुकुंदेति मत्वा वेन सद्गाथार्थं संक्षेपतो दर्शयति द्वाभ्यामि

न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य यथाहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ५६
एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ५७ श्री
भगवानुवाच निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं निराकृतोसद्भिरपि स्वधर्मादकंपितोमुं
मुनिराह गाथां ५८ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः मित्रोदासीनरिपवः संसारस्तमसः कृतः ५९ त
स्मात्सर्वात्मना तात निगृहाण मनो धिया मय्यावेशितया युक्त एतावान्योगसंग्रहः ६० य एतां भिक्षुणा गीतां
ब्रह्मनिष्ठां समाहितः धारयन् श्रावयन् शृण्वन् द्वंद्वैर्नैवाभिभूयते ६१ इति श्रीभागवते एकादशस्कंधे भगवदुद्ध
वसंवादे भिक्षुगीता नाम त्रयोविंशोध्यायः २३ ॥ ॥ श्रीरामकृष्णाय नमः ॥

इत्थं नष्टद्रविणो निर्विद्य गतक्लमः प्रव्रज्य गां पर्यटन् असद्भिर्निराकृतोपि स्वधर्मादकंपितः सन्मुनिरमुं गाथामगायत
इत्यर्थः ५८ मित्रोदासीनरिपवः सर्वोपि च संसारः तमसः अज्ञानतः आत्मनो मनसो विभ्रममात्रः न तात्विक इत्यर्थः
५९ उक्तं द्वंद्वसहनोपायमुपसंहरति तस्मादिति ६० मनोनिग्रहाशक्तोप्येतच्छ्रवणादिनिष्ठः तत्फलं प्राप्नोतीत्या
ह य एतामिति द्वंद्वैः सुखदुःखादिभिः ६१ भिक्षुगीतमिषेण कृता भक्ति च जगन्नेदृरिः महोनिङ्घान्दूरन्भाति परमानंदरूपमः

एकादशटीका २२ ॥

चतुर्विंशेतुसांख्येनमनोमोहोनिवार्यते आत्मनःसर्वभावानामागमापायचिंतया १ सप्तदशंभक्तानामहंहृताय
संयमं चितस्याकाप्नुनःकृत्स्नःसांख्यमप्राद्दृतास्कोते २ ऋद्दितीयात्परमात्मनोमाययाप्रकृतिपुरुषद्वारासर्वेहेतमु
हेतिपुनस्तत्रैवलीयतइत्यनुसंधानस्यहृद्भ्रमोनिवर्ततइतिवक्तुंसांख्यमत्तोतिअथेतिपूर्वैःकपिलादिभिर्विनि
श्चितंवैकल्पिकंभेददर्शनिमित्तंभ्रमंसत्वदुःखादिरूपं १ अथोशब्दःकार्त्स्न्येज्ञानंदृश्यतेनदृश्यःकृत्स्नोप्यर्थः अविकल्पि
तंविकल्पशून्यमेकमेवब्रह्मरूपेणलीनमासीदित्यर्थः कदेत्यपेक्षायामादौप्रथमयुगेयुगेभ्यःपूर्वंमल्पयतम्यर्थः तयाप्रादौ

श्रीभगवानुवाच अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्विनिश्चितं यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं १ आसी
ज्ज्ञानमथोअर्थएकमेवाविकल्पितं वाङ्मनोगोचरंसत्यं यदाविवेकनिपुणाआदौकृतयुगेयुगे २ तन्मायाफ
लरूपेणकेवलंनिर्विकल्पितं वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत् ३ तयोरेकतरोह्यर्थःप्रकृतिःसोभया
त्मिका ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते ४ तमोरजःसत्वमितिप्रकृतेरभवन्गुणाः मयाप्रक्षोभ्यमा
णायाःपुरुषानुमतेनच ५ ॥

यत्कृतयुगंतस्मिंश्चाप्यन्यदापियदाविवेकनिपुणाजनाभवंतितेषामपितेषांभेदस्फूर्तेः २ हृद्बृहत्सत्यवाङ्मनोगोचरंद्वे
धाभवतितत्रयामयाद्दश्यफलंतत्प्रकाशनरूपेणमायाविलासरूपेणचद्विधाभवत् ३ तयोर्द्विधाभवतयोर्मध्येउ
भयात्मिकाकार्यकारणरूपिणीअभवतअभियताविभ्रत ४ मयापरमेश्वरेणजीवादृष्टप्रयुक्तत्वात्तस्य पुरुषा
नुमतनंयदासस्यैवप्रकृतिः इत्तगुणरूपयापुरुषावस्थातदनुमतेनतद्द्वारेणेत्यर्थः ५ ॥

सूत्रं क्रियाशक्तिमान्प्रथमो विकारः ततो महान् ज्ञानशक्तिः ननु यं महान् ज्ञानशक्तिः ननु यं महानेव प्रथमो विकारः
प्रसिद्धः तत्राह सत्वज्ञानक्रियागर्भत्वात्सूत्रेण संयुतः न तु पृथगेकमेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः विमोह
नः जीवस्य भ्रमहेतुः संजातः ९ एतच्छरीराणां कारणं मनः शब्देन देवानामप्युपलक्षणं चिदचिन्मयः चिदाभासव्याप्त
त्वादुभयरूपमिति जीवोपाधित्वं दर्शितं यद्यपि तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः अनन्तरं सो
ऽमनसश्चादिश्रुतेश्च भूतानि तन्मात्रपंचकं तेभ्यः चापंचीकृतेभ्यः प्राणादिक्रमेण समस्तात्मकं लिंगशरीरं पंचीकृतेभ्य

तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः ततो विकुर्वतो जातो योऽहंकारो विमोहनः ९ वै
कारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः १ ॥

अत्र ब्रह्मांडं तस्मिन्नैव तन्नंतरं अंतर्यामीति लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणः तन्नाभिपद्मे च वैराजस्य भोग्यार्थी विश्व
दृष्टस्तु राजनः ततो यथावसरमप्येषां जीवानामाविर्भावशक्तिमत्क्रियात तथापि चित्ताभिव्यक्तिः सर्वको ऽहंकारस्तमो भ
तेंद्रियादिव्यवहारस्सेतावतां महदादिक्रमेण सृष्टिरुच्यते तथा चोक्तं महदादिविशेषांतलिंगाद्यैः सृष्टिर्या चोदितान्यथा
उपायः सोवतारायनास्ति भेदः कथं चनेति १ ॥

भा॰ ए॰ टी॰ तस्मात्त्रिविधो त्रिविधोत्पत्तिं दर्शयति अर्थ इति तन्मात्रविकारात् शब्दादितन्मात्रकारणात्तामसात्तद्द्वारार्थो महाभूतरूपेण

१०५ तेन भवभूतानामावरणसंभावनात् इंद्रियाणि दशतैजसाज्ज्ञानसाधनेषां महतिसंभावसादृकतासात्त्विकाद्देवता

दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः चन्द्रश्चेत्येकादश च शब्दात्मनस्तेषां प्रकाशसंभावनात् ८ ममवैराज्ञोन

योनिरूः ९ सलिले संस्थितिर्यस्य ततः सलिलसंस्थितिः तस्मिन्सलिलसंस्थितावंडे श्रीनारायणरूपो लीलाविग्रहेण

अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च तैजसाद्देवता आसन्नेकादश च वैकृतात् ८ मया संचोदिता भावाः

सर्वे संहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमं ९ तस्मिन्नहं समभवमंडे सलिलसंस्थितौ मम ना

भ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः १० सोऽसृजत्तपसा युक्तो रजसा मदनुग्रहात् लोकान्सपालान्विश्वात्मा

भूर्भुवःस्वरिति त्रिधा ११ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परं १२

अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः १३ ॥

समभवं स्थितवानित्यर्थः विश्वाख्यं लोककारणभूतं तत्र ब्रह्मात्मभूश्चतुराननरूपभोगविग्रहेण पुनर्वैराजपदवत्तस्मिन्नावि

र्भूत इत्यर्थः १० रजसा युक्तो मदनुग्रहात्तपसासृजत्प्रभुः अतलादिसहिता भुवः अंतरिक्षलोकं स्वः स्वर्गं महर्लो

कादेरप्युपलक्षणं ११ लोकसृष्टिप्रयोजनमाह देवानामिति साईं नृणां ओको निवासः पदं स्थानं त्रितयात्परं महर्लोकादि भ

एवंभूतावस्थायां कारणमाह सार्द्धेन त्रिलोक्यां पातालादिस्वर्गान्तायां योगादितारतम्येन यो ऽन्तरं महर्लोकादयः मद्गतिर्वैकुं
ठलोकः १३ तत्रतमद्गतिव्यतिरेकेणोत्तरोत्तरगतयश्चंचलाः इत्याह वैराग्यार्थं मयाकालशक्तिनाधात्रापरमेश्वरेणकर्मफ
लप्रदेनकृतेनभूतेनगुणप्रवाहे संसारे उन्मज्जति प्रासम्यलोकमुत्तमांगतीः प्राप्नोति पुनर्निमज्जति प्रास्थावरेनीचागतीः
प्राप्नोति १४ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्यर्थत्वात्तत्प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाहद्वाभ्याम्णुरिति

त्रिलोक्यां गतयः सर्वाः कर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्यगतयोमलाः १३ मदर्जनस्तपःसत्यं
भक्तियोगस्यमद्गतिः मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् १४ गुणप्रवाहएतस्मिन्नुन्मज्जति
निमज्जति अणुर्बृहत्कृशः स्थूलोयोयोभावः प्रसिद्धति १५ सर्वोप्युभयसंयुक्तः प्रकृत्या
पुरुषेणच यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन् १६ विकारोव्यवहारा
र्थोयथातैजसपार्थिवाः १७॥

उभयेनसंयुक्तोव्याप्तः तदेवाह प्रकृत्येति १५ इदानींकार्यस्यकारणात्मतां दर्शयति यस्यकार्यस्ययआदिःकार
णमंतः लयस्थानंचतस्यमध्यंमध्यावस्थापिसएववैप्रसिद्धं सत्सुवर्णादिषु प्रतएवाद्यन्तयोरभिव्यभिचारित्वात्सएवसत्यं इतरः
अत्रलंतर्हिमिथ्याभूतकार्यस्यस्यातत्राह विकारइति तैजसाः कटककुंडलादयः पार्थिवाःघटशरावादयस्तद्यथेति १६

भा.व.
टी.
१०६

नन्वेवं तर्हि सकार्यमानि महदादीनामप्याद्यन्तरूपत्वात्सत्यत्वं स्यात्तत्राह यदिति यद्रूपमुपादाय उपादानकारणतया स्वीकृ-
त्य पूर्वः कारणरूपो महदादिर्भावः परमहंकारादिकं भावं विकुरुते सृजति विशेषं स्वरूपमुपादाय स्वयं निमित्तभूतो वर्तते सत-
त्तत्त्वमेव सत्यं निर्विशेषस्य सविशेषस्यानुषंगः कथं तर्हि सत्ताकेवलं सत्यमित्यादि कालिकत्वमाह आदिरिति यद्यदा यस्यादिरन्त-
श्च भवेत्ते तत्सत्यमभिधीयते अतः परमकारणस्यात्मनः सत्यत्वविवक्षयेत्यर्थः १७ ननु तथापि सर्वविकाराभिव्याप्ते
प्रकृतिमहदाद्युपरूपकालानामकार्यभूतानामभिन्नता कथं प्रतीयते तत्राह प्रकृतिरिति यस्य सतः कार्यस्योपादानतया

यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरं आदिरन्तो यदा यस्य तत्सत्यमभिधीयते १७ प्रकृतिर्यस्यो-
पादानमाधारः पुरुषः परः सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं १८ सर्गः प्रवर्तते तावत्पौर्वा-
पर्येण नित्यशः महान्गुणविसर्गार्थः स्थित्यन्तो यावदीक्षणं १९ ॥ रामाय नमः

प्रकृतिः प्रसिद्धाय सतः सा आधारः पुरुषः यस्य गुणक्षोभेणाभिव्यंजकः कालः तत्त्रितयमहमेव ननु पृथक्त्वप्रकृतेः श-
क्तित्वात्पुरुषकालयोरवस्थारूपत्वात् १८ एवं तावत्कालत्रयेप्यव्यभिचारित्वेन ब्रह्मैव सत्यं इति वक्तुं तस्य सृष्टिकारणत्वेनाद्य-
न्तसूक्ष्मतामध्येपि तस्यैव सत्यत्वमुपपाद्य ततोप्यवधित्वेन सत्यत्वं दर्शयितुं प्रवाहरूपायाः स्थितेरवधिमाह सर्ग
इति महान्नवच्छलः पौर्वापर्येण पुत्रपौत्रादिरूपेण नित्यशः अविच्छेदेन सर्गः प्रवर्तते तदाह गुणो देहेषु विविधतया
सृज्यत इति गुणविसर्गो जीवः तदर्थं तत्कृतभोगप्रयोजनः किंपर्यन्तं प्रवर्तते यावत्स्थितेरन्तः स्यादिति किमवधि तदाह यावदीक्ष

ॐ

प्रलयं निरूपयति विराड्ब्रह्मांडं मया कालात्मना ग्रासायमानः ग्रास्यमानः लोकानाममदृश्यः कालसृष्टिप्रलययोर
विधाः कल्पंते यस्मिन् तान्नास्मिन् विकल्पयतीति तथा सतयाभूतोपि पंचत्वरूपायविशेषायविभागायकल्पते
योऽन्योऽभवति पंचानां भूतानामेकरूपः तेषां पृथक्भावाय पंचत्वाय न स्पततीत्यर्थः १९ तत्र तस्माद्वा एतस्मादात्मन
आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योन्नं अन्नात्पुरुष
इति क्रमात्सक्रसृष्टिक्रमः प्रातिलोम्येन प्रलयमाह अन्नं भूतमर्त्यशरीरं येनोपचिते तस्मिन्नन्ने शतवर्षायामनावृष्टे।

विराण्मया ग्रासायमानो लोककल्पविकल्पकः पंचत्वायविशेषाय कल्पते भुवनैः सह २० अन्ने प्रलीयते मर्त्यम
न्नं धानासु लीयते धानाभूमौ प्रलीयते भूमिर्गंधे प्रलीयते २१ अप्सु प्रलीयते गंध आपः च स्वगुणो रसे ली
यते ज्योतिषि रसो ज्योतीरूपे प्रलीयते २२ रूपं वायौ स च स्पर्शे लीयते सोपि चांबरे २३ ॥

लीयते सति तस्मिन् बलीयतः इत्यर्थः अन्नं धानास्वबीजमात्रावशेषं भवतीत्यर्थः धानाभूमावुप्तान प्ररोहंतीत्यर्थः भूमि
र्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति २१ अप्सु गंधः
शतवर्षपर्यंतं ग्रसमानोऽप्सु लीयत एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति ततो रसोपि ज्यो
तिषि लीयते २२ ज्योतिश्च वायुनाभिभूयमानं रूपमात्रं सत्तस्मिंल्लीयते वायुश्चाकाशमविशति तेनावबेण प्रलयः स
रीमात्रः संस्तस्मिन् २३ ॥

भा॰टी॰
प॰१०३

एवं भूतादिनाहंकारेण ग्रस्यमानं शब्दतन्मात्रं तदेवं तामसाहंकारकार्यस्य शब्दपर्यन्तं लयमुक्त्वा राजसाहंकारा-
कार्यस्याप्याह इंद्रियाणि स्वयोनिष्विति संभवन्त्येभ्य इति देवताः स्ततेषां प्रकृतिस्वभावत्वात् यद्वा तेष्वेव देवताधीनत्वात्तेषु
लय इति वा वायोः प्रकृतिः वस्तुतस्तु सकारणराजसाहंकारे लयोभिमतः २३ योनिरिति देवगणस्तस्य देवत्वमविव-
क्षितं योनयो देवतास्ताश्च मनसि ऊते ईश्वरे नियन्तरि मनो वशामेश्वरभवन्स देवाः स्वतन्त्रत्वात्तदिंद्रियत्रयोक्तप्रवाणा-
प्यभिमानः मनश्च देवताभिः सह वैकारिके अहंकारे इत्यर्थः तामसाहंकारकार्याविशेषस्य शब्दस्य लयमाह २३

एवं शब्दतन्मात्रं इंद्रियाणि स्वयोनिषु योनिर्वैकारिके सौम्य लीयते मनसी-
श्वरे २३ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः स लीयते महान्स्वेषु गुणेषु
गुणवत्तमः २४ तेऽव्यक्ते संप्रलीयन्ते तत्कालेन लीयतेऽव्यये २५ ॥ राम ॥

शब्दो भूतादिं तामसाहंकारमप्येति तामसि लीयत इत्यर्थः भूतादिरप्युपलक्षणं त्रिविधोप्यहंकारो महति ज-
ज्ञानशक्तिं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् स च महान्स्वका-
रणेषु गुणेषु ज्ञानक्रियाशक्तिमत्त्वात् गुणवत्तमस्तान्स्वभावं विहाय गुणमात्ररूपो भवति तेऽव्यक्ते महतो
साम्यावस्थामव्यक्तं प्राप्तो इत्यर्थः तदव्यक्तं काले कालाधीनत्वात्तेनैकीभ-
वन्निःशेषेणाव्यये उपरतस्तो २४ ॥

मायामयेमायाप्रवर्तकेज्ञानमयेवाअतएवजीवयतीतिजीवस्तस्मिन्मय्यजेपुरुषेअयंभावः विश्वसृष्टेर्मद्वाहुरुषस्या
कृष्णाकृष्णः कालोहंतस्मिंशोनसृज्यत्र्यतस्तदात्मनावतिष्ठतइतितदुक्तंस्तन्ये कालंचरंतंसृजतीशआश्रयंप्रधा
नपुंभ्यांनरदेवसत्यकृदिति दशमेच योयंकालस्तस्यतेव्यक्तबंधोः चेष्टामाहुःचेष्टतेयेनविश्वं निमेषादिर्वत्सरां
तोमहीयांस्तंत्वीशानंक्षेमधामप्रपद्येइति जीवआत्मनिमय्यजेलीनत्वेनशांतियोग्यभावात्परिपूर्णोनसहरूपेणाव

कालोमायामयेजीवेजीवआत्मनिमय्यजे आत्माकेवलआत्मस्थोविकल्पापायलक्षणः २५
एवमन्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः २६ एवं
सांख्यविधिःप्रोक्तः संशयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यांपरावरदृशामया २७ इति
श्रीभागवतेएकादशस्कंधेश्रीभगवदुद्धवसंवादेचतुर्विंशोध्यायः २४ ।। शंकरायनमः

तिष्ठतेआत्मानात्मस्थएवनान्यत्रलीयतेयतः केवलोनिरुपाधिः अत्रहेतुः विकल्पापायाभ्यांविश्वोत्पत्तिलयाभ्यां
लक्ष्यतेअधिष्ठानत्वेनावधित्वेनचेतितथासः २५ अस्यकथनस्यमत्स्वतोपयोगमाहएवमितिमनसःकृतंभे
दनिमित्तोभ्रमःस्यात्तज्ज्ञानोवाकथंहृदितिष्ठेदिति २६ उपसंहरतिएषइति २७ मतस्तमिवयेनेदंदर्शितंतन
नमामितंसांख्यमाख्यानततत्त्वसैद्धरवेगुरवेनमः २७ इत्येकादशेचतुर्विंशः २४ ।।

पंचविंशेत्वनैर्गुण्यप्रतिपत्त्यैनिरूप्यते चित्तसंभवसत्वादिगुणवृत्तिरनेकधा १ महानितिपुरुषविवेकज्ञानव
तोपियावन्मयत्वविशेषेणगुणवृत्तिजयोनस्यात्तावद्दोषोपरमः अतस्तज्जयोपायकथनायगुणवृत्तीनि
रूपणार्थमाहगुणानामितिसर्वमिश्रीभूयवर्तमानाः सम्मिश्रास्तदसम्मिश्राः तेषांविभक्तानांगुणानांमध्येयेनगु
णेनयथायादृशोभवेत्तदिदंकथयतोमत्तोनिबोधेत्यर्थः १ तत्रसत्ववृत्तीराह शमइतिईक्षाविवेकः तपःस्वध
र्मएवतितिक्षाक्षांतिः दयापरानुसंधानंतुष्टिर्यथालाभसंतोषः त्यागोव्ययशीलत्वंअस्पृहावैराग्यंश्रद्धाआस्तिक्यंह्रीः

श्रीभगवानुवाच गुणानामसम्मिश्राणांपुमान्येनयथाभवेत् तन्मेपुरुषवर्येदमुपधारयशंसतः १ शमो
दमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः तुष्टिस्त्यागोऽस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्वृतिः २ कामईहामदस्तृ
ष्णास्तंभआशीर्भिदासुखं मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः ३ ॥ राम ॥

अनुचितेकर्मणिलज्जाह्रपादानंदयदानरक्षणेष्विति स्मरणात्स्मृत्यादिशब्देनार्जवविनयादिस्वनिर्वृतिः आत्म
रतिः २ रजसोवृत्तीराहकामोभिलाषः ईहाव्यापारः मदोदर्पः तृष्णालाभेसत्यप्यसंतोषः स्तंभोगर्वः आशीः
धनाद्यभिलाषेणदेवतादिप्रार्थनंभिदासंमुखरणाभिदाद्वैतमन्यदितिभेदबुद्धिः सुखंविषयभोगः मदोत्साहःम
देनयुद्धाद्यभिनिवेशः यशःप्रीतिःस्तुतिःप्रियतात्हास्यमुपहासः वीर्यंप्रभावाविष्कारः बलेनोद्यमःन्यायेनोद्यमः

तमोवृत्तीराह क्रोध इति क्रोधो वधहिंसतालोभो मयपराद्युखता अन्तमर्थास्तीयमाभावसंहिंसाद्रोहः याज्ञाया
पेनारंभो धर्मध्वजित्वं क्रमः श्रमः कलिः कलहः शोकमोहौ अनुशोचनं विषादार्तौ दुःखदैन्यं च निद्रातन्द्री आलसी
दंभे भविष्यतीत्यनेनाभीभयमनुप्रमोन्नायं ४ अनुपूर्वशः क्रमेणैताः श्लोकत्रयोक्ताः वर्णितमायाः अन्या अपवृ
त्तेर्या याश्च रसाशान्तिभावः ५ विभक्तानां पुणानां वृत्तयो वर्णिताः मिश्राणामाह सन्निपात इति त्रिभिः शब्दमनेन
व्यमनावृत्तसर्ववृत्तिसामानाधिकरण्यदर्शनात्सन्निपातजमेवदर्शनत्वं अवहंयतः कामीक्रोधीत्यादितथाममशो

मं क्रोधो लोभो ऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः शोकमोहौ विषादार्ती निद्रालस्याभी
रुत्वयमः ४ सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः वृत्तयो वर्णिता मायाः सन्निपा
तमयोऽस्य तु ५ सन्निपातस्त्वहमिति ममेत्युद्भवयामतिः व्यवहारः सन्निपाते म
नोमात्रेन्द्रियासुभिः ६ धर्मे चार्थे च कामे च यद्दृश्यापरिनिष्ठितः पुणानां सन्नि
कर्षोयः प्रहाररतिधनावहः ७ ॥

निरस्तिकामः क्रोधरन्यादिरहश्चेतसर्वेकः सर्वो व्यवहारस्य सन्निपातकार्यमित्याह व्यवहारश्च निग्रहहेतुः म
नश्च मानाणि च इंद्रियाणि च असवश्च तैः मनआदीनां सात्त्विकं तामसराजसत्वात्तैर्व्यवहारः सन्निपातज इति भा
वः ६ असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदा यं त्रिगुणनिष्ठारूपः सन्निकर्षः सन्निपातकार्यं धर्मादी
नां सत्त्वतमोरजः कार्यत्वाहिश्यतः सन्निपातत्वत्वमुक्तं फलतश्च तत्रापानमुक्तं प्रहाररतिधनानि सत्त्वरजस्तमोम

धर्मेनिष्ठायामेवसंनिपातंदर्शयतिमहृत्तिलक्षणोकाम्येधर्मेयदापुंसोनिष्ठाभवतिअथवानिशोनिष्टितःतथा
पुमान्यदागृहाश्रममप्यासक्तः तिष्ठेदनुपश्चात्स्वधर्मेचनित्यनैमित्तिकेतिष्ठेतगुणानांसापिसंमितिः सन्निपातः
इतिघस्ताकाम्यधर्मगृहासक्तिःस्वधर्मःरजस्तमसत्वमयाइत्यर्थः ८ तदेवंमिश्रामिश्रगुणवृत्तीःप्रदर्श्येदानीं
पुमान्येनयथाभवेदितियदुक्तंतद्दर्शयतिपुरुषमितितिसृभिः ९ १० हिंसाशत्रुमरणादिकमाशास्ययोभजेत्तंना
मसंविद्यात्एतैर्गुणैरेवंभक्तोभवतीतितात्पर्यार्थः ११ ननुतत्वापिगुणवशेनकर्तृत्वाविशेषात्केनविशेषेण

महृत्तिलक्षणोनिष्ठः पुमान्यर्हिगृहाश्रमे स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८ पुरुषंसत्व
संयुक्तमनुमीयाच्छमादिभिः कामादिभीरजोयुक्तंक्रोधाद्यैस्तमसायुतं ९ यदाभजतिमांभ
क्त्यानिरपेक्षः स्वकर्मभिः तंसत्वप्रकृतिंविद्यांहिंसामाशास्यतामसं १० सत्वंरजस्तमइतिगुणा
जीवस्यनैवमे चित्तजायैस्तुभूतानांसज्जमानोनिबध्यते ११ ॥

पुरुषंस्त्रियमेववा १० यदाआशिषआशास्यमांभजेतस्वकर्मभिः तंरजःप्रकृतिंविद्या

तंसेवोजीवस्यसेवकइतिनियमः यतोमांभजेदितिवारंवारमुच्यतेतत्राहसत्वमितिजीवस्यैवनमेऽतःयतः
चित्तजाजीवोपाधौचित्तेभिव्यज्यंतेयतोवैः सचबध्यतेकीदृशः भूतानांदेहरूपाणांमध्येषांचतन्मध्येसज्जमानः
अहंममेतिसज्जमानोगुणानियंतस्तेनरजस्सादिकर्मोपिनिस्समुक्तः अतोमहान्विशेषइतिभावः यद्वाभूता
नामपंचीकृतानांपंचकार्यभूतंचित्तमज्ञमयंदेहेशेषमनइतिश्रुतेः तत्प्रभवाः अतोभक्तोपाधिसत्जीवस्यै
वेतिसम्यक्तमानं १२

तदेवं मिश्रामिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककार्याणि दर्शयति यदेति सप्तदशभिः यदेतरौ गुणौ
जयेत् अभिभवेत् भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शान्तं शिवत्वविशदत्वभास्वरत्वानां पर्यायक्रमेण सत्वधर्मज्ञानदे
तुत्वात् तदा तैर्युज्येत ध्यानादि शान्त्या ब्रह्मदमादिभिश्च १३ तमः सत्वं च कर्मभूतं रजः कर्तृ संगं संगहेतुः भिदा भेदहेतुः च
लं महाति सभावे यतः संगहेतुत्वात् यशः साश्रिया च युज्येत तत्कामः पुमान्भवतीत्यर्थः भिदाहेतुत्वात् दुःखेन युज्ये

यदेतरौ जयेत्सत्वं भास्वरं विशदं शिवं तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् १३
यदा जयेत्तमः सत्वं रजः संगं भिदा चलं तदा दुःखेन युज्येत कर्मणा यशसा श्रिया १४
यदा जयेद्रजः सत्वं तमो मूढं लयं जडं युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया १५
यदा चित्तं प्रसीदेत इंद्रियाणां च निर्वृतिः देहेभयं मनोसंगं तत्सत्वं विद्धि मत्पदं १६

तद्वितीयार्द्धे भयं भवती निष्कामेः चलत्वात् कर्मणा च युज्येत १४ यदा रजः सत्वं च कार्यभूतं तमः कर्तृ जयेत्
मूढं विवेकभ्रंशकं लयं स्वापावस्थात्मकं जडं अनुद्यमात्मकं अतो मूढत्वाच्छोकमोहहिंसाभिर्लयत्वान्निद्रया जड
त्वादुद्यमाभावेन केवलं स्याशया युज्येतेति द्रष्टव्यं तत्र न यतिपावे सयात्मकत्वमेव निद्राशापोहेतुः १५ किंच यदा चि
त्तं प्रसीदेत सत्वं भवेन्निर्वृतिरुपरतिः तत्तदात्मत्पदं सदुपलब्धिस्थानं सत्वमुद्रिक्तं विद्धि १६ ॥

भा॰ए॰ यदापुनःक्रिययाविकुर्वन्विकारंप्राप्नुवत्आधीर्भवतिआर्त्तमंतादिहितिमाधीर्यस्य सः चेतसोवृत्तीं इंद्रियाणांमनि
टी॰ र्वृतिः गात्राणांकर्मेंद्रियाणांतेषामस्वास्थ्यंविकाराधिक्यंमनोभ्रांतंचंचलंरजउत्कटंनिशामयजानीहि १७ यदा
११० सीदच्चित्तंतिरोभवत्चेतसोग्रहणेचिदाकारपरिणामेऽक्षमंसदविज्ञंविलीयेतमनोपिसत्कस्मात्कंनष्टंलीनंत
मोज्ञानंग्लानिविषादश्चभवतितत्तदातमउत्कटंउपधारयविद्धि १८ किंचएधमानेसतिइंद्रियाण्येवनिर्हतिष

विकुर्वन्क्रिययाचाधीरनिर्वृतिश्चचेतसां गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय १७ सीदच्चित्तंविली
येतचेतसोग्रहणेऽक्षमं मनोनष्टंतमोग्लानिस्तमस्तदुपधारय १८ एधमानेगुणेसत्वेदेवानांबलमेधते
असुराणांचरजसितमस्युद्धवरक्षसां १९ सत्वाज्जागरणंविद्याद्रजसास्वप्नमादिशेत् प्रस्वापंतमसाज
न्तोः तुरीयंत्रिषुसंततं २० उपर्युपरिगच्छंतिसत्वेनब्राह्मणाजनाः तमसाधोधआमुख्याद्रजसांतरचारिणः
।२१।

हंतिमोहस्वभावानिदेवासुरराक्षसासियहात्मसंगाद्दादिदैविकानोगुणानामुत्कर्षकार्याण्युक्तानीतिज्ञेयं १९ गु
णोत्कर्षतोवस्थाभेदंदर्शयतिसत्वादितिमसंगात्त्रिगुणावस्थामाहतुरीयंचतुर्थमवस्थांतरंनामत्रिषुजागरणादि
षुसंततमेकरूपमात्मतत्वमेवेत्यर्थः २० गुणोत्कर्षद्वारेणतत्तत्कर्मफलनिष्ठांदर्शयतिउपर्युपरीतिब्राह्मणावेद
योनुष्ठानयुक्ताः आब्रह्मणभतिपावेब्रह्मलोकमभियान्तीत्यर्थः आमुख्यात्स्थावरानभियान्तीत्यंतरचारिणः

मनुष्याएवभवंति २१॥

देहाद्युत्क्रांतिकालीनगुणोत्कर्षफलमाह सत्वेइति सत्वेसतिप्रलीनामृताः रजोलयाः रजसिप्रवृद्धेसतिलयोयेषांते
एवंतमोलयाश्चनिर्गुणाश्चमद्भक्तसंपर्काद्धानुष्ठानाज्जीवंतोऽपिनिर्गुणास्तेमामेवयांतीत्यर्थः २२ इदानीं
गुणोत्कर्षकृतमेवतत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणमितिमत्प्रीत्युद्देशेनकृतंनिष्फलंकेवलंदासभावेनैव
कृतंयत्त्रितंनकर्मनित्यादितत्सात्विकंफलसंकल्पमितियस्मिन्हिंसाप्रायंहिंसोद्देशेनकृतंहिंसावद्बलचम्रादिशास्त्रा
नुरंभमात्सर्यादिकृतंतत्तत २३ इदानींसगुणनिर्गुणभेदेनज्ञानादीनांचातुर्विध्यमाहकेवलमदेहादिव्यतिरिक्ता

सत्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः २२ मदर्पणंनिष्फलं
वासात्विकंनिजकर्मतत् राजसंफलसंकल्पंहिंसाप्रायादितामसं २३ कैवल्यंसात्विकंज्ञानंरजोवैक
ल्पिकंतुयत् प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं वनंतुसात्विकोवासोग्रामोराजसउच्यते ता
मसंद्यूतसदनंमन्निकेतंतुनिर्गुणं २५ सात्विकःकारकोसंगीरागांधोराजसःस्मृतः तामसःस्मृतिवि
भ्रष्टोनिर्गुणोमदपाश्रयः २६ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धातुराजसी तामस्यधर्मेयाश्रद्धामत्से
वायांतुनिर्गुणा २७ ॥ राम

त्मविषयंवैकल्पिकंदेहादिविषयंयत्तद्रजःराजसंप्राकृतंबालमूकादिज्ञानतुल्यंमन्निष्ठंपरमेश्वरविषयं २४
अधुनावासविधिमाह वनमित्यादिनावनंविविक्तत्वात्सात्विकोवासः भगवन्निकेतनंतुसाक्षाद्विभोर्वासान्नि
र्गुणंस्थानं २५ कारकःकर्ताअसंगीअनासक्तः रागांधःअत्यभिनिवेशवान्स्मृतिविभ्रष्टःअनुसंधानशून्यः
अविवेकीमदपाश्रयःमदेकशरणःसर्वैर्निरहंकारत्वान्निर्गुणः २६ अधर्मेधर्मइतियाश्रद्धा २७ ॥

ॐ
भा०ए०
टी०
२११

पथ्यंहितंपरिशुद्धंसात्विकंपूतंसुखंअनायस्तंअनायासतः प्राप्तंआहार्यंभक्ष्यभोज्यादि इंद्रियाणांप्रेष्ठंभोगका
लेसुखदंकटुरूक्षलवणादिआर्तिदाशुचिदेशकालममुद्धंचवसहितादात्मनिवेदितंनिर्गुणमित्यभिप्रेतं २८ आत्मोत्थ
सुखंमदपाश्रयमित्यपितत्सदार्थविषयत्वेनज्ञानवदेवद्रष्टव्यं २९ उक्तेसंसारहेतुभूतेत्रैगुण्यमुपसंहरतिद्रव्याद
द्रव्यंपथ्यपूतादिदेशोवनग्रामादिः फलंसात्विकंसुखमित्यादिकालः यदाभजेत्मांभक्त्यापरेणतदोत्तमयेदित्यादिज्ञानयो

पथ्यंपूतमनायस्तमाहार्यंसात्विकंस्मृतं राजसंचेंद्रियप्रेष्ठंतामसंचार्तिदाशुचि २८ सात्विकंसुखमा
त्मोत्थंविषयोत्थंतुराजसं तामसंमोहदैन्योत्थंनिर्गुणंमदपाश्रयं २९ द्रव्यंदेशःफलंकालोज्ञानंकर्मचका
रकः श्रद्धावस्थाकृतिर्निष्ठात्रैगुण्यःसर्वएवहि ३० सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः दृष्टंश्रुतम
नुध्यातंबुध्यावापुरुषर्षभ ३१ ॥

यो इतः ज्ञानंकैवल्यंसात्विकंज्ञानमित्यादिकर्ममदर्पणमित्यादिकारकः सात्विकः कारकोऽसंगीत्यादिश्रद्धासात्वि
क्याध्यात्मिकीत्यादिअवस्थासत्वाज्जागरणमित्यादिआकृतिः उपर्युपरिगच्छंतीत्यादिनोक्तादेवतादिरूपानिष्ठासत्वेम
लीनाःस्वर्गंयांतीत्यादिनोक्तास्वर्गादिः एवंसर्वोप्ययंभावस्त्रैगुण्यस्त्रिगुणात्मकः ३० नकेवलमेषएवकिंतुयावंतःपु
रुषाव्यक्तयोरधिष्ठिताः अधिष्ठिताः तेसर्वेभावागुणमयाएवततप्रपंचयतिदृश्यति ३१ ॥

इदानीमुक्तत्रैगुण्यस्य संसारहेतुत्वमनूद्य तन्निर्गमोपायमाह एता इत्यादि एत इति सार्धेन येनेमे निर्जिताः स एव स्माद्वित्ति
तेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ३२ तस्माद्विवेकिना मिदमेव युक्तमित्याह
तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं ३३ भजनप्रकारमाह निःसंग इति सार्धेन सत्वसंसेवया
सात्विकान्येव सेवेत उमान्सत्व विहायेत्येति गुणक्रयानीत्यानैरपेक्ष्येण उपशमात्मकेन सत्वेनैव ३४ एवं सति

एताः संसृतयः पुंसो गुणकर्मनिबंधनः येनामी निर्जिताः सौम्य गुणाः जीवेन चित्तजाः ३२ भ
क्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं ३३ गुणसंग
विनिर्धूय मां भजंतु विचक्षणाः निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ३४ रजस्तम
श्चाभिजयेत्सत्वसंसेवया मुनिः सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ३५ संपद्यते गु
णैर्मुक्तो जीवो जीवं विहाय मां जीवो जीवेन निर्मुक्तो गुणैश्चाशयसंभवैः ३६ मयैव ब्रह्म
णा पूर्णो न बहिर्नांतरश्चरेत् ३७ इत्येकादशे पंचविंशोऽध्यायः २५ रामचंद्राय नमः

मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वकारणं लिंगशरीरं मां प्राप्तस्य न पुनः संसार इत्याह जीव इति न ब
हिर्विषयभोगेन नानांतरतत्स्मरणेन ३६ गुणाकृता मुरुसंस्मरणप्रयामनिततुष्णकथाकथनादिभिः य
तन इति भक्तिरसेन विवेकिनो नरि पुनः सुलभं नंतु रीटग्रो ॥ इति एकादशस्कंधे पंचविंशः २५ ॥ राम

भा॰प॰
टी॰
११२

षड्विंशेयोगनिरोधयोर्विज्ञातोदुष्टसंगतः साधसंगेनतन्निरपराकाशेतिवर्ण्यते १ योगिनोयोगविभ्रंशाः संगतः
संभवेदिति सर्वथातन्निहत्यर्थमैलगीतंवितन्यते २ निःसंगोमांभजेद्विद्वानप्रमत्तोजितेन्द्रियइत्युक्तंतत्रविपक्षेश्र
नर्थंकथयिष्यन्जीवन्मुक्तस्यापितर्हिसंगोदुर्वारइत्यर्थः स्यादित्याशंक्योक्तानुवादपूर्वकंपरिहरतिसार्द्धाभ्यांमल्ल
क्षणंमत्स्वरूपंलक्ष्यतेयेनतमिमंनरदेहंलब्ध्वामद्धर्मेभक्तिलक्षणेआस्थितः सन्नात्मस्थमात्मन्येवनिधंतंतेनस्थितंप
रमानंदरूपमात्मानंमामनुपैतिसम्यक्प्राप्नोति १ नचैवंभूतस्यविषयसंगोनामास्तीत्याह गुणमय्येतिगुणमय्या

श्रीभगवानुवाच मल्लक्षणमिमंकायंलब्ध्वामद्धर्मआस्थितः आनंदंपरमात्मानमात्मस्थं
समुपैतिमां १ गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया गुणेषुमायामात्रेषुदृश्यमाने
ष्ववस्तुतः २ वर्तमानोपिनपुमान्युज्यतेवस्तुभिर्गुणैः संगंनकुर्यादसतांशिश्नोदरतृ
पांक्वचित् ३ तस्यानुगः तमस्यंधेपतत्यंधानुगांधवत् ४ ॥

जीवयोनिः जीवोपाधिस्तयाविमुक्तः गुणेष्ववर्तमानोपितैर्नयुज्यतेसंगंनप्राप्नोतिअत्रहेतुः अवस्तुभिः नचव
स्तुभिरप्यनेषुदृश्यमानाद्दृश्यंतेनतादृशवस्तुतेनदृश्यमानेषु २ तथापिसंगंवर्जयेदित्याहसंगमितिअसतो
लक्षणमाहशिश्नोदरेतृपंयंतीतिशिश्नोदरतृपस्तेषांकोपिकदाचिदपिआसक्तोनावहेदुनोसंगंकिंतुतस्यैव
स्यानुषंगः अनुवर्तीसन्नंधंधमनुगच्छतिसोपि तद्वत् ३ ॥ रामायनमः ॥

अथेति हासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः उर्वशीविरहात्तयमं मुह्यन् पश्चात् कुरुक्षेत्रे तां समागम
गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति ततो निर्विण्णः सन्निमां गाथाम
गायत् तेनैव समस्कंधार्थानुसारेण हृदयंगमतां नीं मे हावस्यामाह त्यक्त्वेति आत्मानं मद्दारा आत्मानं त्यक्त्वा अथवा शय्यापा
त्यानंतमत्का व्रजंतीमन्वगात् घोरेतिष्ठेति येनाये मनमातिष्ठ घोरे वचांसि कृणावावहै तु नतो मे श्रनुदितामम

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ४ त्यक्त्वात्मानं व्रजं
तीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५ कामानतृप्तोऽनुजुषन् क्षुल्लकान् व
र्षयामिनी न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ६ ऐल उवाच अहो मे मोहविस्तारः कामकश्मल
चेतसः देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७ ॥

एतेन यत्सत्कारसमन्तरेव नाहं न्निसेवमंत्रैः विलपन् ५ वैक्लव्ये कारणमाह कामानिति वर्षाणां यामिनी रात्रीर्यां
तीरपयांतीः आगामिनी आकृष्टचेतनायस्य सः ६ तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंभोगानंतर
निर्विण्णस्य गाथामाह अहो इति दशभिः श्लोकैः अनुतापः प्रपंच्यते अहो इति यतो मया इमे अहोरात्ररूपः आ
युःखंडा न स्मृताः ७ राम ॥

भा॰प॰ तदेवाह नाहमिति अभिनिर्मुक्तः मयि रममाणोऽस्तं यतः अभ्युदितो वा सूर्यं इति न ज्ञ अमुया उर्वश्या वंचितः वत खेदे उत

टी॰ अपि मुषितः वर्षपूगानामपि बहून्यहानि न वेदेति ८ येन संमोहेन आत्मा देहः क्रीडामृगवदधीनः ननु सप्रणय

११३ कुपितायास्तत्र न पार्थमधीनता पुंसत्वैव तस्या न नमंतरतो माह सपरिच्छदमित्यादि स्वरितं ईश्वरं चक्रवर्तिनं तृणमिव

वनक्रायांतीमपि स्त्रियं अन्वगमममनुगतोस्मि ९ किंच मम प्रभावाधिमानो हृयेतेव तस्मात् कुतः तस्य मे तेनावले

नाहं वेदाभिनिर्मुक्तः सूर्यं वाभ्युदितेमुया मुषितोवर्षपूगानां बताहानिगतान्युत ८ अहो मे आत्मसंमोहो

येनात्मा योषितां कृतः क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ९ सपरिच्छदमात्मानं हित्वा तृणमिवे

श्वरं यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् १० कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा योन्वगच्छं स्त्रियं

यांतीं खरवत्पादताडितः ११ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं विविक्तेन मौनेन स्त्रीभिर्य

स्य मनो हृतं १२ स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं योहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः

सेवतो वर्षपूगान्मे उर्वश्या अधरासवं न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा १४

यया पादताडितोपि खरवत्तामनुगच्छन्निति हृतः एवंभूतस्य सर्वसाधनैर्निः फलं वर्थमाह किमिति त्यागेन संन्यासे

न विविक्तेन एकांतेन सेवया मौनेन वाङ्नियमेन अनुतत्पः सत्यात्मानं निरतिशयाभ्यां स्वार्थस्येति अकोविदमज्ञा

तारं गोरिव खरवद्वेति अधरासवं सेवमानस्य आत्मभूः मनोसितः पुनः पुनरुद्भवन् ५ ॥

एवमष्टभिर्निर्वेदोनिरूपितः इदानींतस्यविशेषमाहद्वाभिः पुंसस्त्वेतिनिग्रहेभावः कर्मभिर्देवानिष्ठाइः त्वमेवमामो
क्षिस्यतः परमेश्वरमेवभजेयमिति १५ परमेश्वरप्रसादंविनादेवरूपादिष्टादपिवेदवाक्यान्मोहोननिवर्ततइत्याहबोधि
तस्यापीतिदेव्याउर्वश्यासूक्तवाक्येनयथार्थवचनेनपुरूरवसेमामृथामाप्रपप्तोमात्वावृकासोअशिवासउक्षन्नवैस्त्रै
णानिसख्यानिसंतिशालावृकाणांहृदयान्येताइत्यनेन १६ एवंपुंसस्त्वपहृतंचित्तमित्यादिनातस्याअपकारोनुस्मृतः
इदानींममैवायमपराधइत्याहकिमेतयेतितिनः अस्माकंकामिनोपत्नयोकिमपहृतंनकिंचिदपिपयारज्जुस्वरूपावि

पुंसस्त्वापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः आत्मारामेश्वरमृतेभगवंतमधोक्षजं १५ बोधितस्यापि
देव्यामेसूक्तवाक्येनदुर्मतेः मनोगतोमहामोहोनापयात्यजितात्मनः १६ किमेतयानोपकृतंरज्ज्वा
वासर्पचेतसः रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः १७ क्वायंमलीमसःकायोदौर्गंध्याद्या
त्मकोशुचिः क्वगुणाः सौमनस्याद्याः ह्यध्यासोविद्ययाकृतः १८ ॥

दुषोरज्जुरशुः पुंसः तस्यांसर्पकल्पनयाविद्यतोपिरज्ज्वाकिमपिनापकृतंतद्यस्मात्योहमेवंभजः सएवाजितेंद्रि
यत्वादपराधीइत्यर्थः १७ ननुतयापिसेवसौगंध्यमेतादिगुणैः संमोहमत्तमित्याशंक्यनेपिमपरिकल्पिताएवे
त्याहचतुर्भिः क्वायमितिमलीमसः अतिमलिनः समनसोऊत्तमानामिवगंधसौकुमार्यादिसौमनस्यंयो
भनमनोभवोवा १८ ॥ रामचंद्रायनमः ॥

ममत्वमपि तस्मिन्न्याय्यमित्याह पित्रोः किं स्वं कायः जनकत्वात्तनु वितर्के भार्याया वा भोगप्रदत्वात्स्वामु
भा॰ प॰ टी॰ पयुक्तमप्येतदायत्तत्वादुक्तं स्वामिनो वाधीनत्वात् अग्नेर्वा तैः षांतराहुतित्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् किं वात्म
११५ त्मनः स्वकृतशुभाशुभभोगित्वात् सुहृदां वा उपकारित्वात् एवं यो न निश्चीयते १९ तुच्छाहकमिति विट्भस्मलक्षणा
निष्ठा तो घस्तस्मिन्कायेकलेवरेमेध्ये तनगट्टीतेः भिषंगमेवाह अहो इति सुनसं शोभननासिकं २० अतो गु

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते १९ तस्मिन्क
लेवरेमेध्ये तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः २० त्वङ्मांसरुधिरस्नायुमे
दोमज्जास्थिसंहतौ विण्मूत्रपूये रमतां कृमीणां कियदंतरं २१ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवि
त् विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा २२ अदृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुंजतः
प्राणान् शाम्यति स्तिमितं मनः २३ ॥

णारोपेणाह समासाः माहृशाः कृमिसमा उत्पादत्वगादिसंहतौ तत्संघाते देहे विण्मूत्रादिसंदंतौ रमतां कृमीणां वा
२१ यद्यप्येवं वीभत्सता एव स्त्रियः अथापि नोपसज्जेत अवलोकनादिनापि संगं न कुर्यात् अर्थवित् हितविवेकी अत्र हेतुः
विषयेति २२ ननु कविन्निमीलितनयनादेरपि मनः क्षोभः अतः प्राणानिंद्रियाणि असंप्रयुंजतः नियच्छतः
स्तिमितं निश्चलं सत् २३

ऊ॰

इंद्रियैः कृत्वाऽविस्रब्धः अविश्वसनीयः मादृशामविवेकिनां २४ फलितमाह द्वाभ्यां एवमिति नृपेषु देवेषु देवत्तीति तया २५ उक्तिभिर्हितोपदेशैरिति तीर्थदेवादिसंगादपि सत्संगः श्रेयानिति दर्शयति २६ सतां लक्षणमाह संत इति विशेषेण कस्यचिदपेक्षैषां नास्तीत्यनपेक्षा: २७ नच तेषु उपदेशापेक्षा अपितु केवलं तत्सन्निधिरेव तारयतीत्याह तेष्विति सप्तभिः २८ श्रवण

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां २४ श्रीभगवानुवाच एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः २५ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् संत एवास्य छिंदंति मनोव्यासंगमुक्तिभिः २६ संतोऽनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः २७ तेषु नित्यं महाभाग महाभागेषु मत्कथाः संभवंति हि ता नृणां जुषतां प्रपुनंत्यघं ये वा शृण्वंति गायंति ह्यनुमोदंति चादृताः मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि २९ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ३० यथोपश्रयमाणस्य भगवंतं विभावसुं शीतं भयं तमोऽप्येति साधून्संसेवतस्तथा ३१ निमज्योन्मज्जतां घोरे भवाब्धौ परमायणं संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२ ॥

दिभिरेव मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंति २८ ३१ विभावसुमग्निं सेवमानस्य यथेति नश्यतीति तथा कामादिना ये आगामिसंसारभयं तन्नश्यति अज्ञानं च नश्यतीत्यर्थः ३२ निमज्योन्मज्जतां उच्चावचयोनीः परमायणं परमाश्रयः ३२ श्रीरामचंद्राय नमः

भा॰ए॰टी॰
११५

किंचयथान्नमेवप्राणिनांजीवनमन्नमेवयथार्त्तानांशरणंधर्मएवयथामर्त्यस्यपरलोकेवित्तंतथासंतएवार्वाक्संसारपाता
द्बिभ्यतः पुंसः शरणंशरणं ३३ किंचसंतश्चक्षूंषिसगुणानिर्गुणज्ञानानांनिअर्कः सम्यगुत्थितोपिबहिःस्थूलदृश्यै
कमेवचक्षुरित्यर्थः ३४ अध्यायार्थमुपसंहरतिवैतसेनइतिउन्मभावेनउमावनंप्रविश्यसवीतसीनास्त्रीभावं
गतायस्तस्यपुत्रोवैतसेनः पुरूरवाएवंमत्कारेणोर्वश्यालोकात्स्थानाद्देवलोकनाद्धानिस्पृहस्ततोपिसंत

अन्नंहिप्राणिनांप्राणआर्त्तानांशरणंत्वहं धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं ३३ संतोदिशं
तिचक्षूंषिबहिरर्कः समुत्थितः देवताबांधवाः संतः संतआत्माहमेवच ३४ वैतसेनस्ततोप्येवमुर्व
श्यालोकनिस्पृहः मुक्तसंगोमहीमेतामात्मारामश्चचारह ३५ इतिश्रीभागवतेएकादशस्कंधेऐलोपा
ख्यानेषड्विंशोध्यायः २६ उद्धवउवाच क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो यस्मात्त्वांयेयथार्चंतिसा
त्वताः सात्वतर्षभ १

नादपिदेहतोमुक्तसंगः सन्नात्मारामोभूत्वायथेष्टंचचारेति ३५ इत्येकादशेषड्विंशः २६ सप्तविंशेक्रियायो
गः सद्यः चित्तप्रसादकः सर्वकामाभिदस्तत्रसंगः प्रोक्तासमासतः रागाद्याकुलचित्तानांकुतोसंगादिसंभ
वः इतिकृत्वार्चनेभृशमनुस्मरन्ननुपृच्छति २ क्रियायोगमितिभवदाराधनरूपेयस्मादितिकरणाधिष्ठानादि
मन्त्रैः सर्वकारकाणांनिमित्तत्वस्याविशिष्टत्वात्यथायेनकस्मिन्नधिष्ठानादौकेनप्रकारेणेतिप्रश्नः येधिकारि

अस्यपुनर्विशेषतः अत्रैकारणमाहचतुर्भिः एतत्तदर्चनंनिः श्रेयसकरंवदंतिअंगिरसः सुतोवृहस्पतिः
२ निः सृतंत्वयोपदिष्टमित्यर्थः देव्यैपार्वत्यै ३ सर्ववर्णानांत्रैवर्णिकानां ४ विश्वेश्वरायेतेषामीश्वरः ५
कर्मकांडस्यहृत्नाविधानस्यनांतोस्तितोग्रंथतः पारंचानुष्टानतोयस्यतस्य ६ वैदिकएवमंत्रोवैदिकान्येवांगा

एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां नारदोभगवान्व्यासआचार्योंगिरसः सुतः २ निःसृतंतेमुखां
भोजाद्यदाहभगवानजः पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्रमाणां
चसंमतं श्रेयसामुत्तमंमन्येस्त्रीशूद्राणांचमानद ४ एतत्कमलपत्राक्षकर्मबंधविमोचनं भक्ता
यचानुरक्तायब्रूहिविश्वेश्वरेश्वर श्रीभगवानुवाच नह्यंतोनंतपारस्यकर्मकांडस्यचोद्धव संक्षिप्तं
वर्णयिष्यामियथावदनुपूर्वशः ६ वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः त्रयाणामीप्सितेनै
वविधिनामांसमर्चयेत् ७ यदास्वनिगमेनोक्तंद्विजत्वंप्राप्यपूरुषः यथायजेतमांभक्त्याश्रद्धया
तन्निबोधमे ८ अर्चायांस्थंडिलेग्नौवासूर्येवाप्सुहृदिद्विजे द्रव्येणभक्तियुक्तोर्चेत्स्वगुरुंमाममायया
९ पूर्वंस्नानंप्रकुर्वीतधौतदंतोंगशुद्धये उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिना १०

नित्ययस्मिन्नृकषसत्कारोसवैदिकः एवंतांत्रिकोपिमिश्रोष्टात्तरादिर्मखः पूजा ७ यदात्रैवर्णिकोयमेततद
विशेषमाहगर्भाष्टमेकादशद्वादशादिकालेस्वनिगमेनस्वाधिकारमहत्तेनवेदेनोक्तंद्विजत्वमुपनयनं ८
अर्चायांप्रतिमादौ ९ स्नानविशेषमाहउभयैर्वैदिकैस्तांत्रिकैश्चमंत्रैः १० ॥

किंवा संध्योपासनादीनि कर्माणि मच्चोदितानि साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात् न तु ता
नि परित्यज्येत्यर्थः सम्यक्करणे मत्स्वविषय एव संकल्पो यस्य तया भक्त्या सन् कर्मपावनीं कर्मनिर्हारिणीं ११ प्र
तीभेदानाह सार्धेन शैली शिलामयी लौही सुवर्णादिधातुमयी लेप्या मृच्चन्दनादिमयी हरिद्रादि सुवर्णायां मनोम
यी १२ प्रकर्षेणातिष्ठन्त्यस्यामिति प्रतिष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं चलप्रतिष्ठाकल्पान्यासेन भग
वन्मंदिरं भवतीति प्रतिमाभेदेन विशेषमाह सार्धेन उद्वासो विसर्जनं १३ अस्थिरायामर्चने विकल्पः स्थल

संध्योपास्त्यादिकर्माणि चोदनाचोदनानि मे पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं ॥ शैली
दारुमयी लौही लेप्या लेख्या च सैकता मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति
द्विविधा प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने १३ अस्थिरायां विकल्पः स्यात्स्थंडि
ले तु भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः भ
क्तस्य च यथालब्धैर्हृदि भावेन चैव हि १५ ॥

शामेन कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्याद्वा न वेति अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र वि
लेप्यायां च परिमार्जनमेव १४ इदानीं सकामनिःकामभेदेन विशेषमाह द्रव्यैरिति प्रकर्षेण प्रसिद्धैः सुशो
भनैः अमायिनो निःकामस्य भक्तस्य तु यथालब्धैस्तु एवं चन्दनादिभिः सर्वथा न लभ्यते तत्र हृदि भावेन भाव
नया हृदि चेद्यागस्तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः १५ ॥

र्थोपिशानभेदेनप्रधानोयचाश्रमादसार्थेनस्नानेतितत्रविन्यासः यथास्थानमंगप्रधानदेवतानांतत्तन्मंत्रैः स्था
पनं अभ्यर्हणं उपस्थानाद्यर्घ्यादिसलिलादिभिस्तर्पणादिनाघननं १२ सर्वत्रसाधारणमाद अर्हयेति १३ ए
वमधिकारादिष्वेवस्यानुक्ताउदानीपूजाप्रकारमाद शुचिरितिसंभृताः संभाराः पूजासाधनानियेनसः शा
गग्रैर्दर्भैः यद्वाप्रागेवसंभृतसंभारः सन्नासीनः नतासीनः सम्यक्स्नात्तत्संभाराद्यैर्वाश्रेवाप्रमुक्तिष्टेदित्यर्थः शा

स्नानालंकरणंप्रेष्ठमर्चायामेतदुद्धव स्थंडिलेतत्वविन्यासोवह्नावाज्याप्लुतंहविः १६ सूर्येचाभ्यर्हणंप्रे
ष्ठंसलिलेसलिलादिभिः श्रद्धयोपाहृतंप्रेष्ठंभक्तेनममवार्यपि १७ भूर्यप्यभक्तोपहृतंनमेतोषाय
कल्पते गंधोधूपः सुमनसोदीपोन्नाद्यंचकिंपुनः १८ शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः
आसीनः प्रागुदग्वार्चेदर्चायांत्वथसंमुखः १९ कृतन्यासः कृतन्यासांमदर्चांपाणिनामृजेत् कलशं
प्रोक्षणीयंचयथावदुपसाधयेत् २० तदद्भिर्देवयजनंद्रव्याण्यात्मानमेवच २१

अथवाउदङ्मुखोवाआसीनः अर्चायांतुस्थिरायांसंमुखः अर्चाभिमुखमुपविष्टः सन् १९ अनंतरंगुर्वादिनम
स्कारपूर्वकंयथोपदेशंतस्मिन्कृतन्यासः कृतोमूलमंत्रन्यासोयस्यांतं ममार्चांआमृजेत्निर्माल्याद्यपकर्षणा
दिनाशोधयेत्कलशंपूर्णकुंभंप्रोक्षणीयोदकपात्रंउपसाधयेत् चंदनपुष्पादिभि

ज्ञेम
भा॰ए॰
११०

पाद्यार्घ्यं त्रीणि पात्राणि कलशोदकैः पूरितानि तैलैर्ईक्षैः साधयेत् तत्र पाद्यादि द्रव्याणि पाद्ये श्यामाक दूर्वाब्ज विष्णु
क्रांतादिरिष्यते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितं जातीलवंगकक्कोलै
र्मतमाचमनीयकमिति तानि च त्रीणि पात्राणि यथाक्रमं हृदयादि मंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् देशिकः पू
जकः २१ तदनंतरं पिंडे देहे वायव्याग्निसंभूते शतकोटिगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थ
चंद्रमण्डलामृतस्रवेनामृतमयेन जातेतस्मिन्हृत्पद्मस्योपरिष्टाज्जीवकलां श्रीनारायणमूर्तिं ध्यायेत् तदुक्तं भगवता

मोक्षपात्राणि त्रीणि पद्मसे तैलैर्ईक्षैश्च साधयेत् २१ पाद्यार्घ्याचमनीयार्थं त्री
णि पात्राणि देशिकः हृदाद्यैर्मनुभिः शिखया गायत्र्या चाभिमंत्रयेत् पिं
डे वाय्वग्निसंशुद्धे हृत्पद्मस्योपरि मम २२ अणवीं जीवकलां ध्यायेन्नादांते
सिद्धभाविताम् तयात्मभूतया पिंडे व्याप्ते संप्लाव्य तन्मयः आवाहनादी
नि पुरस्यात्मनःस्तांगं मां समर्चयेत् २४

प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यातो नित्याचक्षते: यो वेदादौ स्वरः प्रोक्तो वे
दांते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति २१ तयात्मभूतया स्वेनैव भावेन संचिंतितया अ
तन्मये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवादौ स्नानसेकोपचारैः संप्लाव्य तन्मयः सन्नचीदि पावास
स्थापनमुद्रया स्थापयित्वा उभाभ्यां मां समर्चयेत् २४ ॥

ऊम

कथं पूजयेत् तदाह पाद्येति द्वाभ्यां धर्मादिभिर्मासन २४ तत्र पद्मं च कल्पयित्वोभाभ्यां वेदतंत्राभ्यां उभयसि
द्धये मत्रेण पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः उपस्पर्शः आचमनं अर्हणमर्चनं अर्घं उभयसिद्धये वेदतंत्रो
क्तभक्तिमुक्तिनामधेयप्रयमर्थः धर्मज्ञानवैराग्यैश्वर्याण्यासनापर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः अधर्मा
दीनि पूर्वादिदिक्षु गात्राणि मध्ये च कर्णिकायां त्रयो गुणाः पद्मिकालत्रपूर्वादिक्रमेण मध्ये च विमलोत्कर्षिणी
ज्ञानक्रियायोगाप्रह्वीसत्येशानानुग्रहेति नव शक्तयः एवं पद्योपदेशं धर्मादिभिश्च नवभिश्च शक्तिभिश्चास

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २४ पद्ममष्टद
लं तत्र कर्णिकाकेसरोज्ज्वलं उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये २५ सुदर्शनं पाञ्चजन्यं गदासीषुधनु
र्हलान् मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २६ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च महाबलं बलं
चैव कुमुदं कुमुदेक्षणं २७ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् स्वे स्वे स्थाने त्वभिमुखान्पूजये
त्प्रोक्षणादिभिः २८ ॥

नेकल्पयित्वेति कर्णिकायाः के सरैः तत्रस्य सूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः २५
आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्रन्यस्तांगावरणपूजा संचिता आसनेनैव शाल्यावरणमित्युक्त
ततः सुदर्शनादिमुसलांतान्यायुधान्यष्टसु दिक्षु कौस्तुभमालाश्रीवत्सानुरसि २६ नंदादीन्पार्षदानष्टदि
क्षु गरुडं पुरतः २७ दुर्गादीनि कोणेषु गुरूनवमानतः सुरान् इंद्रादिलोकपालान् पूर्वादिदिक्षु एवमेतान्देवस्याभि
मुखान्प्रोक्षणादिभिः अर्चादिभिः पूजयेदित्यर्थः २८ ॥

पाद्यादीनुपचारान्प्रकल्पयेदित्यर्थः तानेवं गुणविधिभिः प्रपंचयति षड्भिः चंदनेति २९ मंत्रानाह सपौरु
षोनुवाकः सर्वाणिचर्माण्यपरिवेदवेनमिमारिदमहापुरुषविद्या जितंतेपुंडरीकाक्षनमस्ते विश्वभावन सुब्रह्म
ण्यनमस्तेस्तु महापुरुषपूर्वजेति पौरुषं सूक्तं सहस्रशीर्षेत्यादिनी राजनादीनि सामानि इंद्रं नरोनेमधिताह
वंत इत्यस्यामृचिगीतानि आदिशब्देन रोहिणादीनि ३॰ वस्त्राद्युपचारेष्वलंकारस्तत्राणं गुणंविधत्ते वस्त्रे
ति पत्राणि कपोलवक्षस्थलादिषु लिखितानि पत्रभंग्यः मकुटं चेत्येमपद्यथाभवतितथापर्याप्तमलंकुर्वी

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैःस्नापयेन्मंत्रैर्नित्यदाविभवेसति २९ सपौरुषेणानुवाके
न महापुरुषविद्यया पौरुषेणापिसूक्तेन सामभीराजनादिभिः ३॰ वस्त्रोपवीताभरणपत्रस्रग्गंध
लेपनैः अलंकुर्वीत सप्रेममद्भक्तोमांयथोचितं ३१ पाद्यमाचमनीयंचगंधंसुमनसोक्षतान् धूप
दीपोपहार्याणि दद्यान्मेश्रद्धयार्चकः ३२ गुडपायससर्पींषिशष्कुल्यापूपमोदकान् संयावदधिसू
पांश्चनैवेद्यंसतिकल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्यगीतनृत्यानिपर्वणि
स्युरुतान्वहं ३४ ॥

तेष्वनुकार्यं सर्वं साधारणं ३१ अश्रद्धालुत रणगुणं विधत्ते पाद्यमिति ३२ नैवेद्ये विभवतस्त
रणं गुणं विधत्ते गुडपायसेति शष्कुल्यस्तैलपक्वाविशेषाः आपूपाः अपूपानां मंडकादीनां समूहाः सूपाः व्यंज
नानि सति विभवे इति विशेषः ३३ कालभेदेनगुणं विधत्ते अभ्यंगेति अभिषेचनं पंचामृतादिस्नपनं चा
न्नाद्येति अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ अन्वहं प्रत्यहं प्रत्यहं वा विभवे सतीति ३४ ॥

ओम्

फलभूयस्त्वार्पिनाग्नावर्पिहुत्वा प्रकारमाह विधिनास्वगृह्योक्तप्रकारेणामेखलादिभिरुपलक्षिते विहिते निर्मि
ते तदुक्तं विस्तारोच्चायतत्वेस्तोमेखलाश्चतुरंगुलाः हस्तमात्रोभवेद्गर्तः सयोनिर्वेदिकातथेत्यादितं प्रज्वालित
मग्निं परितः समन्तात् एकाग्रमेल्लयेत् २५ दर्भैः परिस्तीर्य परितः शोल्लयेत् अन्वाधाय अन्वाधानसंज्ञकं आहुतिभिः
समित्प्रक्षेपादिरूपं कर्म कृत्वा अग्नेरुत्तरतोऽस्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षणपात्रेपोत्तरणीपात्रोदकेन प्रो

विधिना विहिते कुंडे मेखलागर्तवेदिभिः अग्निमाधाय परितः समन्तात् मार्गितोद्देतं ३६ परिस्तीर्याथ
पर्युक्ष्यैतन्वाधाय यथाविधिः प्रोक्षणपात्रस्थद्रव्याणि प्रोक्षाग्नौ भावयेत्तमां ३७ नमज्जांबूनदप्रख्यं शंख
चक्रगदांबुजैः लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ३८ स्फुरत्किरीटकटककटिसूत्रवरांगदं
श्रीवत्सवत्ससंभ्राजत्कौस्तुभं वनमालिनं ३९ ध्यायन्नभ्यर्च्य दारूणि हविषाभिप्लुतानि च आज्य
भागावाघारौ दत्वा चाज्याहुतं दद्याद्विः ४० ॥ रामकृष्ण

स्वाग्नौ मां ध्यायेत् ३५ शंखादिभिरुल्लसंतः शोभमानाश्चत्वारो भुजा यस्य तं ३७ स्फुरंतीति किरीटादीनि यस्य
तं ३८ हविषाप्लुतेनाभिप्लुतानि संसिक्तानि दारूणि शुष्कसमिधः आज्यभागौ आघारौ हुत्वा तत्संज्ञकौ याग्योपव
माज्यभागौ चहुत्वा तन्तरयोश्चाहुती हुत्वा तेषामयं नवाघारौ प्रजापतये स्वाहा इन्द्राय स्वाहेति चोत्तरदक्षिणपरिधि
संधिमारभ्याग्निदक्षिणपरिधिसंधिं तन्हुत्वा तासारणारूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ३९ ४०

भा·ट·टी·

११९

मूलमंत्रेणाष्टादशेनतथाषोडशरक्षोपसिंस्तेनपुरुषसूक्तेनचअवदानतः भक्तेवमाकृतिग्रहणेनेमर्थ्यः पु
रुषसूक्तेनाराधनयदेसएवमूलमंत्रस्तेनैवमस्त्वमवदानतोहोमश्रुतिमंत्रैः साहुतेनामंत्रैर्यथाम्नायंपू
नाकृमेणोक्ताव अग्रयेस्विष्टकृतेस्वाहेत्येवंस्विष्टकृतंचकृत्वा ४१ ततोवह्निस्थंभगवंतमभ्यर्च्यायनमस्कृत्यपार्षदेभ्यो
नेदादिभ्योऽष्टसुदिक्षुबलिंहरेत्ततः पूजास्थानमागत्यदेवस्याग्रेसमुपविश्ययथाशक्तिमूलमंत्रंजपेत् ४२ ततउभय
त्रभगवतोभोजनसमाप्तिंध्यात्वाआचमनंदत्वाउच्छेषंविष्वक्सेनायकल्पयित्वातदनुतयायथाप्रात्स्वयंभुंजीत ततः

जुहुयान्मूलमंत्रेणषोडशार्चावदानतः धर्मादिभ्योयथाम्नायंमंत्रैः स्विष्टकृतंबुधः ४१ अभ्यर्च्यायनम
स्कृत्यपार्षदेभ्योबलिंहरेत् मूलमंत्रंजपेद्भक्त्यास्मरन्नारायणात्मकं ४२ दत्वाचमनमुच्छेषंविष्वक्सेनाय
कल्पयेत् मुखवासंसुरभिमत्तांबूलाद्यमथार्हयेत् ४३ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम
मत्कथाःश्रावयञ्शृण्वन्मुहूर्तंक्षणिकोभवेत् ४४ स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि स्तुत्वाप्र
सीदभगवन्निति वंदेतदंडवत् ४५ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परं प्रपन्नंपाहिमामीशभी
तंमृत्युग्रहार्णवात् ४६

सुरभिमत्तगंधवत्तांबूलाद्यमुखवासंदत्वायथार्हणपिअर्हयेत्पुष्पांजलिनाश्चयेत् ४३ अभिनयन्नाभि
नयाविःकुर्वन्क्षणिकः वैयग्र्यपरित्यक्तव्याख्यावसरोभवेत् ४४ स्तवस्तोत्राण्येभेदरशीयातिपौराणैः प्राकृतैःश्रो
तैरिति ४५ कथंमत्पादयोरिकेत्यपेक्षायामाह शिरइतिवाहुभ्यांदक्षिणोत्तराभ्यांपरस्परंममदक्षिणोत्तरौपादौगृ
हीत्वापहारश्चतः परस्परनिवद्धाभ्यांकृत्वापरोधश्चवप्रपन्नमित्यादिविज्ञप्याचप्रणमेत् ४६ ॥ शिवायनमः

ततः शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह इत्यनयैवमार्गेनया शेषां निर्माल्यं मयार्पितं ध्यात्वा शिरसाधा
यध्यात्वा चेद्यदि उद्वासयेत्तर्हि प्रतिमायां घञ्जलं ज्योतिस्तत्पुनः हृत्पद्मस्थज्योतिषि चोद्वासं उद्वासनीयं तदनु स्वपपञ्चात्व
पंभंनेनेतिपतेत्रुर्याधिशानेशुकिंमुखमित्यपेक्षायामाह अर्चादिष्विति ४७ यदायत्रश्रद्धातदातत्रनत्वाधिशानेमुख्यामु
ख्यतं ऊतोयतः सर्वभूतेष्विति ४८ उभयतः इहामुत्र च समर्थयन्नाह मदर्चामिति त्रिभिः ४९ ५० पुष्पोद्यानानि

इति शेषां मयार्दत्तां शिरसाधाय सादरं उद्वासयेच्चेदुद्वासं ज्योतिर्ज्योतिषि तत्पुनः ४७ अर्चादिषु यदा यत्र
श्रद्धा मां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४८ एवं क्रियायोगपथैः पुमान्वैदिक
तान्त्रिकैः अर्चन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सितां ४९ मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेद्दृढं पुष्पोद्या
नानि रम्याणि पूजायात्रोत्सवाश्रितान् ५० पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुरग्रामा
न्दत्वा मत्सार्ष्टितामियात् ५१ ॥

चकारयेत् पूजायात्रोत्सवाश्रितान् पूजा मत्पदं यात्रा विशिष्टपर्वणि वह्निजनसमागमः उत्सवः वसंतादिमहोत्सवः
तदाश्रितान् क्षेत्रादीन्दत्वा पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पूजादीनामिति प्रवाहार्थं सततानुवृत्त्य
र्थं मत्सार्ष्टितां मत्समभावं मे ऐश्वर्यं प्रतिमादीनां व्यस्तानां समस्तानां फलमाह प्रतिष्ठयेति ५१ ॥

मत्स्वाम्यतां मया साम्यमित्यर्थः ५२ सकामं सप्रयुक्तं अहैतुकभक्तं मत्पादमामेवेति अहैतुकभक्तियोगः कथं भव
तिभक्तियोगमिति ५३ दातुः फलमुक्तं अपहर्तारं निंदति यइति विड्भुक् विष्टाभोजी क्रिमिः कर्तृफलं तदेवा
न्येषामित्याह कर्तुरिति ५४ सारथेः सहकारिणः हेतोः प्रयोजकस्यानुमोदितुः च भेत्य तत्फलमित्यन्वयः कु
तोयतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह भूयसि कर्मणि सारथ्यादो च भूयः अधिकफलमि

पतिश्च या सार्वभौमं सप्तनाभवनेच यत् इन्द्राद्विनाग्र यत्लोकं तिभिर्मत्सामतामियात् ५२ मामेव निरपे
क्षेण भक्तियोगेन विंदति भक्तियोगं स लभते एवं यः पूजयेत मां ५३ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः
वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ५४ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रे
त्य भूयो भूयसि तत्फलं ५५ इत्येकादशे श्रीभगवत्कर्मनिरूपणे सप्तविंशोऽध्यायः २७ श्रीभगवानुवाच परस्वभा
वकर्माणि न प्रशंसेन्न गर्हयेत् विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च १ परस्वभावकर्माणि यः प्रशंस
ति निंदति स आशु भ्रश्यते स्वार्थादसत्याभिनिवेशतः २ ॥ रामचंद्राय नमस्ते ॥

ति ५५ यः पश्चाद्दिमात्रेण पूजितो यः परं परं मामेव विशति मीतः सकलस्य शरणं मम इति श्री सप्तविंशः २७
अष्टाविंशे तु यः पूर्वं विस्तरेणोपवर्णितः ज्ञानयोगः पुनस्त्वासौ समासेन निरूप्यते १ इदानीमतिविस्तरेणोक्तं
ज्ञानयोगं संक्षेपेणाह परेषां स्वभावान् शांतघोरादीन् कर्माणि च तत्प्रयुक्तः विश्वमिति १ विक्षेपदोषमाह स्वार्था
त् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैताभिनिवेशात् भ्रंशमेव दर्शयति तनोदर्शयति २ ॥

तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रया आपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति ततो मनस्यपि लीनेन नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं प्राप्नोति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी विक्षेपं लयं वा प्राप्नोतीति यथा मायासंपर्कात् विश्वस्य भोगसंयलक्षणो भ्रंशः एवमनात्मसंपर्कात् आत्मनोपि स्वरूपभ्रंशः संसृतिर्भावः द्वैतासत्यत्वात् तान्निर्विषयतं प्रपंचयति सार्धैः षड्भिः किंभद्रमिति ३ अवस्तुनो द्वैतस्य मध्ये किंभद्रं किं वा अभद्रं कियत् भद्रं कियद्वा अभद्रं इत्यर्थः अवस्तुत्वमेवाह वाचेति वा सेंद्रियोपलक्षणं वा

तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक्पुमान् ३ किंभद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् वाचोदितं तदनृतं मनसा ध्यानमेव च ४ छायाप्रत्याह्वयाभासा असंतोप्यर्थकारिणः एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ५ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६ तस्मान्न ह्यात्मनोन्यस्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ७

वाचोदितं उक्तं चक्षुरादिभिः अनुदृश्यं तदनृतमिति ननु एवं सति देहादिभावानामप्यसंभवात् कथं भयहेतुत्वं तत्र दृष्टांतमाह ४ छाया प्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः एते यथा असंतोप्यर्थकारिणः भवंति आमृत्युतः मृत्युमभिव्याप्य यद्वा मृत्युपर्यंतं यावत् ज्ञानेन न लीयंते तावत्पर्यंतमित्यर्थः ननु सृष्ट्यादिकर्तृभिरेव द्वैतं निरूपितं कथमसत्यं स्यात् तत्राह आत्मैवेति द्वाभ्यां ५ त्रायते पाल्यते त्राति पालयति ६ अतस्मात् सृष्ट्यादिव्यतिरिक्तात् त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः ननु निर्मूलं कथं प्रतीयते तत्राह ७ उदमिति

ज्ञानविज्ञानयोर्नैपुण्यं निष्ठां सूर्यवत्समो भवत्वापततो विशमात्मुपायमाह प्रत्यक्षेणेति ८ यदाद्यंतवत्तदसत्सदि
ति ज्ञात्वा निःसंगो विचरेत् आद्यंतवत्वे प्रमाणानि प्रत्यक्षेण घटादिरनुमानेन सावयवत्वेन हृदृश्यदीयस्यादिनि
गमेन अग्रमसत्स माकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यंतवत् असत्तेति ज्ञात्वेति ननु यदात्मसंवि
दा सर्वं दृश्यमसदिति तु यत्नेन स आत्मा स्वप्रकाशो देहादिहेतौ च जडमितर्कं स्यात् तथा च संसृतिः संसारः प्रतिभासेन
वर्तेतेति चोदयति नैवेति ९ अनात्मस्वदृशोः न ज्ञानजयोः अत्र हेतुः द्रष्टृदृश्ययोः मात्मतद्धयोरपि तत्स्वरूपलभ्य

इदं गुणमयं विद्धि त्रिविधं मायया कृतं एतद्विद्वान्मदुदितं ज्ञानविज्ञान
नैपुणं ८ न निंदति न च स्तौति लोके चरति सूर्यवत् प्रत्यक्षेणानुमानेन
निगमेनात्मसंविदा ९ उद्धव उवाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्य
योः अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते १० आत्माव्ययोऽगुणः शुद्धः स्व
यंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ११ ॥

नश्यति एतत्स्पष्टं चयति आत्मेति १० अव्ययतादिपंचविशेषणैः नाशादि रागादि गुणापगुणज्ञानपरिच्छेदना
मसंभवं दर्शयति हेतुदेहमनं तत्र पत्येश्च अचित् जडः अयं भावः यथैवाग्निर्दारुरहणाभेदेनानुपलंभेपि दाहप्रका
शमेवमग्निः सप्रकाशकः तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि वदनजाति सत्यं तथाप्युभयोरेव
मविवेकरेव संसारादवलंबनमित्याह पंचभिः यावदिति १२ ॥

संनिकर्षणं संबंधः ननु संगस्य कुतः संबंधस्तत्राह अविवेकिनः अज्ञानकृतत्वादित्यर्थः ननु स्वप्रकाशस्य कथमज्ञानतः
संसारः तत्राह अपार्थोपि केवलं फलवान् स्फूर्तिः ननु तर्हि ततोस्तीत्यर्थः ननु सतो देहादेः कुतः संसारस्फूर्तिर्देह
त्वमपि तत्राह अर्थे हीति १२ अस्यात्मनः ननु कथं विज्ञानतो विषयस्फूर्तिर्जीवन्मुक्तस्यापि दुर्निवारेत्यनिर्मोक्ष
प्रसंगः स्यात्तत्राह यद्यपि यादीति १३ प्रसापःह समः बहूनतर्थानर्विमर्तिप्रस्यातीतितत्पादहंकारादिलक्षणोदेहा

श्रीभगवानुवाच यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं संसारः फलवांस्तावदपार्थोप्यविवेकिनः १२ अ
र्थेह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा १३ यदा समतिबुद्धस्य
स्यापो वह्निर्यथा भवेत् स एव मतिबुद्धस्य न वै मोहाय कल्पते १४ शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहं
कारस्य दृश्यंते जन्ममृत्युश्च नात्मनः १५ ॥

दिसंनिकर्षेण संसारालंभनमित्यन्वयः ननु मतिबोधमात्रेण आत्मधर्माणां शोकादीनां कथं निरुत्तिस्तत्राह यानि रे
काभ्यां दर्शयति १७ सुषुप्तादौ तेषामदर्शनात् अहं सुखीति वक्षेतत्वं सुखीति भावाच्च रूपत्वात् सुखादीनां कृशता
दिवत् तद्रूपधर्मत्वानुपपत्तेरिति भावः ननु यद्यहंकारस्य संसारः तर्हि शक्तिरपि तस्यैवेति मुक्तावहंकारावशे
षः प्रसज्येत तत्राह देहेति १५ ॥

भा॰पु॰टी॰
१२२

देहादिष्वभिमानो यस्य सः तेष्वात्मैव तेषामंतःस्थितो जीवः अत एव गुणकर्ममयी मूर्तिर्यस्य सः १६ स एव च सत्वो
पाधिभिर्बहुधैव सूत्रादिशब्दैर्गीतः संसारोपरमेश्वराधीनः सर्वतोधावति अतो नायं दोष इति भावः तदेवमहंकारकृत
बंधमुपपाद्य तन्निवृत्तिं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह अमूलमिति १७ वस्तुतो मूलशून्यम् अज्ञानतस्तु बहुभिः रूपैः
रूपितं प्रकाशितं मैंद्रजालिकतुल्यमिति वा किं तत् तदाह मनइति मनआदीनां द्वंद्वः यद्वा मनआदि पूर्वं क्रियते येन कर्म
अहंकरणं गुरूपासनया निशितेन ज्ञानखड्गेन छित्वा तदेव ज्ञानं सरूपसाधनफलैर्निरूपयति ज्ञानमिति १८ विवे
को ज्ञानं तत्र साधनान्याह निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ऐतिह्यमुप`` अनुमानं तर्कः फलं ज्ञानस्व

देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममूर्तिः सूत्रं महानित्युरुधेव गीतः संसार आधावति का
लतंत्रः १६ अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां वि
चरत्यतृष्णः १७ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्य यदेव केवलं कालश्च हे
तुश्च तदेव मध्ये १८ यथा हिरण्यं स्वकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं ना

रूपमाह आद्यंतयोर्यदस्य जगतः नापदेशैरहमस्य तद्वत् १९ ॥ मध्येपि तदेव केवलं न तु जगदिति किं तत् का
लः कलयति प्रकाशयतीति यः तथा हेतुः कारणं च यत् तदेव एतदुक्तं भवति यदस्य विश्वस्य कारणं प्रकाशकं
वस्तु तदात्मकमेवैतत् न ततः पृथगिति एवं निश्चयफलो निगमादिसाधनैर्जायते यो विवेकः स ज्ञानमिति तत्र नानाभि
र्व्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वे सदृष्टांतमाह यथेति १९ स्वकृतं स्वकुंडलादिरूपेण विरचितं
यद्धिरण्यं कीदृशं हिरण्मयस्य कुंडलादेरुत्पत्तेः पुरस्तात् नाशाच्च पश्चाद्यदलि कटककुंडलमित्यादिनानाव्यपदेशै
र्व्यवहार्यमाणमपि तदेव तथाहमस्य विश्वस्य कारणभूतो मध्ये च नानाव्यवहारालंबनेन तु मतः पृथक्विभोमि

टि १९

तदेवंकार्यस्यकारणात्मतामुक्त्वाप्रकाशस्यप्रकाशात्मतामाह विज्ञानमिति त्र्यवस्थंयकारस्यस्वरूपात्ःत्वंरो
नुरोपेननाग्रदाश्विवस्यपहिज्ञातेमनः तदवस्थाकारणभूतेचयद्गुणत्रयंयच्चकारणकार्यकर्तृकारणमध्यात्मे
कार्यमधिभूतंकर्तृअधिदैवंएवंगुणत्रयकार्यभूतंत्रिविधंजगदेतत्येनतुर्येणसामान्यसमन्वयेनप्रवर्तितयेनानु
गतंप्रकाशतइत्यर्थः तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतितथायद्वस्तुषश्रुत्तरुतश्रोत्रस्यश्रोत्रंम
नसोयेमनोविदुरित्यादिश्रुतेः ननुविशेषत्वानव्यतिरेकेणनतुनामोपलम्भमहेतवाह्यव्यतिरेकतमसमाध्यारोपर

विज्ञानमेतत्त्र्यवस्थमंगगुणत्रयंकारणकार्यकर्तृ समन्वयेनव्यतिरेकतश्चयेनैव
तुर्येणतदेवसत्यं २॰ नयत्तुरस्ताडुतयत्त्वपश्चान्मध्येचतत्तव्यपदेशमात्रं भूतंप्रसिद्धं
चपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा २१ ॥

स्मितदेवसत्यमिति २॰ एवंकालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्तंव्यभिचारिणस्त्वसत्यतामाह नयदितिम
ध्येचतत्तद्यद्यास्तिकिंतुव्यपदेशमात्रंजगतः यतः यद्यत्परेणान्येनभूतंजातंप्रसिद्धंप्रकाशितंचतत्तदेवकारणप्र
काशकंतावन्मात्रंस्यान्नद्वयमितिमेमनीषाबुद्धिः वाचारम्भणंविकारोनामधेयंमृत्तिकेत्येवसत्यंसर्वंखल्विदं
ब्रह्मेत्यादित्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेणचकार्यस्यप्रकाशस्यानुपलम्भादितिभावः २१ ॥ राम

भा॰ए॰टी॰

१२३

एवंसामान्यतः कार्यप्रकाशयोः कारणप्रकाशकाभ्यामभेदमुक्त्वायमस्तीतितदुभयविवेकपूर्वकंप्रपंचस्यब्रह्मा
भेदमाह अविद्यमानइतिकोयंवैकारिकः विकारसमूहः सएषआगविद्यमानोराजसःसर्गः रजोद्वारेणब्रह्मकार्य
भूतइत्यर्थः अवभासतेपिब्रह्मप्रकाशश्रेत्यर्थः ब्रह्मतत्स्वयंसतः सिद्धंनतुकार्यमित्यर्थः ज्योतिःप्रकाशकमित्यर्थः
अतः कारणादिंद्रियाणांचार्थानांतन्मात्राणांचात्मानमनस्त्वदेवानामप्युपलक्षणंविकाराः पंचभूतानिएवंचित्रंब्रह्मै
वभातीति २२ उपसंहरतिएवंनिगमनरूपः प्रमत्तैतिह्यानुमानैः स्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः तथा
परस्यदेहादेरपवादेनात्मत्वनिरासेनचकीदृशेनविशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवाआत्मविषयं

अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्गएषः ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मवि
कारचित्रं २२ एवंस्फुटंब्रह्मविवेकहेतुभिःपरापवादेनविशारदेन छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टो
खिलकामुकेभ्यः २३ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुर्जलंहुताशः मनोन्नमात्रंधिषणाच
सत्वमहंकृतिःखंक्षितिरर्थसाम्यं २४ ॥

संदेहंछित्वास्वानंदतुष्टः अखिलेभ्यःकामुकेभ्यः इंद्रियादिभ्यउपारमेततेनिःसंगोभवेत् २३ परापवादंप्रपंचयति
वपुरात्मानंभवतिपार्थिवत्वात्घटवत्तथाइंद्रियाणितदधिष्ठातारोदेवाअसुःप्राणः मनः धिषणाबुद्धिः सत्वंचित्तंअहं
कृतिरितिएतेआत्मानभवंतिकुतः अन्नमात्रंअन्नोपष्टंभत्वात्शरीरवत्ह्यापुंजलंचहुताशः तेनःखंक्षितिरितिपंचभू
तानिअर्थाः शब्दादयः साम्यंप्रकृतिश्चनात्मानःजडत्वात्घटवदितियद्यपिदृश्यत्वेनानुमानंतथापिस्पष्टत्वातिन्तदिंद्रि
याणिआत्मानभवंतितेनसत्वात्प्रदीपवत्करणात्वात्मनोवत्प्राणश्चवायुवत्तत्वात्सत्वाद्युवदिति २४ ॥

एवंविवेकज्ञानवतोमुक्तस्यनेंद्रियादिकृतोगुणदोषसंबंधस्तस्मादसमाहितैरितिमत्त्वाविविक्तधाम्नः ममस्वशेवि
विक्तंधामस्वरूपंयेनतस्यमकारात्मकस्यमकारागुणदोषानभवंतीतिरविदृष्टांतेनोक्तं २५ असंगश्चस्वेनावस्थि
तस्यनकेपिगुणदोषाइत्याकाशदृष्टांतेनाहयथेतिवाय्वादीनांशोषणदाहक्लेदनरजोधूसरत्वादिभिर्गताग
तैरागमापायिभिः ऋतुगुणैः शीतोष्णादिभिर्वा अहंमतेः अहंकारात्परमत्तरेसंसृतिहेतुभिर्नयुज्यतेयथा

समाहितैः कः करणैर्गुणात्मभिर्गुणोभवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुतकिंनुदूषणंघनैरुपे
तैर्विगतैः रवेः किं २५ यथानभोवाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणैर्नसज्जते तथाक्षरंसत्त्वरज
स्तमोमलैरहंमतेः संसृतिहेतुभिः परं २६ तथापिसंगः परिवर्जनीयोगुणेषुमायारचितेषुतावत्
मद्भक्तियोगेनदृढेनयावद्रजोनिरस्येतमनः कषायः २७ यथामयोसाधुचिकित्सितोनृणांपुनः
पुनः संतुदतिप्ररोहन् एवंमनोपक्वकषायकर्मकुयोगिनंविध्यतिसर्वसंगं २८ ॥

अहंकारस्यसंसृतिहेतुभिरिति २६ मुक्तवदसम्यग्ज्ञानीनयथेष्टमाचरेदित्याहद्वाभ्यांतथापीतिगुणेषुवि
षयेषुरजः रागः मनसः कषायश्चित्तदुर्निरासतामाह २७ एतदेवदृष्टांतेनोपपादयतियथेतिनृणामामयो
रोगः असाधुअसम्यग्यथाभवतितथापक्वकषायकर्मअपक्वाः कषायाः रागादयः तन्मूलानिकर्माणिच
यस्मिंस्तत्अतएवसर्वसंगंसर्वेषुपुत्रादिषुसज्जमानंमनः कुयोगिनमसम्यक्ज्ञानिनंविध्यतिभ्रंशयति २८

भा.प्र.टी.
१२४

ननु कथं विद्विषयसंगे यदि योगभ्रंशः स्यात्तर्हि सोपायेन योगमार्गेण तत्राह कुयोगिनः शतिमनुष्यभजै र्वैधशिष्या
दिरूपैविहितैर्दहोपसृष्टैः मेरितैस्तयाचकृतैः यस्मान्तदेषां न मिथ्यं यदेतन्मनुष्याविचरितिभयोनन्मोऽन्तरे न तु कर्मतं
त्रंकर्मविस्तारे २९ ननु विदुषामपि सर्वथा कर्मदुःखादिदर्शनमिति पुनः संसारे स्यात् तत्राह कोरोतीति विद्वान्सो
नंतर्देहएव भोजनादि कर्म करोति क्रियते विक्रियते च तेन कर्मणा दुःखाद्यपि मामोतीत्यर्थः केनापि संस्कारादिना
चोदितः सन्मानिपातान्मरणपर्यंतं करोति विद्वांस्त्वमहतो देहे स्थितोपि तन्न कर्मणा न विक्रियते निरहंकारित्वा

कुयोगिनो ये विहितान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः तेषां कृतेनाभ्यासबलेन भूयो युञ्जन्ति योगं न तु कर्म
तंत्रे २९ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् न तत्र विद्वान्प्रकृतौ स्थितोपि निवृ
त्ततृष्णः स्वसुखानुभूत्या ३० तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदन्तमन्नं स्वभावमन्यत्किमपीहमान
मात्मानमात्मस्थमतिर्नवेद ३१ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् न मन्यते वस्तुत
या मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३२ ॥

त्तद्धर्षविषादादिभिः संसारं न प्राप्नोति ३० किंच आत्मस्तावद्दैहिककर्मभिर्विकारशंका यतो देहमप्यसौ नानुपश्यती
त्याह तिष्ठंतमिति उक्षंतं मूत्रयंतं स्वभाव नाम मन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतं आत्मानं देहं ३१ न निंद्रियवत्
सर्वथा कथमदर्शनं संभवति तत्राह यदि स्मेति यद्यप्यसंतं वादिंद्रियाणामर्थं पश्यति तथापि नानात्वात्तमि
थ्यात्वमवदित्यनुमानेन विरुद्धं वापि तत्सदन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते स्वाप्नं यथा प्रबुद्ध संस्कार
मात्रेण स्वाप्नं विषयं स्फुरंतं अत एव स्वयमेव तिरोभवंतं यथा पातहन्त ३२ ॥

तदेवमात्मानं विक्रियत इत्युक्तं नत्वेतदुपपन्नं वृद्धावस्थायामात्मान्यमानत्वात् नकावस्थया च गृहस्यमारणत्वान्
द्विवीद्वयोः वत्वातेन नवी द्विभाव त्यागस्तं दृष्ट्वाभावेन गृहस्यमारणाविक्रियं तेतत्प्राद् पूर्वमिति वंधावस्थायां गुणैः
कर्मभिश्च विभ्रमत्वाने कार्यदेहेंद्रियादिलक्षणां ग्रध्यासेनात्मनि श्रविविक्तं गृहीतमासीत्तदेव पुनस्तेनेव

पूर्वं गृहीतं गुणकर्मविभ्रमत्वानमात्मन्यविविक्तमंग विवर्तते तत्पुनरीक्षयैव न गृह्यते
नापि विसृज्य आत्मा ३३ यथा द्विभानो हृदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते
एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ३४

निवर्तते आत्मा तु न केनापि रूपेण गृह्यते नापि त्यज्यते अयं भावः मुक्तेः क्रियाफलत्वेन तावदात्मनो
विकारस्तस्याध्यारोपिताज्ञानमात्रनिवृत्तिरूपत्वात् नात्मसंस्पर्शित्वं वंधमोक्षयोः अतो न विकार इ
ति ३३ तदेव दृष्टांतेन स्पष्टयति यथेति न तु पूर्वमेवसतत्वदादि पुनर्विधत्ते करोति च समीक्षा आत्मविद्या

डोम

प्र.प.टी.

१२५

आत्मनो निर्विकारतां प्रपंचयति एष इत्यनेनापरोक्षतया नित्यमात्मस्यात्मनः शानिवारयति स्वयंज्योति विलसतेन ज्ञानमतापाकारणलक्षणां विकृतिं वारयति अंत्र इत्यत्ति वारयति अ श्रमेय इति ज्ञानलक्षणातिशयाधानेन सं स्कारं महानुभूतिरिति देशकालपरिच्छेदाभावेनास्ति वृद्धिविपरिणामापक्षयनाशान् स्वयंज्योति शुद्धो रूतः सकलानुभूतिरिति एकोद्वितीय इति विकारहेतोरन्यस्याभावात् कोपि विकार इति दर्शयति ननु स्फूर्ति विषयस्य कथं स्वयंज्योतिष्ट्वमित्यत आह वचसां विरामे अगोचरत्वेन निष्ठितो सत्त्वात् तथा च श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवः चरंति ३५ एतावता नात्मसंमोहो यदिकल्पस्तु केवले आत्मन्नुते स्वमात्मानमवलंबो न यस्य हि ३६ ॥

सद्धेतिनत अरूतः येनेषिताः प्रेषिताः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यत् वाचो ह वाचं स प्राणस्य प्राण चक्षुषः चक्षुरिति ३५ अद्वितीयत्वमुपपादयितुं भेदस्य कल्पितत्वमाह एतावतेति केवले अभिन्ने आत्मनि आत्मनो विकल्प इति पदेतावान्स वैष्यात्मनो मनसः संमोहः भ्रमः यतः स्वमात्मानमस्ते विना यस्य विकल्पस्यावलंबः आश्रयो नास्ति रजतभ्रमस्येव शुक्तिं विनानेदनानास्ति किंचन इत्येको मायाभिः पुरुरूप ईयते इत्यादि श्रुतयस्तु द्रष्टव्याः एतावदेतत्त्वादिप्रकतेरित्यर्थः ३६ ॥

केचित्तु नः मतप्रसादिमतीतमपंचस्रवाधायोगात्वेदांतार्थानांचक्रतवर्यकर्तस्मतिपादनपरत्वेनार्थवादत्वा
द्वैतेसत्यमितिमन्यंतेतन्मतमनूद्यदूषयति यदितिनामाकृतिभिः नामरूपोपलक्षितंपंचभूतात्मकंद्व
यंद्वैतेयत्तदवाधितमितिपंडितमानिनां अत्रैवयमेवपंडिताइत्यभिमानवतांवेदांतेषुयमर्थवादइतिमती
तिः नतत्वविरोधतः अर्थेनापिविनाप्यर्थेनसाभातीतिः तथाद्वितावद्विध्येकवाक्यत्वेतेषामस्तियतोर्थवाद
त्वेस्याच्चचाकर्तभोक्तपरमात्मैकरूपात्ममतिपादनेकर्मविधिशेषतोभजतेनचावाधितत्वंद्वैतस्यनामरूपात्मक

—

यन्नामाकृतिभिर्ग्रासंपंचवर्णमवाधितं अर्थेनाप्यर्थवादोयंद्वयंपंडितमानिनाम् योगिनोपक्कयो
गस्ययुंजतः कायउत्थितैः उपसर्गैर्विहन्येतततत्रायंविहितोविधिः ३८ योगधारणयाकांश्चिदास
नैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ३९ कांश्चिन्ममानुध्यानेननामसंकीर्त
नादिभिः योगेश्वरानुवृत्त्यावदून्यादशुभदांछनैः ४० ॥

त्वात् ग्रासत्वात्पंचवर्णात्मकत्वात्समवदित्याद्यनुमानैर्वाचारंभणादिश्रुतिभिश्चवाधितत्वादिति ३७ तदेवं
ज्ञानयोगंसपरिकरंनिरूप्येदानींतन्निष्ठस्यविघ्नमतीकारमाह योगिनइतित्रिभिर्योगंयुंजतः कायोयथंत
देवोत्पन्नैरुपसर्गैः रोगाद्युपद्रवैः अभिभूयतेविधिः मतीकारः ३८ योगधारणयासोमसूर्यादिधारणया
संतापशैत्यादीन्आसनैर्वायुधारणान्वितैर्वातादिरोगान् तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् ३९ ममानुध्या

भा॰प्र॰टी॰
१२६

अन्ये तु देहस्थिरं यथा मे वैतत्सर्वं ऊर्वं निरूपयन्ति केचित्तु नरैस्तैरस्मैश्चोपायैर्देहमेव सकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा अहं हृदयपरकायप्रवेशादि सिद्धये तद्धारणारूपं योगं युञ्जन्तीति न तत्साननिशरूपं ४१ कुशलैः मा ज्ञैर्नादरणीयं न भवति वनस्पतिवदन्तवत्त्वात् शरीरं तत्फलवन्नश्वरमित्यर्थः ४२ ननु क्वचित्समाधिं गतेनापि मारणधारणादियोगे कायस्य मारोनरारोगाद्यभावो दृश्यते सत्यं तथापि समाधिमुत्सृज्य न तत्र सज्जेतेत्याह यो

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं विधाय विविधोपायैरथ युञ्जन्ति सिद्धये ४१ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः अन्तवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ४२ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ४३ योगचर्यामिमां योगी विचरन्मदपाश्रयः नान्तरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ४४ इत्येकादशे भगवदुद्धवसंवादे परमार्थनिर्णयो नामाष्टाविंशः २८ ॥

गमिति तत्रां देहसिद्धिं अश्रद्दधान् न विश्वसेत् ४३ तदेवं विघ्नप्रतीकारैर्योगं कुर्यादित्युक्तं मच्छरणस्य तु न विघ्नशंकापीत्याह योगचर्यामिति विचरन्नाचरन् सततं मदपाश्रयः अनुभूतिर्यस्य सः स्वसुखानुभूः सर्वाशिविघ्ना सा च मदपाश्रयस्य निवर्तते अतो नान्तरायैर्विहतः स्यात् न दृष्टेणीभवतीति ४४ समाहृत्यस्य योगं तु समस्तोपनिषदर्थं सोऽस्त्रेच्छया तन्मां भक्तिमुक्तोऽनुरूपादिशत् । इत्येकादशे अष्टाविंशः २८ ॥

गेन

कृनाविंशेतुयः पूर्वंविस्तरेणनिरूपितः भक्तियोगस्तमेवाद्यसभक्त्यापसमासतः १ अतिकृेशमिवालक्ष्ययोगेः
संगैकसंपरि तुरलोपायंपुनः कृत्समुद्धवः परिपृच्छति २ अनात्मनअवशीकृतमनसः अंजसाःअयासतोयथासिद्धे
तथांजसासवोधंययातथामेब्रूहि १ सुदुस्करतांमपंचयतिप्रायशश्चतिम वोयुंजंतोनिग्रहकृतः सीदंतिक्लिश्यंति
ऊतः असमाधानात्अनिग्रहात्कथंचिन्मनसोनिग्रहेचकर्शिताः श्रांताः संतः २ यस्मादेवंकेवलंविषीदंति

उ॰ सुदुस्करामिमांमन्येयोगचर्यामनात्मनः यथांजसापुमान्सिद्येत्तन्मेब्रूह्यंजसाच्युत १
प्रायशः पुंडरीकाक्षयुंजंतोयोगिनोमनः विषीदंत्यसमाधानान्मनोनिग्रहकर्षिताः २
अथातआनंददुघंपदांबुजंहंसाः श्रयेरन्नरविंदलोचन सुखंनुविश्वेश्वरयोगकर्मभिः
त्वन्माययामीविहतानमानिनः ३ ॥

अथातअतएवयेहंसाः सारासारविवेकचतुराः तेंतानंददुघंसमस्तानंदपरिपूरकंतवपदांबुजमेवसुखं
यथाभवतितथातन्निश्रितंश्रयेरन्सेवंतेअमीतत्वन्मायायाविहताः केचियोगकर्मभिः मानिनः सेतोनश्र
यंतेयदाअमीतद्धताः त्वन्माययानविहताः अतएवयोगकर्मभिः कृतामानिनोनभवंति अन्येतत्वन्मा
यायामोहिताः संतोवयंयोगज्ञावयंकर्मकुशलाइतिकेवलंगर्विताभवंतिनतच्छ्रयंतइत्यर्थः ३ ॥

भा॰टी॰
प॰
१२०

त्वद्भक्ताः त्वत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह किमिति अनन्यशरणोऽदासेषु नचात्मसात्त्वं तदधी
नत्वं यद्यानेन गोपीवल्लिमभ्रतिशुपतत् किं चित्रं नाश्चर्यमित्यर्थः यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः
सहसाभितं सख्यमिति यावत् अरोचयत् प्रीत्या कृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटानि
तेषां तटान्यग्राणि तैः पीडितं विलुलितं पादपीठं यस्य स स्वयं तथाभूतोपि सन् ४ अतस्त्वां परित्यज्य को नाम
त्वत्सेव्यमपेदित्याह त्वत्तेति तमेवंभूतं त्वां को नु विसृजेत् कथंभूतः स्वकृतवित् बलिप्रह्लादिभक्तपालकत्वमनुस्म
रन् ज्ञानन् यद्वा त्वस्मिन्नेवांतर्यामितया कृतमुपकारं विद्वांस्त्वदेवाह अखिलात्मदयितेश्वरमखिलस्य जगतः

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं योऽरोचयत्सह मृगैः स्वयमीश्वराणां
श्रीमत्किरीटतटपीडितपादपीठः ४ नत्वाखिलात्मरतिनेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत
त को नु को वा भजेत्किमपि विस्मृतयेऽनुभूत्यै किं वा भवेन्न तव पादरजोजुषां नः ४। ॥ रामकृस्न

आत्मानं चेतयितारं आत्मत्वात् देवदयितं प्रेष्ठं सुसेव्यं ईश्वरत्वादेवं भूतं भजनीयं किं चाश्रितानां सर्वार्थदं तर्हि किं
फलोद्देशेनाहं सेव्यः नहि नाहं किमपि अश्रनि तत्त्वद्व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा भजेत् सेवेत कथं
भूतेन यत्केवलं भूत्यै ऐश्वर्य भोगाय अनुभवेनेतरमेव त्वद्विहस्तत्वे भवति यद्वा त्वद्व्यतिरिक्तं किमपि देवतांतरं
धर्मं ज्ञानादिसाधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को वा भजेत न कोपि न च त्वत्साधनं विना भो
गमोक्षादि फलं कथं स्यादित्यत आह किं चेति तदुक्तं पाद्मे साधनसंपत्तिः पुरुषार्थचतुष्टये तथा विना तदाप्नोति
नरो नारायणाश्रय इति ५ ॥

आत्मा मम भजनवार्ता त्वत्कृतोपकारस्त त्वात्मनिवेदनैव निष्कृतिर्नाम येस्मादनैवेति अपचितिं मत्तुपकारं
आनृण्यमिमि यावत्कवयोऽनसविदोपि नैवमाप्नुवंतियत स्त्वत्कृतमुपकारं स्मरंतः अस्कुमुदः उपचितपरमानं
दः उपकारमेवाह योऽभवान्वदिराचार्यवपुषा गुरुरूपेणाऽन्तः अंतर्यामिरूपेणाप्यशुभं विषयवास

नैवोपयंत्स्यपचितिं कवयस्त्वेशब्रह्मायुषापिकृतमृद्धमुदः स्मरंतः योंतर्बहिस्तनुभृतामशुभंविधुन्वन्ना
चार्यचैत्यवपुषा स्वगतिं व्यनक्ति ६ मुकः इत्युद्धवेनात्यनुरक्तचेतसा पृष्टोजगत्क्रीडनकः स्वशक्तिभिः ग
हीतमूर्तित्रय ईश्वरेश्वरो जगादसप्रेममनोहरस्मितः ७ श्रीभगवानुवाच हंत तेकथयि
ष्यामिममधर्मान्सुमंगलान् यान्श्रद्धयाचरन्मर्त्यो मृत्युंजय
तिदुर्जयं ८ ॥ रामाय॥

नोविधुन्वन्निरस्यन्स्वगतिं निजं रूपं प्रकटयति तत्स्य न व ६ ईश्वरेश्वरत्वेश्वरत्वेहेतुर्जगत्क्रीडनकं क्रीडोपकरणं
यस्यसः ननु जगत्सम्यस्य सारिनाशस्पैणादयः क्रीडेतितत्राहस्वशक्तिभिः सत्वादिभिः गृहीतं मूर्तित्रयं येनसः सप्रेम
सहितं मनोहरस्मितं यस्यसः सप्रेमयथातथा जगादेतिवा ७ तदेव कथयिष्यतिहंतेतिसहर्षं संबोधनं सुमंगलान्सुख

भा॰ ए॰
टी॰
१२८

धर्मानेवाह कुर्यादिति त्रयोदशभिः स्मरन् शनकैः असंरंभतः कुर्यात्तदाह मयीति अर्पिते मनश्चित्ते संकल्प
विकल्पानुसंधानात्मके येन अत एव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः ९ पुण्यदेशलक्षणेन मद्भक्तैरिति देवा
दिषु ये ये मद्भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत १० सत्रेण संभूय वा ११ अंतरंगां भक्तिमाह मामिति त्रि
भिः सर्वभूतेषु चात्मनि चात्मानमीश्वरं स्थितं मामेव वेदेत कथमेकस्य सर्वेषु स्थितिस्तत्राह खवद्बहिरंतः स्थितमित्यर्थः
तत्र हेतुः अपावृतमनावरणं अनाच्छादनं तत्र हेतुः यथा खमसंगत्वादित्यर्थः १२ हे महाद्युते अतिमात्र इत्यने

कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ९ देशान्पुण्यानाश्रयेत
मद्भक्तैः साधुभिः श्रितान् देवासुरमनुष्येषु मद्भक्ताचरितानि च १० पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्
कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११ मामेव सर्वभूतेषु बहिरंतरपावृतं ईक्षेतात्मनि चात्मानं यथा
खममलाशयः १२ इति सर्वाणि भूतानि मद्भावेन महाद्युते सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः १३
ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके अक्रूरे क्रूरके चैव समदृक्पंडितो मतः १४ ॥

नमस्कारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन्पंडितो मत इत्युत्तरे
णान्वयः १३ ननूत्तमाधममध्यमभेदेनैकरूपेण सभाजनमयोग्यमेव स्यात् सहजादिव्यतिक्रमादित्याशंक्य ता
मेव ज्ञानदृष्टिं प्रपंचयति ब्राह्मण इति विषमेष्वपि समदृक् समं मामेव पश्यन्नैषम्यमेव चतुर्धा दर्शयति ब्राह्मणे पु
ल्कसे इति अतो वैषम्ये पुल्कसे अंत्यजातिविशेषः स्तेने ब्रह्मस्वहारिणि ब्राह्मण्ये ब्राह्मणेभ्यो दातरीति कर्मतः अ
र्के विस्फुलिंगे इति गुणतः अक्रूरे शांते क्रूरे चेति स्वभावतः १४ ॥ रामचंद्राय वै नमः ॥

नरेष्वीश्वरदृष्टिंकुर्वतः सद्यः फलविशेषमाहुस्तेष्विति समोत्तमद्विनेषुसर्हीदयस्वास्मिन्नहंकारस्त्वहितिनिश्चितेवि
यंतिनश्यंति १५ अतोंतर्यामीश्वरदृष्ट्यासर्वोन्मारणमेदितादृविसृजेतिस्मयमानात्सतः स्वान्तस्थैल्यादैहिकी

नरेष्वभीक्ष्णंमद्भावंपुंसोभावयतोचिरात् स्पर्धासूयातिरस्काराः साहंकारा
वियंतिहि १५ विसृज्यस्मयमानान्स्वान्दृशंव्रीडांचदैहिकीं प्रणमेद्दंडवद्भू
मावाश्वचंडालगोखरं १६ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते तावदेवमु
पासीतवाङ्मनःकायवृत्तिभिः १७ ॥

दृशामद्भुक्तमः सत्तुनीचउतिदृष्टिंतयादृशायान्नीडलज्जातांचविसृज्यश्वचंडालादीनभिप्रायप्रणामेत्तनवि
रोधंकुर्यादित्यर्थः १६ एवंपंचभिः श्लोकैरुक्तायाः समदृष्टेरविधिमाहूहाभ्यांयावदिति १७ ॥

भा॰टी॰ तस्यैवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति कुतः आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया अतः परितो
प॰ ब्रह्मैव पश्यन् सर्वतः क्रियामात्रादुपरमेत १८ किमयमेवोपायः अस्ति चान्योपीत्यपेक्षायां संति बह्वः समी
१२५ चीनस्त्वयमेवेत्याह अयं हीति १९ भगवद्धर्मलक्षणोपायस्य समीचीनत्वमेवोपपादयति द्वाभ्यां न हीति अं

सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया परिपश्यन्नुपरमेत् सर्वतो मु
क्तसंशयः १८ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम मद्भावः सर्वभू
तेषु मनोवाक्कायवृत्तिभिः १९ न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि
मया व्यवसितः सम्यक् निर्गुणत्वादनाशिषः २०

गहे उद्धव अनाशिषो निःकामस्य मद्धर्मस्य उपक्रमे सति अण्वपि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैवं
निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः न तु मन्वादिमुखेन कथंचित् २० ॥

किंचयोयऽत्रिग्रथमर्थः किंचवक्तव्यंमद्धर्मस्याविध्वंसऽनियतोलौकिकोपियोयोनिरर्थः अयंआयासः सोपिमयिपरे
निष्फलायचेत्कल्पतेनिष्कामतयार्पितश्चेत्तर्हिधर्मएवस्यात्निरर्थायासेदृष्टांतः यथाभयशोकादेर्हेतोः पलायनाक्रं
दनादिक्लेशास्तद्वत् २१ अतोमद्भजनमेवबुद्धेर्विवेकस्यमनीषायाआतुर्यस्यचफलमितिताद्रूप्येणतामेवदर्शयतिस्त
मम्रतंचमामामनन्तेनासत्येनमर्त्येनविनाशिनामनुष्यदेहेनऽद्यास्मिन्नेवजन्मनिमामाप्नोतीतियत्सैवबुद्धिर्मनीषाचे

योयोमयिपरेधर्मः कल्प्यतेनिष्फलायचेत् तदायासोनिरर्थःस्याद्भयादेरिवसत्तम २१ एषाबुद्धिमतांबुद्धिर्मनी
षाचमनीषिणां यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमामृतं २२ एषतेभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहः स
मासव्यासविधिनादेवानामपिदुर्गमः २३ अभीक्ष्णशस्तेगदितंज्ञानंविस्पष्टयुक्तिमत् एतद्विज्ञायमुच्येत
पुरुषोनष्टसंशयः २४ सुविविक्तंतवप्रश्नंमयैतदपिधारयेत् सनातनंब्रह्मगुह्यंपरंब्रह्माधिगच्छति २५
यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना २६

तिबुद्धिर्विवेकः मनीषाचातुर्यं २२ प्रकरणार्थमुपसंहरति एषतइतिद्वाभ्यां समासव्यासविधिनासंक्षेपवि
स्तारप्रकारेण किंवाअभीक्ष्णशस्तेगदितंज्ञानमेतदनुसंधानकथनेपठनश्रवणपरायणमप्येतदेवफलंभवतीत्याहचतुर्भिः
२४ सुविविक्तमितिमयासुविविक्तंदत्तोत्तरंपुनस्तद्व्याख्यानेनापियोधारयेत्अन्नस्वसंदध्यात्ब्रह्मगुह्यंवेदेपिरहस्यं २५
सुपुष्कलंयथाभवतितथाब्रह्मदायस्यब्रह्मदातीतितथात्मज्ञानोपदेष्टुः २६ ॥

समधीयेतउद्धवः पवेत्परमंशुचिश्चमेषामपिशोधकंश्रनयेतशृणुयेत् २७ २८ सम्यक्ज्ञानानांतत्वेनोद्धतकृपदी
त्वामीत्वाशयेनरच्छानिग्रधिकिमुपधारितमाकलय्याह २९ नैतदितिशावायवंचकाय ३० ब्रह्मण्यायेपोषितो
चयदिभक्तिःस्यात्तर्हिब्रूयात् ३१ एतत्ज्ञात्वेचयुमान्कृतार्थोभवतीत्याह नैतदितिअग्रस्हशेतमाह पीत्वेति
पीयूषंस्वादु ३२ ननुसंतिवहूनिज्ञेयानिततत्फलसाधनानिसतंसंत्यभक्तानांभक्तस्यतुसर्वंमदेवेत्याह

य एतत्समधीयीतपवित्रंपरमंशुचि सपूयेताहरहर्मांज्ञानदीपेनदर्शनम् २७ य एतच्छ्रद्धयानित्यम
व्यग्रःशृणुयान्नरः मयिभक्तिंपरांकुर्वन्कर्मभिर्नसवध्यते २८ अप्युद्धवत्वयाब्रह्मसखेसमुपधारितं अ
पितेविगतोमोहःशोकःचासौमनोभवः २९ नैतत्त्वयादांभिकायनास्तिकायशठायच अशुश्रूषो
रभक्तायदुर्विनीतायदीयतां ३० एतैर्दोषैर्विहीनायब्रह्मण्यायप्रियायच साधवेशुचयेब्रूयाद्भक्तिः
स्याच्छूद्रयोषितां ३१ नैतद्विज्ञायजिज्ञासोर्ज्ञातव्यमवशिष्यते पीत्वापीयूषममृतंपातव्यंनावशिष्यते
३२ ज्ञानेकर्मणियोगेचवार्तायांदंडधारणे यावानर्थोनृणांताततावांस्तेहंचतुर्विधः ३३ ॥

दंडधारणेभवेत्स्यात् तात इति ज्ञानादेर्यावान्धर्मादिलक्षणश्चतुर्विधार्थस्तावान्सर्वोपिनेहमेवतत्रज्ञाने
मोक्षः कर्मणिविहितोधर्मः कर्मरूपेवस्वाभाविकेतकामः योगेत्वणिमादिसिद्धयः वार्तायांकृष्यादावर्थः
दंडनीतावैश्वर्यमितिसिद्धैश्वर्ययोरपिकामांतर्गतत्वाच्चातुर्विध्यं ३३ ॥

ग्नतउत्पतपारम्नर्तइतियदात्यक्तसमस्तकर्मासन्नोनिवेदितात्माभवतितदासौमेविचिकीर्षितः विशिष्टंकर्तुमिष्टो
भवतिततअमृतत्वंमोक्षंप्रतिपद्यमानोमयात्मभूयायमदैक्यायमत्समानैश्वर्यायेतियावत्कल्पतेयोग्योभवतिवै
एवं ३४ आदर्शितोयोगमार्गोयस्मैसः ३५ एवंप्रणयेनावघूर्णंतोभितंचित्तंधैर्येणविष्टभ्यबहुमन्यमानः आ

मर्त्योयदात्यक्तसमस्तकर्मानिवेदितात्माविचिकीर्षितोमे तदामृतत्वंप्रतिपद्यमानोमयात्मभूयाय
चकल्पतेवै ३४ शुकः सएवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचोनिशम्य बद्धांजलिःप्रीत्युपरु
द्धकंठोनकिंचिदूचेश्रुपरिप्लुताक्षः ३५ विष्टभ्यचित्तंप्रणयावघूर्णंधैर्येणराजन्बहुमन्यमानः कृ
तांजलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदं ३६ उद्धवः विद्रावितोमोहमहांधकारोयआश्रि
तोमेतवसन्निधानात् विभावसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य ३७ प्रत्यर्पितोमेभव
तानुकंपिनाभृत्यायविज्ञानमयःप्रदीपः हित्वाकृतज्ञस्तवपादमूलंकोन्यंसमीयाच्छरणंत्वदीयं ३८

त्मानंकृतार्थंमन्यमानः ३६ प्रयाप्तः मोहआश्रितआसीत्सतवसंनिधानेनैवविद्रावितः प्रभवंतिकिंतुबाधाय
समर्थाभवंतिअनादयग्रहणोपिननकः ३७ किंचयद्यपितवसंनिधानादेवगतस्तथाप्यनुकंपिनाभवताविज्ञा
नमयःप्रदीपश्चप्रत्यर्पितः स्वमायया हृतः पुनः समर्पितः अतस्त्वत्कृतज्ञोपस्तयाहंतमनुग्रहंजानातिसः
कोनामत्वदीयंपादमूलंहित्वाअन्यंशरणंसमीपाश्रयेत ३८ ।।

भा॰प॰
१३१

किंचदाशार्हादिषुत्वयायःस्वमाययास्नेहपाशःप्रसारितःसत्वयैवात्मतत्त्वज्ञानशस्त्रेणाहत्वाछिन्नः ३९ एवंयद्यपि
त्वयाबहुकृतंतथाप्येतावत्प्रार्थयेनमोस्त्वितित्वमनुशाधिशिक्षयअनुशासनीयमाहयथेतिमुक्तावप्यनपायिनी ४०
तदुक्तमोमित्यंगीकृत्यतथापिमयादिशोलोकसंग्रहार्थमेतावत्कार्यंस्यादाह गच्छेतिश्रीहरिरोतिनियुक्तः ४१ स्नानादेः

वृक्णश्चमेसुदृढःस्नेहपाशोदाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितःसृष्टिविवृद्धयेत्वयास्वमाययाह्यात्मसुबो
धहेतिना ३९ नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमां यथात्वच्चरणांभोजेरतिःस्यादनपायिनी ४०
श्रीभगवानुवाच गच्छोद्धवमयादिष्टोबदर्याख्यंममाश्रमं तत्रमत्पादतीर्थोदेस्नानोपस्पर्शनैःशुचिः ४१
ईक्षयालकनंदायाविधूताशेषकल्मषः वसानोवल्कलान्यंगवन्यभुक्सुखनिःस्पृहः ४२ तितिक्षुर्द्वंद्व
मात्राणांसुशीलःसंयतेंद्रियः शांतःसमाहितधियाज्ञानविज्ञानसंयुतः ४३ मत्तोनुशिक्षितंयत्तेवि
विक्तमनुभावयन् मय्यावेशितवाक्चित्तोमद्धर्मनिरतोभव अतिव्रज्यगतीस्तिस्रोमामेष्यसिततःपरं ४४

एवंमेमत्पादतीर्थोदंश्रुतायाअलकनंदायागंगायाः ईक्षयावसानःपरिधानःवन्यभुग्वन्यस्यभोक्ता ४१ द्वंद्व
मात्राणांशीतोष्णादिविषयाणांसुशीलःआर्जवादिस्वभावः ४२ तेत्वयाविविक्तंसविचारंनिःस्पृहःत्रिगुणा
त्मिकागतीरतिक्रम्य ४४ ॥ राम ॥

हरिमेधसासंसारंद्रवतिमेधायस्तेनश्रीहंसेनअहंद्रुपरोपिसखदुःखविनिर्मुक्तोपित्युपक्रमेनिर्गमसम
ये ४५ सद्गुरुस्तनः स्नेहेद्रोपस्मिन्तेनवियोगातत्कातरोभीतः अतएवतंपरित्यक्तुमशक्नुवन्नातुरोविह्वलः
सन्हंसंकंठेशयपौमाप ४६ ततश्चभर्तृपादुकेतेनैवहंसपयादत्तेमूर्ध्निबिभ्रद्दातिनिर्वधरूपयातद्यस्तयातंपु
नः पुनः नमस्कृत्यपयौअयंचरष्टशतोन्वगमंभर्तुः पादविश्लेषणात्मम इत्यादिइतीयस्कंधोपक्रमोक्तानुसा
रेणवदरिकाश्रमंगच्छन्भगवतः प्रभासयात्रामुपक्रमसरानैः शृष्टतोगतः सन्नुपसंहृतनिजकुलंभगवंत

मु. सएवसमुक्तोहरिमेधसोद्धवः प्रदक्षिणंतंपरिसत्यपादयोः शिरोनिधायासुकलाभिरार्द्रधीर्न्यषिंचद्द्वं
द्वपरोप्युपक्रमे ४५ सद्गुरुस्मनस्वेदवियोगकातरोनशक्नुवंस्तंपरित्यक्तुमातुरः कृच्छ्रंययौमूर्ध्निभर्तृपा
दुकेबिभ्रन्नमस्कृत्यययौपुनः पुनः ४६ ततस्तमंतर्हृदिसंनिवेश्यगतोमहाभागवतोविशालां यथो
पदिष्टांजगदेकबंधुनातपः समास्थायहरेरगाद्गतिं ४७ यपतदानंदसमुद्रसंभृतेस्तानात्मतंभगव
तामभाषिते हंसेनयोगेश्वरसेवितांघ्रिणासदुर्हृदयासेब्रजगद्धिमुच्यते ४८ ॥ मेकोनेरष्टानतकालस्या
तेनमैत्रेयेणासद्पुनः कृपयाभगवतोपदिष्टंतत्वमाकलय्यतदास्तातोपयाचितनिदश्येवविशालांवदरिकाश्र
मंगतः सन्हरेर्गतिमगात्तत्प्रधंभूतांतेनैवजगदेकबंधुनायथापरिदिष्टांतदामस्तनतंमतिपद्यमानोमयालभ्यपाय
चकल्पतेवैअतिनिवृत्तिमगतीतिहितोमामेष्यसिततः परमित्येवमुक्तप्रकारा ४७ आनंदसमुद्रोभगवद्भक्तिमार्गीस
स्मिन्संभृतमेकीकृतमेतत्यः सकृद्रयाकासेयर्द्वेषश्चपिसेवितावर्ततेसमुच्यतइतिकिंवक्तव्यंतस्तागाद्ब्रगद्यि

एवंकृतोपदेशंजगद्गुरुंप्रणमतिभवमितिभवः संसारः भयंचजरारोगादिनिमित्तंतदुभयंनिवर्त्तनांचमहतानां
चभृत्यवर्गाणांप्रपायोगमपहन्तुंयोमत्स्यरूपमुपजह्रेउद्धृतवान्तदेवाहवेदसारमेकंकिंतत्ज्ञानविज्ञानरूपं
चतत्सारश्रेष्ठंचभृङ्गवद्भृङ्गोयथापुष्पमकरंदंपयत्रवामृतमुद्रसंहरति तथास्वयंस्वकृतवेदानुसारेणैवउदधित
श्चैकंतच्चोभयंयथापाययंभृत्यवर्गानपाययत्तंनतोस्मीति ४९ येनानुकंपितंविप्रमुद्धवमत्रनिर्णयैः तेवे

भवभयमपहन्तुंज्ञानविज्ञानसारंनिगमकृदुपजह्रेभृंगवद्वेदसारं अमृतमुदधितश्चापाययद्भृत्यवर्गा
न्पुरुषमृषभमाद्यंकृष्णसंज्ञंनतोस्मि ४९ इत्येकादशेश्रीभगवदुद्धववदर्याश्रमप्रवेशोनामैकोनत्रिंशः
२९ सूतोवाच ततोमहाभागवतउद्धवेनिर्गतेवनं द्वारवत्यांकिमकरोद्भगवान्भूतभावनः १ ब्रह्मशा
पोपसंसृष्टेस्वकुलेयादवर्षभः प्रेयसींसर्वनेत्राणांतनुंसकथमत्यजत् २॥

देपरमानंदंनंदनंदनंहरिपरं ४९ इत्येकादशः २९ त्रिंशेतुमगुपत्तिमौसलव्रमनोहृतिः सुधामगंतुमभि
ध्यन्संजहारनिजंकुलं १ वैराग्यपूर्वसायोरमुपपादितमौसले कथावसानेतत्रैवविशेषपरिपृच्छति २ ततश्चे
तित्रिभिः ब्रह्मशापोपसंसृष्टेस्वकुलेसतिअग्रपंभावः भगवतिनद्विशापः प्रभवतियादवनामनुकरणमात्रवंसो
पिकथंचिन्मान्यः अतः किमकरोदितितदेतदुक्तंकथमत्यजदितिसर्वनेत्राणामितिसर्वेंद्रियोपलक्षणं २२४

नतत्र पंचपतितमत्याकृष्टमितियस्मिन् रूपेलग्नंनयनंपरावर्तयितमवलानशेकुः पञ्चकर्णाविंद्भेणमविष्टुंनतत्त
तामात्मानिलग्नलिखितमिवतिष्ठतिततोनसरंतिनानिर्गच्छतियस्य श्रीः शोभासंकीर्तमानाकवीनांवाचो
रतिमुह्लाससविशेषंननयंतितेषांमानंनगतस्मृतानन्यतीतिकिंतुवक्तव्यंपञ्चविलोः रूपंजिसोरर्जुनस्यरथे

मत्याकृष्टंनयनमवलायत्रलग्नंनशेकुः कर्णाविष्टंनसरंतिततोयत्सतामात्मलग्नं यच्छ्रीवाचांनन्य
तिष्ठतिकीर्त्तमानाकवीनांदृष्ट्वाजिसोर्युधिष्ठिरयमतंयच्चतत्तास्मीपुः ३ ऋषिरुवाच दिविभुव्यंतरिक्षे
चमहोत्पातान्समुत्थितान् दृष्ट्वासीनान्सुधर्मायांकृष्णःप्राहयदूनिदं ४ श्रीभगवानुवाच एतेघोरामहोत्पा
ताद्वार्वत्यांयमकेतवः मुहूर्तमपिनस्थेयमत्रनोयदुपुंगवाः ५ उत्तिष्ठंतिपदुश्रेष्ठाः स्यातव्यंनोत्रशिष्यते
स्त्रियोबालाश्चशंखोद्धारंव्रजंत्वितः ६ वयंप्रभासंयास्यामोयत्रप्रत्यक्सरस्वती ६ तत्राभिषिच्यशुच
यःउपोष्यसुसमाहिताः देवताःपूजयिष्यामःस्नपनालेपनार्हणैः ७ ब्राह्मणांस्तुमहाभागान्कृतस्व
स्त्ययनावयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ ॥

स्थितंदृष्ट्वायुधिष्ठिरस्ततस्तांसंसारूप्यं
ईयुः मामाः ततकेन रूपेणात्यत्रदित्यनयः ३ दिविसूर्यपरिवेषादीन् भुविभूकंपादीन् अंतरिक्षेदिग्दाहा
दीन्महोत्पातादीन्सयमेवत्यादितात्मामैर्दुःमतीकाराच ४ यमस्यकेतवोध्वजाश्चवमरतुसूचकाइत्यर्थः
नः अस्माभिः ५ प्रत्यक्पश्चिमवाहिनी ६ अभिषिच्यस्नात्वा ७ ब्राह्मणांश्चतैः कृतशांतिकाः गवादिभिः

विधिः प्रतीकारः मंगलायनं च किंच द्विजदेवगवां पूजा उद्भवहेतुः देवलोके परम उद्भवो भविष्यतीति भावः ९

भा॰ए॰टी॰ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य उत्तीर्य समुद्रं १० सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगवतानुक्तैरपि

१३३

विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं देवद्विजगवां पूजा भूतेषु प
रमो भवः ९ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः तथेति नौ
भिरुत्तीर्य प्रभासं प्रययू रथैः १० तस्मिन्भगवतादिष्टं यदुदेवेन
यादवाः चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ११ ततस्तस्मिन्म
हापानं पपुर्मैरेयकं मधु दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते
मतिः १२ महापानाभिमत्तानां वीराणां दृप्तचेतसां कृष्णमाया
विमूढानां संघर्षः सुमहानभूत् १३ युयुधुः क्रोधसंरब्धा वेला
यामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४

सर्वैः श्रेयोभिः सहितं चक्रुः ११ पीपत इति पानं मैरेयकं मदिराविशेषं मधु स्वरसं दिष्टेन दैवेन विभ्रंशिता धियः
न सम्यग्यातस्मिन्स्थाने न तु उचितमिति भावः यस्य द्रवैः रसैः १२ कृष्णमायाविमूढानामिति निमुख्यो हेतुः संघर्षः क

पतंत्स्व(?)तस्तनश्चालयंत्यः पताकाये(?)पुत्रैः रथादिभिर्मिथः समेतस्तत्पदृव्वत्स्वयन्निसर्षः दाङ्ग्रैर्दतैरिव १५ मिथः
समेतसेनसमपंचः मकूप्रेत्यादिचतुर्भिः गदोहृलसभ्रानेकः पुत्रश्चापरह्यो हामित्रासरथाविदिदेवेर्मार्षश्च
रथन्मामावाकाश्रित १६ मदोधेनमदतमसाबलात्कारिताः १७ दशाहादयोनवतत्तदंशाः अर्बुदामाथयः

पतन्मताकैरथकुंजरादिभिः स्वरोष्ट्रगोर्मर्दिषैर्नरैरपि मिथ्याः ससेनाम्बनरैः सदुर्मुदाम्मदृत्त्वशरैर्द्
ङिरिवद्विपावने १५ मथकन्सांबौपुधिकूफमत्सरावकूरभोनाविनिरूदुसात्मकौ सुभद्रसंग्रामजितौ
सदारुरौगगदौसमित्रास्तरथौसमीपतः १६ अन्येचयेवैनशठोस्सुकारथः सदृत्तनिछतनिद्रानुद्
ध्वाः अन्योन्यमासाद्यमदोधकारितानक्षुर्मुकुंदेनविमोहितान्भृशं १७ दाशार्हवृष्ण्यंधकभोजसात्वता
मध्वर्बुदामाथवसूरसेनाः विसर्जनाऊकूरकंनयश्चजघ्नुर्मिथस्तेथविसृज्यसौहृदं १८ पुत्रास्तपुत्र
म्पितृभ्रातृमात्रभिः स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणिमित्रैः सुहृदः सुहृद्भिस्तातीत्त्वदृत्त्वज्ञात
यथवमूढाः १९ शरीषुहीयमानेषुभज्यमानेषुधन्वसु शस्त्रेषुक्षीयमानेषुमुष्टिभिर्जह्नुरिरकाः २० ता
वन्नकस्यासभवत्नस्परिवामुष्टिनाभवाः जघ्नुर्द्विषस्तैहृतसेनवार्यमाणाःस्तनेचते २१ प्रत्यनीकंमन्य
मानावलभद्रंचमोहिताः हंतुकृतधियोराजनापन्नताततायिनः २२ ॥
सूरसेनाश्चतत्रहेशीषाः १८
भ्रातृभिश्चेतिभतादिशाहानांसमतियोगिवाचित्वाज्ञातयोमातुलारथादिसेयंमिश्रैश्चमित्राणिचश्चहत्
दृनवेतः १९ पत्नस्तुधनुष्ववकुर्वनगरं(?)ःर परिवात्तोदृंशः भत्ताधृताः ततश्चश्रीहृसेमपिप्रत्यनीकंम

टिप्पं ॥ ५५ ॥

भा.प्र.टी.
१६४

एरकामुष्टिःपौपरिघायुधस्य २३ स्पर्धानिमित्तः क्रोधः कुलेसंहरयंनिन्ये २४ २५ पौरुषंयोगेपरमपुरुषध्यानल
क्षणंतमेवाहसंयोज्येतिमानुषलोकेभूलोकंमनुष्यरूपतांवा २६ धरोपस्थेभूतले २७ भ्राजिष्णुरूपं २८ तदे

अथतावपिसंक्रुद्धावुद्यम्यकुरुनंदन एरकामुष्टिपरिघौचरंतौजघ्नतुर्युधि २३ ब्रह्मशापोपसृष्टानांकृ
ष्णमायावृतात्मनां स्पर्धाक्रोधःक्षयंनिन्येवैणवोग्निर्यथावनं २४ एवंनष्टेषुसर्वेषुकुलेषुस्वेषुकेशवः अ
वतारितोभुवोभारइतिमेनेवशेषितः २५ रामःसमुद्रवेलायांयोगमास्थायपौरुषं तत्याजलोकंमानुष्यं
संयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्यभगवान्देवकीसुतः निषसादधरोपस्थेतूष्णीमासाद्य
पिप्पलं २७ बिभ्रच्चतुर्भुजंरूपंभ्राजिष्णुप्रभयास्वया दिशोवितिमिराःकुर्वन्विधूमइवपावकः २८ श्री
वत्सांकंघनश्यामंतप्तहाटकवर्चसं कौशेयांबरयुग्मेनपरिवीतंसुमंगलं २९ सुंदरस्मितवक्त्राब्जंनी
लकुंतलमंडितं पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हा
रनूपुरमुद्राभिःकौस्तुभेनविराजितं ३१ वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः कृत्वोरौदक्षिणेपा
दमासीनंपंकजारुणं ३२ ॥

वानुवर्णयति श्रीवत्सांकमितिचतुर्भिः २९ सुंदरस्मितंवक्त्राब्जंयस्मिंस्तं पुंडरीकवदभिरामेअक्षिणीयस्मिंस्तं दृश्यते त्रिली
यस्मिन् ३० ३१ वनमालयापरीतान्यंगानियस्मिन्ततनिजायुधैरुपरीतांगंपंकजारुणंवामंपादंदक्षिणोरौ

[illegible] ३०

जरानामकोस्मिल्लुब्धको मृगपुरंगास्यास्यमिवाकारो यस्य तं चरणं ३३ ३३ ब्रह्मशापकृतमेतत्तवापराधशति
वेरत आह यस्य तवात्मयोगरचितं स्वाधीनं मायारचितं विरिंचिः ब्रह्मास्य तनयः रुद्रादयश्च ये चान्ये गिरां पतयो वे
दरहस्यास्तेपि न विदुः तस्य ते अविद्यमायस्य पतद्ब्रह्मशापादि भ्रान्तस्तानि श्चये असद्गतयः पापयोनयो वयं किं गृ

मसत्वावशेषयः स्वं इकृतेषुलुब्धकोजरा मृगास्याकारं चरणं विव्याध मृगशंकया ३३ चतुर्भुजं तं पुरुषं दृ
ष्ट्वा स कृतकिल्बिषः भीतः पपात शिरसा पादयोरसुरद्विषः ३४ अजानता कृतमिदं पापेन मधुसूदन
क्षंतुमर्हसि पापस्य उत्तमश्लोक मेनघ ३५ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनं वदंति तस्य ते विष्णो
मयासाधु कृतं प्रभो ३६ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकं यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं
यस्यात्मयोगरचितं न विदुर्विरिंचो रुद्रादयोस्य तनयाः पतयो गिरां ये त्वन्मायया पिहितदृष्टय एतदंजः
किं तस्य ते वयमसद्गतयो गृणीमः ३८ श्रीभगवानुवाच मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे या
हि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदं ३९ श्रीशुकः इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा त्रिः परि
क्रम्य तं नत्वा विमानेन दिवं ययौ ४० दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य तां वायुं तुलसिकामोदमाघ्रा
याभिमुखं ययौ ४१ ॥

णीमः कथं वर्णयामः इति यावत् अत स्तदाज्ञां प्राप्नुवरिति मामेवापराधकारिणं
पापकर्माणं महापुरुषा न घ्नंतीति भावः ३८ इच्छाशरीरेणात्मस्याये भावः ३९ मुहूर्तमपीनिनं श्रीमूर्तिमंत
धीयतन्नतिकृतस्यैव विधिवनमात्रमिति एतदेवस्फुटीकरिष्यन्नितिदेशाद्यो ब्रह्मानुष्ठा इत्यादि ४१ ॥ ५

भा॰टी॰
प॰
१३५

तंपतितंतत्रदृष्ट्वातस्यपादयोर्निपपात ४३ उदीत्वमारागस्मृतस्समतः ४४ ४९ निर्याणंयोगमार्गेण ५० महत्ता
मित्तीक्षा शरीराभिमायेणाभ्रविताररसमानः इंद्रप्रस्थंगमिष्ययेतिब्रूहीति एवैंगान्वयः ४८ यन्मायारच

तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिं स्नेहप्लुतात्मानिपपातपादयोरथादवप्लु
त्यसबाष्पलोचनः ४२ अपश्यतस्त्वच्चरणांबुजंप्रभोदृष्टिःप्रणष्टातमसिप्रविष्टा दिशोनजानेनलभेचशां
तिंयथानिशायामुडुपेप्रनष्टे ४३ इतिब्रुवतिसूतेवैरथोगरुडलांछनः खमुत्पपातराजेंद्रसाश्वध्वज
उदीक्षितः ४४ तमन्वगच्छन्दिव्यानिविष्णुप्रहरणानिच तेनातिविस्मितात्मानंसूतमाहजनार्दनः
गच्छद्वारवतींसूतज्ञातीनांनिधनंमिथः संकर्षणस्यनिर्याणंबंधुभ्योब्रूहिमद्दशां ४६ द्वारकायां
चनस्थेयंभवद्भिश्चस्वबंधुभिः मयात्यक्तांयदुपुरींसमुद्रःप्लावयिष्यति ४७ स्वंस्वंपरिग्रहंसर्वेआदाय
पितरौचनः अर्जुनेनाविताःसर्वेइंद्रप्रस्थंगमिष्यथ ४८ त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपेक्षकः मन्मा
यारचनामेतांविज्ञायोपशमंव्रज ४९ इत्युक्तस्तंपरिक्रम्यनमस्कृत्यपुनःपुनः तत्पादौशीर्ष्ण्युपाधायदु
र्मनाःप्रययौपुरीं ५० इतिश्रीभागवतेएकादशस्कंधेत्रिंशोध्यायः ३० रामचंद्रायनमः ॥

नामेतांविज्ञायेतिनिजश्रीमत्तैर्वंतार्दृतत्वाहृयारोकंमाजरवित्यर्थः ४१ ऊतस्यविनश्वतात्वद्दुर्मनाः ५० इते

एकत्रिंशे स्वकं धाम जगाम भगवानितः तमेवानययुः सीमावसद्देवादयस्ततः देवान्यहानि धाम्ना दैभयोर्दे
हानि धाययवा श्रीकृष्णः स्वेच्छया धाम स्वतनैव समाविशत् १ मुनयः सनकादयः १ अत्रेश्वरा मरीच्यादयः
द्विजा नागकद्रुवासिनः पक्षिणः मैत्रेयाद्योवा भगवतो निर्याणं द्रष्टुकामाः सन्तः परमोत्सुकाः सन्तः तत्रागमत् २
तेषां मोत्सुकत्वं मदोत्सवमाद्र सार्धं नगायन्तश्चेति विभूतीः ऐश्वरीं रूपमनेन न्यमीलयदित्यन्वयः भावः पूर्वं ब्रह्मा
दिभिः स लोकालोकपालान्नः पाहि वैकुण्ठं किंकरानिति प्रार्थितत्वादिदानीं स्वं स्वं लोकं प्रतिनेतुमागतत्वाद्धृदृश
नेपुरादिसूर्यपानान्वंचयितुं समाधिमिव कुर्वन् नेत्रे न्यमीलयदिति ४ योगिनामिव स्वच्छन्दमृत्युत्वं भ्रमं वारयति ५ लो

शुकः अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्वराः १ पितरः सिद्धगंध
र्वा विद्याधरमहोरगाः चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः २ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः
गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म च ३ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः कुर्वन्तः संकुलं रा
जन्भक्त्या परमया युताः ४ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं पद्मनेत्रे न्य
मीलयत ५ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं योगधारणयाग्नेय्या दग्ध्वा धामाविशत्स्वकं ६

काभिराममिति अयमर्थः योगिनो हि स्वच्छन्दमृत्यवः स्वतनुमग्नेय्या योगधारणया दग्ध्वा लोकान्तरे प्रविशन्ति
भगवांस्तु न तथा किंतु अदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठाख्यमविशत् तत्र हेतुः लोकानामभिरामः अ
भितो रमन्ते अस्यामिति ये स्यात्तां न गराध्यपतेन जगतोपि दाहमसंगादित्यर्थः किंच धारणाध्यानयोः मंगलं शोभनं
विषयं वितरत्यानतयोगिनिविषयत्वेनास्यां तरस्तेचायाद्युपासकानां तस्यैतत्स्वरूपस्यात्ताकारः फलमसिद्धेतिभा
वः रत्नाशरीराभिमायेणवाकृतमेवास्तत्रापितु लोकाभिरामामिमामिति विशेषणानामानर्थक्यमसंगात्तदीय

तदा तु स्वं स्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादः ३ महत्सारिमहोत्सवोऽभवदित्याह
दिवीति भूमेः सकाशात् श्रीकृष्णमनुययुः ७ तदा श्रीकृष्णे स्वयं तर्हिते सति ऊर्ध्वं गत इति वितर्कयंतोऽपि ब्रह्ममुख्या
देवादयः स्वधामनि विशंतं श्रीकृष्णं न ददृशुः तत्र हेतुः अविज्ञातगतिमिति क्वचित्क्वचिद्ददृशुः ततोऽतिविस्मि
ता बभूवुरित्यर्थः ८ अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु लक्ष्यते तथा

दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ७ देवादयो ब्रह्म
मुख्या न विशंतं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ८ सौदामिन्या यथाकाशे यांत्या
हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः विस्मि
तास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा १० राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य
॥

भ्रमंडलं हित्वा गच्छतः श्रीकृष्णस्य देवैरपि न लक्ष्यते किं तत मर्त्यैरेवेत्यर्थः ९ अभिमायापरिज्ञानतः अ
यमंशिर्दृष्टांतेन स्पष्टमतो दर्शं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनु
भृत्त्वया देवादिषु जननाप्ययेहा आविर्भावतिरोभावचेष्टा मायया अनुकरणमात्रमवेहि नटो यथा विकृत
कृतपवनानारूपैर्जन्मादीनि दर्शयति तद्वत् ॥ ॥

—— तावत्यादवादिषु जन्मादिशंकयायावद्विश्वसर्गनिरोधादिषु सविस्तृत एवास्ति तस्मादहस्थेति ·· सयथे
वेदं जगत्सृष्ट्वा अथ तपामि तेनानुविश्य आत्ममहिम्ना स्वमहिम्ना उपरतस्तत्रास्ते ॥ न पुनर्बन्धया मंतव्य यतोस्मि
न्नेवावतारेन तत्प्रभावनिवर्तिसंयोग हर्षः उत्साह मर्त्येमे नियमेन सल्लोकं मन्तिने तं गुरुसन्तेन मर्त्येन तेनैव शरीरेण
पश्चानयत्तत्रानीतवान् शरणदः शरणागतवत्सलकं तां च ब्रह्मास्त्रदग्धं योरक्षितवान् यश्च अन्तकानामंतकम
पि ईशं चाश्रीरुद्रं बाणसंग्रामे जितवान् मृगयुं लब्धकं सः स्वर्गं अनयत् तन्निम्न अन्ये सो स्वावने स्वरक्षणे अनीशः स्वसम

स ह्यात्मनेदमनुविश्य विसृज्य चांते संहृत्य चात्ममहिम्नोपरतः स आस्ते ११ मर्त्येन यो गुरुसुतं यमलोक
नीतं त्वां चानयच्छरणदः परमास्त्रदग्धं जिग्येंतकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं स
देहं १२ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् नैच्छत्प्रणेतुं
वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् १३ ॥

र्थः किं १२ ननु यदि सामर्थ्यं तर्हि किं चिरकालमत्रैव तेनैव वपुषा किं नातिष्ठत् तत्राह तथापीति यद्यपि उक्तप्रका
रेणाशेषस्य जगतः स्थित्यादिषु अनन्यहेतुः निरपेक्ष एव कारणं स्वयं च यस्मादशेषशक्तिधृक् तथापि यादवान् सं
हृत्य निजं वपुः अत्र शेषितं अत्र रक्षितं प्रणेतुं कर्तुं नैच्छत् किंतु स्वमेव लोकमनयत् तत्र हेतुः मर्त्येन देहेन किं नाकिं
चित्कार्यमिति सस्थानां आत्मनिष्ठानां दिव्यां गतिमेव प्रकटं दर्शयन् अन्यथा ते पि दिव्यां गतिमतां दृष्ट्वा योगब
लेन देहसिद्धिं विधायात्रैव वर्तेरन् तन्माभूदित्येतदर्थमिति भावः १३ ॥

भा॰द॰
टी॰
२३०

पतामृतमकारोकश्चिपितमपंचांपदवीं १४ तदेवंभगवतास्वंलोकंगच्छतावसुदेवादीनामपितत्राशये
घउपायः चिंतितमासीतमाह दारुकइत्यादिनाघतः कंसविघ्नुतः भगवद्विरहमापन्नः तल्लोकोद्भवनेत्राम्बु
नाःसिंचदित्यर्थः १५ १६ कंसरामोसतावपश्यंतः १७ १८ सदुक्तिभिः सत्त्ववितया-- येषुतैः नाद्भुम

यदतत्मानरूत्यायकंसस्यपदवीपरां मघतःकीर्तयेद्भृत्यानामेवामोस्मनुत्तमां १४ दारुकोद्धार
कामेत्यवसुदेवोग्रसेनयोः पतित्वाचरणवद्धेनुस्पर्षिचत्कंसविघ्नुतः १५ कथयामासनिधनंकृष्णस्यी
नोकंतस्वशोन्दप ताक्रुत्वोदिग्रहृदयमक्रुनाःशोकविमूर्छिताः १६ तत्रसमतारिताजग्मुःकंसविक्षेय
विद्भलाः यत्रवःशेरतेयत्रत्वातयोक्षेतस्मानने १७ देवकीरोहिणीचैववसुदेवस्तयासतो कंसरोमा
वपश्यंतःशोकातीविनष्टःस्मृतिं १८ मारणाश्चविनद्रुल्लरभगवद्विरहातुराः उपगुह्यपतीलातवि
तामारुरुहुःस्त्रियः १९ रामपत्न्यश्चतद्देहमुपगूह्याग्निमाविशन् वसुदेवपत्न्यस्तद्गात्रंमघकस्नादीनूरू
देस्तुषाः २० कंसपत्न्योविशत्त्राग्निंरुक्मिणप्याल्लदात्मिकाः अर्जुनःसेयसःसख्युःकंसस्यविरहातु
रः आत्मानंसांत्वयामासकंसगीतैःसदुक्तिभिः वंधूनानष्टगोत्राणामर्जुनःसांपरायिकी २१ हतानांका
रयामासयथावदनुपूर्वशः क्रियांचकारविधिवत्कंसस्यतद्देहावसुतः २२ ॥

कोशः सर्वस्ययोगमायास्समाह
तः लोकोयंनाभिज्ञानातिमूढोमामजमव्ययमित्यादिभिः २१ नष्टगोत्राणांनष्टसंततीनांसांपरायिकींपैत्रोदका